मात्मनोपमात् ज्ञाननिष्ठो न मन्यते अतो कुर्वन्नपि सदोषबुध्या न निंदति । गुणबुध्या न विहितं किंतु ईशप्रेरितोऽस्मीति । स एव च मयि स्थितः
दा

दोषबुध्योभयातीतो निषेधान्न निवर्तते । गुणबुध्या च विहितं न करोति यथार्भकः ॥११॥ सर्वभूतसुहृच्छांतो ज्ञानविज्ञाननिश्चलः ।
पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥१२॥ शुक उवाच । इत्यादिष्टो भगवता महाभागवतो नृप । उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युत १२

निंदां निषेधं करोत्यजः । न मे दोषो न च गुणः कर्तृत्वाभावतः स्फुटं । स्वतंत्रत्वात् केशवस्य यत्र्याप्तेषु भवेदपि इति मत्वा निवर्तेत निंद्याद्दुष्कृत्यो कुर्यान्नि
तिवाक्य सिद्धाय मर्थः पि अज्ञात्वा तत्र दोषो गुणो वा भवेदित्यर्थः । अनित्या मगुणा नित्यसुरोषा नैव कथं च न । इति मत्वा शुभं कुर्यान्निवर्तेत् अशुभाद
पि ज्ञानी तत्कर्तृत्वाभावात् ईशकर्तृत्वनिश्चयात् । किंतु पूर्णो गुणायैव न तु दोषाय मम त्रये । न चास्य गुणसिद्ध्यर्थं बालवत्कृतनिश्चयवत्
तद्युक्तायमीनवेलक्षण्याद्दूरोऽभिन्नं तत्त्वं न तदात्मकं । इति विश्वं प्रपश्यंति ज्ञाननिष्ठो हरेः प्रियात्यत ज्ञानार्थिना विश्वमेवं द्रष्टव्यमित्यभि
नर्थमानं २३ ॥

ना०१
२४

योगस्य यमनियमादेरीश। योगस्य ज्ञानस्य विशेषेण न्यासो देशादिष्वर्पणं येन स तथा तस्य संबोधनं योगविन्यासेति। योगात्मन् ज्ञानस्वरूप। योगसंभव उपायजनकं ज्ञानं तु योगः प्रोक्तं। युज्यते। नेन यत्सुखं। एवंविधो योगउपायः स्यात्। विविक्तं निरोधनमिति। त्यागं दानं ध्यानं वर्तयति संन्यासे

उद्धव उवाच॥ योगेश योगविन्यास योगात्मन्योगसंभव। निःश्रेयसाय मे प्रोक्तस्त्यागः संन्यासलक्षणः॥१४॥
त्यागोऽयं दुष्करो भूमन्कामानां विषयात्मभिः। सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः॥१५॥ सोऽहं ममाहमिति मूढ तः
मतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे। तत्त्वंजसा निगदितं भवता यथाहं संसाधयामि भगवन्ननुशाधि भृत्यं॥१६

संन्यासलक्षण इति सर्वदुष्टसंगपरित्यागलक्षण इत्यर्थः॥१४॥ ततः किमत्राह। त्याग इति। कामानामयं त्यागः सुतरां त्वय्यभक्तैर्दुष्करः॥१५॥ त्वन्मायया सोऽहमुद्धवनामा सानुबंधे विरचितात्मनि निर्मिते देहे ममाहमिति मूढमतिरत एव विगाढ इति यत्तस्मात्त्वं तानि
गदितं यथा संसाधयामि तथा भृत्यं मां शाधीत्यन्वयः॥१६

२४
राम

त मु त्र
दे भगवान्यदूद्धवसंवादव्याजेन स्वतत्त्वमुद्धवायोपदिशत्यध्यायद्वयेन। तत्रादावुद्धवोक्तं स्वामीष्टमिति वदन्ब्रह्मादीनां स्वलोकगमनमभिलाषं देवकार्यं करणावतारप्रयोजनं स्वयानानंतरं द्वारवत्याः समुद्रमज्जनं। लोकस्य पापबुद्धित्वेन मंगलं त्वं कलियस्त लोकादुद्धवस्य निर्याणप्रेरणं। स्वस्मिन्मनःप्रवेश्य महीपर्यटनं नियोगमिति दर्शयत्यादवत्ति। यदात्थ मामित्यादिना मोक्षं स्वलोकगतं कर्तुमभिकांक्षिणः १ स्वर्गादिहरणानंतरं सप्तमदिवसे ३ यर्हि यदा ४ अधर्मरुचिरिति पदच्छेदः॥५॥ क्षितिसंचरणे दृष्टभावविशेषमुपदिशति। यदिदमिति। मनआदिसर्वेन्द्रियैः गृह्यमाणं यदिदं रो

तं
श्रि श्रीभगवानुवाच॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे। ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः॥१॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः।
यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः॥२॥ कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात्। समुद्रः सप्तमे ह्येनां पुरीं च प्लावयिष्यति॥३॥ यर्ह्येवा
यं मया त्यक्तो लोकोऽयं नष्टमंगलः। भविष्यत्यचिरात्साधो कलिनापि निराकृतः॥४॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले। जनोऽभद्र
द्र रुचिर्भद्र भविष्यति कलौ युगे॥५॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु। मय्यावेश्य मनः सम्यक्समदृग्विचरस्व गां॥६॥ यदिदं मनसा भु
वाचा चक्षुर्भ्यां श्रवणादिभिः। नश्वरं गृह्यमाणं च विद्धि मायामनोमयं॥७॥
मनो

दं विश्वं तदिदं नश्वरं क्षणभंगुरं विद्धि न विद्यमानं वो ध्यंत हेरिति तत्राह विद्धीति। विद्धीत्येतत्संबध्यते। मनोमयीं मायां मन्मनःप्र
ना धानप्रकृतिनिर्मितं विद्धि सेयं बुद्धिर्धीनीरूसा प्रकृत्या रचितत्वादनिर्वाच्यां विद्धि। न स्वतंत्र इति वन्मायामयमिति प्रयोगो युज्य
ते। अत्रा[redacted] चेतन प्रकृतेः कार्यात्मकत्वमस्त्वचेतनायाः कथमिति इयमाशंका प्रकृतिः सा परा मह्यी रोदसी लोकधारिणी। के
नासत्यामराजत्यालोकानामलसंज्ञितेत्यनेन परिहर्तव्या प्राधान्यापेक्षया पपद्यत इत्यर्थः॥ ॥ ॥ ॥

यस्माद्भवतोऽन्योऽक्लान्तानास्ति तस्मादहं नारायणं शरणं प्रपद्ये। ममतानेपदेशायेति शेषः भवंतं प्रज्ये। अनवद्यत्वं एज्यत्वे हेतुः अनवद्यत्वे हेतुः अ
नंतपरत्वं परं तपारत्वं तर्हि स्वस्याज्ञानं आर्त्तं अतउक्तं। सर्वज्ञमिति। बलयत्वमतिबंधकेन ज्ञानंच विदलध्वंस्यादत उक्तं। ईश्वरमिति देशप्र भु
वर्दारस्यापि स्थानच्युतिः स्यादत्राह अखंडेति। अखंडं अपरिच्छिन्नं अविकुंठं अविनाशि च धिष्ण्यं स्थानं यस्य सतथा नन्व उभ

तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमखंडविकुंठधिष्ण्यं॥
निर्वेदधीर इरहं जिनाभितप्तो नारायणं नरसखं शरणं प्रपद्ये॥१८॥

अत्र तं बध्यते। शरणप्राप्तौ हेतुमाह। निर्वेदेति कुतो निर्वेद इत्यत्राह। वृजिनेति एवं विशिष्टोपि नारायणोन्यः किं न स्यादत्राह। नरस
खमिति। एतद्विशेषणं हरेरिति कुत इतीयमाशंका। विष्णोर्वायोरनंतस्य त्रिभिरंशो नरः स्मृतः। सेंद्रैश्च तु भिर्पार्थस्तु इत्यांतु व
चलक्ष्मणा वित्यनेनापरिहृतव्या॥१८॥

लोकतत्त्वविचक्षणस्योद्धवस्य पुनरुक्तत्वज्ञानभ्रमः द्विमर्थ इत्याशंक्यापरोक्षलोकतत्त्वज्ञानस्य सत्त्वे हं मंतरेणोत्तमस्य पुरुषार्थस्य साधनत्वं न स्यात्पुत्र्यु
तानर्थहेतुत्वं च अपरोक्षज्ञानस्त्वादादित्याशयेनाह। प्रायेणेति। प्रायेण मनुजा इति। प्रायेण बहुधा लोके ये मनुजाः लोके तत्त्वविचक्षणाः सत्वेनौ
हनिर्मुक्तापरोक्षज्ञाननिपुणास्ते आत्मनेवचप्रयत्नेनैवाशुभाशयात् अस्मत्प्रलोपेयं यमीपापफलं दुःखबहुलं तमः प्राप्यात्मानं समुद्धरंति निर्मु
क्तयंति। हि यस्मात्तस्मात्स्नेहयुक्त लोकतत्त्वपरोक्षज्ञानविद्याविशारदाः आत्मनेव सात्विकमनसैवाविर्भूतापरोक्षज्ञानेनैवाशुभाशयात्
 पकारणात्संसारादात्मानं समुद्धरंस्युत्तर्यंतिकूपादिवेति। अनेन भगवद्भक्त्युत्पन्नज्ञानं पुरुषार्थोपयोगीतिज्ञानं समुद्धमन्नस्यापि ममश्रेयसंभगव
वदपरोक्षज्ञानोत्पत्तिप्रकारो वक्तव्य इति तत्प्रश्नः सार्थक इति। पत्र्लोके ग्रामनस्यात्मा इत्यभिधानादात्मशब्दोयत्रादो वर्तते इति सिद्धोरोक्षे

श्रीभगवानुवाच। प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः। समुद्धरंति ह्यात्मानमात्मनैवाशुभाशयात्॥१९॥ आत्मनो गु
रुरात्मैव पुरुषस्य विशेषतः। यत्प्रत्यक्षानुमानाभ्यां श्रेयोसावनुविंदते॥२०॥
ऐवंतत्वंतु लोकं चापि स्विदंतिये नेपितत्त्वे हृनिर्मुक्तास्तमोयांतिविनिश्चयात्। आपरोक्षैकत्वज्ञानं नेषामुत्पद्यते कचित्। इति कवनादु
 क्तार्थभेदः सिद्ध इति संतोष्टव्यं॥१९॥ आत्मनैवेत्येकारेण श्रेयः संपत्तौ सात्विकमनसः प्राधान्यमुक्तं तदेव प्रतिपादयति। आत्मन इति। आत्म
नो जीवराशेः श्रेयः संपादने गुरुपदे दृष्टे आत्मैव मन एव मनसा वा अत्रैसंकल्पयत्यथ यात्वाहरतीति श्रुतेः अत इसातत्यगमन इति धातोः निष्पन्नेना
त्मशब्देन शरीरे पंकस्यते। तस्यैव गमनस्य भगात् तत्रापि विशेषतः पुरुषार्थलक्षणश्रेयः संपन्नो पुरुषस्य मनुष्यशरीरं प्राप्तस्य आत्मन आत्मैव
गुरुरिति संबध्यते। कुत इत्यत्राह। यदिति असौ पुरुषः मानुषशरीरं प्राप्तो जीवः प्रत्यक्षानुमानाभ्यां श्रेयः पुरुषार्थं विंदत इति यदतद्इतिमनः
 पूर्वकं वसुधारूढ्या इत्यादिजीवादि संपल्लक्षणाः श्रेयः प्राप्तिदर्शनेन योगादिना धनसामर्थ्या स्वर्गादि श्रेयः प्राप्यत इत्यनुमीयत इति॥२०॥

भा॰ए॰
३६

वर्धतं

संतापं एतदेव विशदयति पुरुषत्व इति। पुरुषत्वे मनुष्यशरीरे शोभमानं यत्तां वक्तोऽस्य योगविशारदा धीराः सर्वशक्त्युपबृंहितं मां निस्तारं यथा योग्य विश्वरूपं प्रप श्यंति सम्यक्। आ॰ संतापः आर्त्तं सारितारं यती च्या विस्तारस्तं आत्मसंतापकोपयो दीतियास्त्वः निस्या विवृत्ति मूलं वा।।२१।। बहवीः पुरः एकद्विपुरस्तेषु का
घु पत्तव प्रेष्ठेति तत्र ग्रहणासामिति।।२२।। तत्र कारणमाह अत्र मामिति। अत्र मनुष्यपुरुषशरीरे मनोयोगयुक्ता योगिनः स्वतो बाह्यमीश्वरं मामग्राह्य त्पक्षीकर्तुं मार्गयंति विचार्य ज्ञातुं यतंते। कैर्हेतुभिः सकृ भिः अनुमानतः निर्दोषपंचावयववलक्षणवाक्यात्मकैः किंप्रमाणकैः चक्षुरादिना गृह्यमाणैः

पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः। आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितं।।२१।। एकद्वित्रिचतुष्पादो बहुपादस्तथापदः
बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया।।२२।। अत्र मां मार्गयंत्यद्धा युक्ता हेतुभिरीश्वरं। गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमान
तः।।२३।। अत्राप्युदाहरंतीममितिहासं पुरातनं। अवधूतस्य संवादं यदोरमिततेजसः।।२४।। अवधूतं द्विजं कंचिच्चरंतमकुतोभयं क
रिये विं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित्।।२५।। कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा। यामासाद्य भवाल्लोकं विद्वांश्चरति बालवत्।।२६।।

रूपादिभिरात्मनः परमात्मनो लिंगैः गमकैर्ज्ञापकैर्जीवस्य दर्शनादिस्त्रोतं व्याप्ता भोक्ता तत्कृतान्यईश्वरो पपत्ती यानुमीयतइति।।२३।। यथा
हंसस्य पर्या भितथा यो शार्थी त्युद्भव वाक्यमवधार्य नुक्तमर्थमिति हासेन संवेदयति। अत्रेति। अत्र पुरुषशरीरे अईनिमार्गेणेन सुलभ
इत्येतस्मिन्नर्थे अवधूतयदुसंवादरूपमितिहासं पुराविदं उदाहरंति अस्यैव विवरणं पुरातनमिति। अमिततेजसः अनल्पबलस्य
तेजो बले प्रभावे चे ज्योतिष्यं विविरित सीति तिस।।२४।।२५।। अकर्तुः निषिद्धाचरणरहितस्य। आत्मानादि विहितन्निःशून्यस्य वा२६ ३६।।
नाम

५

तवमत्त्वरूपेपदेष्टा मत्तो न्यः किं न स्यादत आह। सत्त्वस्येति तत्त्वस्वरूपस्य वक्तारमात्मनः सत्तो न्यं पुरुषं नानुपश्येन पश्यामि कीदृश्यस्य तस्य साधुत्वा
नादिगुणस्य स्वदृशः स्वयंप्रकाशमानस्य आत्मनः सर्वव्यापिनः मनुष्येष्वप्यात्मनो पिदेवेषु त्पादतउक्तं। विबुधेष्वपीति उक्तं विदिशानिष्ट। सर्वइति ब्रह्मा
स्याप आदिः कारणं येषां उद्गादीनां तेन तथोक्ताः। ते विमोहितधियः परोक्षज्ञानवंतः कुतो त्वनु भूतइति। शरीराभिमानित्वादत एव बहिरर्थभावाः मोक्षतद्धुप नाह
योगिभ्यो न ज्ञापिका मनुक्त्वा अस्य श्लोकार्थः। अशरीरः सदा विष्णुः पूर्णानंदत्वतः सदा। इच्छतस्त्रीउयेवास्य न फलं युतो विभो। अतो बाह्यार्थ
कामोपिनिष्कामरति कथ्यते तद्वत्सानिरभिमानित्वाच्छरीर्यपि शरीरवान्। नित्यानंदोपि प्रोग्यस्य कामस्याज्ञितितः सदा बहिरर्थवित्निर्गुणोक्तः
तथापि तनुधारणात् अमूढो मूढवत्तिवदुच्यते वसरस्वती। रुद्राद्यास्तत्त्वभीमानाद्बहिरर्थेषु जागृत्तथा।। सर्वेषां ब्रह्मपदवी योग्याना द्वेमेवतु। अ
त
सत्त्वस्येतरदृश आत्म आत्मनोन्यं वक्तारमीश विबुधेष्वपि नानुपश्ये। सर्वे विमोहितधियस्तव मायये मे ब्रह्मादयस्तनुभृतो बहिरर्थभावः ७
भावस्तु परोक्षस्य मोहेप्यज्ञानस्य कथ्यते। ब्रह्मणस्त्वंशरूपेषु भारत्याज्ञानवर्जनं। अंशगाय त्रिभावत्वांशावतरणं विदः। शतजन्मसु पूर्वं
तु ज्ञानोदयइदीयते। आपरोक्ष्येणपारोक्ष्यात्तद्दर्शनज्ञानं सर्वतु। शतजन्मसु पूर्वेस्तु गतायाद्यापरोक्ष्या च्छितिभवेत्। क्वचित्क्वचित्सरस्वत्या
अंशावतारणेष्विति। शालिक्विकयंथादवगतइति, अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानीति श्रुति रत्र मानं। श्रु
तिभिस्तेनितत्वानुस्तनयित्नुईरितस्मृतः। अभ्रं मज्जाभिभरणादश्री वायुर्भरतः स्मृतः। विद्युद्भारती प्रोक्ता एत एव शरीरिणः व्यासेना
पिनामस्यादेतेषां महताप्तदेत्येन श्रुत्युक्ता एता एवेति तत्रायं ते।।७।।

भा॰ए॰
३७

क्षितेः शिक्षितां बुद्धिमाह। भूतैरिति तद्दैवं विदंतीति तद्विदः तेषां देवज्ञानां मार्गात् तद्विद्वानिति पाठे तस्य दैवस्य वशानुगत्वं जानन् मार्गात्स्वस्ततः क्षितिशिक्षितं
क्षितेर्व्रतं स्वबलत्वं अतएव चलेतिए धिया नामांतरं। ३७। भूमेः शिक्षितव्रतांतरं बुद्धिं चाह। शश्वदिति। सर्वदा परेषां गुरुर्देवैर्दिः सज्जनानां अर्थेआ ता
त्मनः सर्वे हांसकलचेष्टां संभवे वृद्धिं च सज्जनार्थेषु मन्ये तदेहिकी वृद्धिमात्मनः इत्यादरय मेवाधइति। शिक्षेत नियमेनेति शेषः। एवं विधृता
नानि शिक्षमाणस्य मुनेर्वृत्तिप्रकारमाह। प्राणवृत्त्येति। मुनिर्यावत् प्राणवृत्त्या शरीरयात्रा भासं तुष्येत्। तावत्येव निर्विहृतु एवकारस्य व्यत्येमा

तद्विदो भूतैराक्रम्यमाणोपि धीरो दैववशानुगैः। तद्विद्वान्न चलेन्मार्गादनुशिक्षं क्षितेर्व्रतं॥३७॥ शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः। सा
धुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां॥३८॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः। ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः॥३९॥ न
विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः। गुणदोषव्यपेतात्मा न विषज्जेत वायुवत्॥४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः॥ हे
गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक्॥४१॥

ह्नेनैवेति तत्रापि ज्ञानं नाशकानकारणानि मनोविक्षेपनिमित्तानि वाङ्व्यापारान् सेवेते त्याशयेनाह। ज्ञानमिति॥३९॥ वायोः शिक्षितां बुद्धि
रिति तत्राह विषयेष्विति विषयेष्वाविशन् विषयान् अनुभवन्नयो ग्याल्मायोगी जीवः गुणदोषसंबंधेन न विषज्जेत सक्तो न भवेत्। नानादि
नानाधर्मेषु पार्थिवेषु पार्थिवेषु पृथिवीकार्येषु प्रविष्टः तद्गुणाश्रयः गुणैः सुखदुःखादिभिः॥४१॥ ॥रामगतीतोहारी॥ ॥
जन्मदुःखादिदेहधर्माश्रयः ३० नाम

परमात्मनः
संगम

अंतर्यामित्वेन नभसः शिक्षितमाह। अंतरिति मुनिर्वितितस्य व्याप्तस्य आत्मनः नभस्त्वं अव्यवच्छेदम् भेदम् असंगत्वं भावयेच्चिंतयेत् कुतः कथमतउक्तं। स्थिरजंग
चर। मेष्विति स्थिरजंगमेषु चराचरात्मकेषु वस्तुषु अंतरात्मभावेन अणुत्वव्याप्त्या बहिर्ब्रह्मभावेन वृहत्वेन महत्वव्याप्त्या। इदं केन सिद्धं तत्राह समन्वयेने
निति। उपक्रमादितात्पर्ययुक्तप्रमाणेन ब्रह्मण आत्मभावेन ऐक्येनेत्यन्यथा व्याख्यानं जीवांतर्यामिको विष्णुः आत्मना समीरितः तस्य तु ब्रह्म
रूपत्वाद्धि रितं तस्तथैव च पश्येदाकाशवद्व्याप्तिमसंगत्वं च नित्यशक्ति प्रमाणविरुद्धं तस्मान्नांगीकर्तव्यः सोर्थ इति॥४२॥ असंगप्रकारमा
ने ह। तेजइति। यथा नभो वायुनेरितैर्मेघाद्यैर्न स्पृश्यते। तद्वत् तथा पुमान् परः पुरुषः कालसृष्टैः तेजोबन्नमयैर्गुणैर्विषयैर्न स्पृश्यतेत्यन्वयः। ४३

अंतर्बहिश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन। व्याप्त्याव्यवच्छेदम् असंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत्॥४२॥
व तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः। न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान्॥४३॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्य
स्तीर्थभूर्नृणां। मुनिः पुनात्यपां मित्रमीक्षणस्पर्शकीर्तनैः॥४४॥ ॥श्री॥ ॥

छ र अद्भ्यः शिक्षितां बुद्धिमाह स्वच्छ इति। तीर्थवत् गंगादिजलवत् प्रकृतितः स्वभावतः स्वच्छः प्रकृतिः पंचभूतेषु च भावे मूलकारणं इत्यभिधानात् नतु जी
वस्य स्वच्छगुणत्वे जीवस्य योः को विशेष इति इत्याशंकां स्वच्छत्वादयो गुणा हरेः स्वतः सिद्धाः जीवस्य हरेः ख्यात्स्वीकर्तव्या इति परिहर्तव्या तदुक्तं
तत्वद्रष्टा गुणात् जीवस्य चेष्टव्यां न सिद्धा। विष्णोर्गुणांस्तथा। तत्र दृष्टवाविवी वीतष्टगेवसुधीसदेति माधुर्यसुखहेतुः मधु नाम सुखं विंद्यात्माधु थ
र्यं सुखहेतुतः सुखरतिर्वा संप्रोक्ता शब्देनैत्वे विचक्षणै इति वचनात्। मुनिः मित्रं स्वाश्रितं पुनाति इक्षणादिभिः स्वाश्रः॥ ॥४४॥ ॥श्री॥ ॥

प्यास

अग्नेः शिक्षितां बुद्धिमाह। तेजस्वीति तेजस्वी प्रभाववान् अन्यैरभिभवितुमशक्य इत्यर्थः। तपसा उपवासादिना अन्यसंताप हेतुत्वात् दीप्तः प्रकाशनशक्तिमान् दुर्द्ध
र्षः पराभावयितुमशक्यः पराभवो धर्षणं यावद्दत्तानम थापि वा। न तत्संग्रहं कुर्यात् इत्यर्थः शर्मनन्नवेति क्व नाम ते भाजनः दृग्त्रिषेध्यः युक्तात्मा
परमात्मनि सुक्तमनाः एवं विधो ज्ञानी सर्वभक्षोपि पापं नादत्ते अपरोक्षज्ञानिनोपि सर्वभक्षत्वे सर्वान्नानुमतिः प्राणात्यये इत्यादिदर्शनादिति सत्तादापद्धि दु
ष्ये कुथंअग्निवत्॥४५॥ क्वचिच्छन्नः दुष्टजनसन्निधौ क्वचित्स्पष्टः स्वजनसमीपे आत्मज्ञानादि लक्षणं श्रेयः इच्छतां पुंसां उपास्यः दातृणां प्रागुत्त त
रमशुभं दहन् सर्वत्र भुंक्ते सुभ्य युग्मः समभिदं॥४६॥ अग्नेः शिक्षितं परमात्मज्ञानमाह। स्वमायये ति मायया खेच्छा धीनप्रकृत्या सृष्टं सदसल्लक्षणं स्व
षं

ग्ना तेजस्वी तपसा दीप्तो दुर्द्धर्षोदरभाजनः। सर्वभक्षोपि युक्तात्मा नादत्ते पापमग्निवत्॥४५॥ क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रे
यइच्छतां। भुंक्ते सर्वत्र दातृणां दहन् प्रागुत्तराशुभं॥४६॥ स्वमायया सृष्टमिदं सदसल्लक्षणं विभुः। प्रविष्ट ईयते तत्तत्स्वरूपो
ग्निरिवैधसि॥४७॥ विसर्गाद्याः श्मशानान्ता भावा देहस्य नात्मनः। कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना॥४८॥

स्थूलसूक्ष्मरूपं जगत्प्रविष्टः सन् तत्तद्रूपः तत्तत्पदार्थानुगुणरूप ईयते। कथं एधसि प्रविष्टः धीरूपोग्निः इव अत्र जीवस्य च्छन्नत्वं परमात्मनः प्रवि
ष्टत्वं चेति विशेषणं ज्ञातव्यं। जीवस्य छन्नतां शिक्षेत प्रविष्टत्वं परमात्मनः। तन्न दुग्णविडर्वचवहैः सर्वमुथापि वेतिवचनात् अतस्तदीयो यथा
त्मा अग्निरेव मन अशरीरकाः दृश्यते परमात्मापि स्थूलास्थूल शरीरगः इति॥४७॥ चंद्रमसः शिक्षितो बुद्धिमाह। विसर्गाद्या इति। विविधाः
सर्गाद्याः श्मशानान्ताः मरणान्ता देहस्यैव नात्मनो जीवस्य चंद्रस्य कलानां क्षयादिकं यथा न चंद्ररूपस्य॥४८॥ ३८
राम

बालवत्तेवलं ज्ञानसंपादनाय किं न स्यात् इत्याशंक्य सत्यं नायं मनुष्यधर्मः किंतु तेषां धर्मो द्विविधप्रवर्तनमात्मतत्वविविक्षायां सत्यां चेत्याह। प्राय इति मानवाः प्र
स्मात्मतत्वविविक्षायां सत्यां चेह धर्मादिषु विषये समीहंते प्रवर्तंते आयुरादिप्राप्त्यैव हेतुना तत्प्राप्तिसाधनसामर्थ्येन॥२७॥ शक्त्यादिसाधनसामर्थ्यम
वाद्यमवस्थानमिति तत्राह। त्वं त्विति॥२९॥ स्पर्शविहीनस्य विषमभोगविहीनस्य केवलात्मनः शरीरमात्रमेव परिग्रहस्य॥३०॥ बुद्ध्युपाश्रिताः बु

प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः। हेतुनैव समीहंत आयुषो यशसः श्रियः॥२७॥ त्वं तु कल्पः कविर्दक्षः सुभगोमृतभाषणः।
दे नकर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत्॥२८॥ जनेषु दह्यमानेषु कामलोभदवाग्निना। न तप्यसेग्निना मुक्तो गंगांभस्थ इव द्विपः॥२९॥ त्वं हि नः
वतः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणं। ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः॥३०॥ श्रीभगवानुवाच। यदुनैवं महाभागो ब्रह्मण्येन सुमेध भ
सा पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः॥३१॥ ब्राह्मण उवाच। संति मे गुरवो राजन् बहवो बुद्ध्युपाश्रिताः। यतो बुद्धिमुपादाय मु
स ह क्तोटामीह तान्शृणु॥३२॥ पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः। कपोतोजगरः सिंधुः पतंगो मधुकृद्गजः॥३३॥ मधुहा हरि
णो मीनः पिंगला कुररोर्भकः। कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत्॥३४॥ एते मे गुरवो राजंश्चतुर्विंशतिराश्रिताः। शिक्षा वृत्तिभि
च रेतेषामन्वशिक्षमिहात्मनः॥३५॥ यतो यदनुशिक्षामि यथा वा नाहुषात्मज। तत्तथा पुरुषव्याघ्र निबोध कथयामि ते॥३६॥

मदीयबुध्यासंप्र
दिताः॥

ध्यासंगृहीताः यतो येभ्यः शिक्षा वृत्तिभिरुपादाय शरीराभिमानमुक्तः तान् गुरून् एतेषां पृथिव्यादीनां शिक्षा करणवृत्तिभिः॥३५॥
यतो यस्मात् पृथिव्यादेर्यद्वृत्तं शिक्षा मि शिक्षितं तत्तथा निबोध बोधेति परस्मैपदी॥३६॥
य नि

भा॰ए॰
३९

नकेवलं असंगत्वमेव सूर्यात् शिक्षितुमपि तु जीवपरमात्मवैलक्षण्यं चेति भावेनाह। बुद्धिसंस्थेनेति। तस्य जीवस्य शरीरतः आत्मा परमात्मा स्थूलमति-
भिः प्रमाणज्ञानरहितैः बुद्धिसंस्थेन भेदेन ग्राह्यांतःकरणविषयमिथ्याज्ञानेन व्यक्तं शरीरितस्थो जीववत् स्वसादृश्येन सुखी दुःखी तिलक्ष्यते दुःखाद्यधि-
क करणदेहगतत्वात्। कथं अंबुस्थितार्कवत्। यथा परमार्कस्वरूपानभिज्ञैः। बिंबभूतो जलप्रतिबिंबार्कवत् अचेतनः शिरःपादादिरहितो वर्तुलश्चेति
कल्प्यते तद्वदिति। तस्मात्तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीत्यादिश्रुतितात्पर्यवेदिभिर्निर्मलचित्तैः सूक्ष्मेक्षणैः जीवपरयोर्वै-

भेदेन
बुद्धिसंस्थेन योगेन व्यक्तस्थ इव तद्गतः॥ लक्ष्यते
भि स्थूलमतैरात्मा चांबुस्थितार्कवत्॥ ५१॥

योगिनी प्रवेतस्या वस्रयोगः। म लक्षण्यं जानद्भिः योगिभिः भाव्यमन्यथा तु रमतप्रवेशदृष्टिदृष्टीतिपथमेव ज्ञातव्यं। बिंबप्रतिबिंबयोरिव जीवपरयोर्भेदो व्यावहारिको न तु यथा-
र्थ इति तत्त्वं। बुद्धिसंस्थस्त्वात्मभेदो व्यक्तस्थो जीव उच्यते। तेनैव सह संस्थानात्परात्मा स्थूलबुद्धिभिः जीववल्लक्ष्यते विष्णुर्यथैवांबुस्थि- व
तार्कवत्। परमार्कः पारिमाण्याद्वर्तुलत्वादिना तथा। अर्कस्वरूपानभिज्ञैः शिरःपादादिवर्जितः। अचेतनश्च कल्प्यते तद्वत्तेजोमात्र-
दर्शिभिः स्वस्वदेहादिभिर्वर्हितेजोमंडलमेव तु दृश्यते स्थूलमतिरेवमेव जनार्दन इति प्रमाणविरुद्धत्वादुपेक्षणीयं॥ ५१॥ ३९
भि राम

पा
मुक्तिसाधनेषु प्रथमतः आद्यं विरक्तिलक्षणं साधनमिति कपोतशिक्षितं विरक्तिमाह। नातिस्नेह इति। स्नेहगुणितहृदयाविति तद्दर्शयति। दृष्टिमित्यादि

नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचित्। कुर्वन्विंदेत संतापं कपोत इव दीनधीः॥ ५२॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ। कपोत्या भार्यया सार्द्ध-
मुवास कतिचित्समाः॥ ५३॥ कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ। दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः॥ ५४॥ शय्यासनाटनस्थानवार्ता- ट
य क्रीडाशनादिषु। मिथुनीभूय विश्रब्धौ चेरतुर्वनराजिषु॥ ५५॥ यं यं वांछति सा राजन्तर्पयंत्यनुकंपितः। तं तं समानयत्कामं कृच्छ्रेणाप्यजितेंद्रि-
यः॥ ५६॥ कपोती प्रथमं गर्भं गृह्णती काल आगते। अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती॥ ५७॥ तेषु काले व्यजायंत रचितावयवा हरेः। श-
क्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः॥ ५८॥ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ। शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः॥ ५९॥ कू नि
तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः। प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः॥ ६०॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया॥
र विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः॥ ६१॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ। परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं॥ ६२॥
दृष्ट्वा तान्लुब्धकः कश्चिद्यदृच्छातो वनेचरः। जगृहे जालमातत्य चरतः स्वालयांतिके॥ ६३॥ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ॥
गतौ पोषणमादाय स्वनीडमुपजग्मतुः॥ ६४॥ कपोती स्वात्मजान्वीक्ष्य बालकाञ्जालसंवृतान्। तानभ्यधावत्क्रोशंती
क्रोशतो भृशदुःखिता॥ ६५॥

ना॥ ५२॥ शय्यासनादिषु मिथुनीभूय वर्तमानौ॥ ५५॥ ५६॥ ६५॥

भा.ए.
४

शिवापक्षिण्योद्विजातेन ॥६८॥७३॥ आरूढाद्गृहस्थात्च्युतंपतितं ॥७४॥ इत्येकादशविवरणेसप्तमोध्यायः ॥ ॥ नकेवलंमीहसेकिंविदितियद्राजन्नम्नपरि
हरन्नेतत्संसारसुखंयथादुःखवशिरस्कत्वेननाकांक्षेन्नसौध्यंवनथास्वर्गसुखमित्याह ।सुखमिति। यथैवेंद्रियकैसुखंयत्नेननिश्चय। स्वर्गेनरकेवास्ति दु

त्रिलि सोसकृत्स्नेहगुणितादीनचित्ताजमायया। स्वयंचाबध्यतशिवाबद्धान्पश्यंस्वपस्मृतिः ।६६। कपोतश्चात्मजान्बद्धानात्मनोप्यधिकप्रियां
न्। भार्यांचात्मसमांदीनोविललापातिदुःखितः ॥६७॥ अहोमेपश्यतापायमल्पपुण्यस्यदुर्मतेः। अतृप्तस्याकृतार्थस्यगृहस्त्रैवर्गिको
हतः ॥६८॥ अनुरूपानुकूलाचयस्यमेपतिदेवता। शून्येगृहेमांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः ॥६९॥ सोहंशून्येगृहेदीनोमृतदारोमृतप्र
जः ॥ जिजीविषेकिमर्थंवाविधुरोदुःखजीवितः ॥७०॥ तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः। स्वयंचकृपणःशिक्षुपश्यन्न
प्यबुधोपतत् ॥७१॥ तंलब्ध्वालुब्धकःक्रूरःकपोतंगृहमेधिनं। कपोतकान्कपोतींचसिद्धार्थःप्रययौगृहं ॥७२॥ एवंकुटुंब्यशांतात्माद्वंद्वारामःपत गद दु
न्न त्रिवत्। पुष्णन्कुटुंबंकृपणःसानुबंधोवसीदति ॥७३॥ यःप्राप्यमानुषंलोकंमुक्तिद्वारमपावृतं। गृहेषुखगवत्सक्तस्तमारूढच्युतंविदुः ॥७४॥ ॥ त
इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअवधूतगीतेसप्तमः ॥ ॥सुखमैंद्रियकंराजन्स्वर्गेनरकएवचादेहिनांयद्यथादुःखंतस्मान्नेच्छेत्तद्बुधः ॥१॥

तथाश्रोत्रादींद्रियविषयशब्दादिसुखंअस्त्येवेतियत्तस्माद्बुधोदुःखशिरस्कंसुखंनेच्छेत्कुतएवतत्साधनेप्रवर्त्तनमित्यन्वयःअनेनेंद्रियकसु
खायनप्रवर्तनीयमितिकिंवक्तव्यमित्युक्तंभवति ॥१॥

४०
नाम

कालवेगेनप्रतिक्षणमपिदेहादीनांसूक्ष्मावुत्पत्तिनाशौ नोक्तइतिसोदाहरणमाह। कालेति। कालाख्यनद्योघवेगेनभूतानांशालिनांआत्मनोदेहस्यनि
त्यावपिसदातनावपिप्रभवाप्ययोउत्पत्तिनाशौनदृश्येतेसूक्ष्मत्वादितिशेषः। यथाग्नेरर्चिषांज्वालानांप्रवाहविशेषः। यथापुरूरवसोजराग्निभ्यामेवदृश्येते
वचनंसदात्रप्रमाणं। भूतानांचेतनानामात्मनःपरमात्मनःप्रभवाप्ययावित्यन्यथाव्याख्यानेअवयवावयविनांचगुणगुणिनोस्तथाशक्तिशक्तिमतो
श्चैवक्रियायास्तद्वतस्तथा। स्वरूपांशांशिनोश्चैवनित्याभेदोजनार्दने। जीवस्वरूपेषुतथातथैवप्रकृतावपि। चिद्रूपायामतोनंशाश्चगुणाश्चक्रिया
तय इति। हीनाश्चवयवेश्चेतिकथ्यंतेतेनालभेदतः। पृथक्गुणाद्यभावाच्चनित्यत्वादुभयोरपि। विष्णोरचिंत्यशक्तेश्चसर्वंसंभवतिध्रुवं। क्रियादेरपिनित्यत्वंव्यक्ते
व्यक्तिविशेषणं। भावाभावविशेषेणव्यवहारस्थतादृशः। विशेषस्यविशिष्टस्यापभेदस्तद्वदेवतु। सर्वंचाचिंत्यशक्तित्वाद्युज्यतेपरमेश्वरे। तच्छक्त्यैवनजीवेषु

कालनद्योघवेगेनभूतानांप्रभवाप्ययौ। नित्यावपिनदृश्येतेआत्मनोग्नेयथार्चिषां ॥४९॥ गुणैर्गुणानुपादत्तेयथाकालंविमुंचति। नतेषुसज्ज
तेयोगीगोभिर्गाइवगोपतिः ॥५०॥

चिद्रूपप्रकृतावपि। भेदाभेदौतदन्यत्रह्युभयोरपिदर्शनात्। कार्यकारणयोश्चापिनिमित्तंकारणंविनेति। प्रमाणविरुद्धत्वाज्जडस्येत्यंगीकर्तव्यंअनंशा
व नांचैतेनानोक्रियात्वंचाचिंत्येशशक्तिनियतत्वाद्युज्यतइत्यभिप्रेत्यैआत्मनिदेवंविचित्राश्चहिसर्वेयितात्वतदृशीनात्सर्वधर्मोपपन्नेश्च। स्वाभाविकीज्ञान
बलक्रियाच। यत्रतस्मर्षान्यपरएकमाकुरित्यादिप्रमाणंतत्त्वंचनचेशशक्तिर्मायामयीविनादोषांश्रुतमह्यवगम्यतथास्मृतंपरमेसत्पुरुषे। नेवारत्यर्थकिंचिद धु
स्मिन्परेशोसर्वंयुक्तंपूर्णशक्तेःसदैवेतिश्रुतिविरोधात् ॥४९॥ स्वर्गादनुशिक्षितांबुद्धिमाह। गुणैरिति। योगीयथाकालंविहितकालेगुणैरिंद्रियैःगुणा
न्शब्दादिविषयान्उपादत्तेविमुंचतिचातेषुविषयेषुनसज्जतेनातिशक्तोभवति। कथमिवगोपतिःसूर्यःगोभिरश्मिभिःगाइवजलानीव ॥५०॥ ॥

भा० ४२

समृद्धकामः समृद्धा भीष्टार्थः। नोत्सर्प्येत उत्सिक्तो न भवेत्। हीनो वा द्रव्यैर् इति शेषः। न शुष्येत यथा प्रावृषि समुद्रः समृद्धजलाभिः ग्रीष्मे शुष्कजलाभिस्स
रिद्भिः॥६॥ शलभाच्छिक्षितां बुद्धिमाह दृष्ट्वेति। देवस्य मायां मोहकशक्तिं। भावैः शृंगारचेष्टाभिः। अत्र महतां वनिताकामः पतनं धत्ते तमस्युल्वणं। अन्यत्र
व निरूपयन्ति दुःखवान् ऊर्ध्वं हि पर्यय इति वचनात्। अथ यते विशेषोऽस्तीति ज्ञातव्यं। मायाशब्दस्येन्द्रजालार्थमंतरेण मोहकारणत्वार्थः कथमित्यत
याचि श्चोद्यं मोहकारणभूतां तु मायेत्याहुर्मनीषिणः। अविद्यमानं मेत्युक्तेन तत्र ज्ञापयतीति वक्तव्यं। कुत्रचिज्ज्ञानरूपं सत्प्रभरूपं च ... एषचे मयं ज्ञानं बुद्धि
ष्टमायास्यात् वधुरित्यपीत्यनेन परिहर्तव्यं। तस्माद्यायाविवक्षितानां तामनुसृत्यार्थो वक्तव्य इति ज्ञायते। ननु मा तर्हि मायाशब्दस्यानेकार्थत्वं इति वा

समृद्धकामो हीनो वा नारायणपरो मुनिः। नोत्सर्प्येत न शुष्येत सरिद्भिरिव सागरः॥६॥
दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः। प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत्॥७॥

कुत्र मुख्यार्थ इतीयं शंका। स्वतंत्रं परमार्थो रूपं स्वनंतैकाहुरे मतिः। सैव माया समुद्दिष्टा मुख्यतस्तत्स्वरूपिका। इत्यनेन परिहर्तव्यं। पारमार्थे निष्टस्य
स्वतंत्रशब्दस्य गुणनिष्टत्वं कथमित्येतत्। भृतिमन्यति भेदोपि न विष्ण्योः क्वचिदिष्यते इत्यनेन परिहर्तं। मायापार्श्वोच्चावधि जगत्तन्मयत्वं ते
कथनं कथमपि दुर्दमपि। पारमार्थ्येन नास्त्येव तदन्यत्तद्दृशं यतः। जनाद्यनंतकालेपि विद्यमानमपि कीर्त्यं। अतो मायामयं प्राहुः सर्वं तद्दृशग धु
यतः श्रुतिश्च सुनापरिहर्तं। किं च विश्वस्य पराधीनत्वात् अस्तद् दादि शब्दवाच्यत्वं नित्यविद्यमानत्वात् न हि जगन्नास्त्येवेति कथं अस्वतंत्रत्वादित्युक्तं
प्रवाहरूपेणानित्यत्वात् सदातनत्वं युक्तं। श्रोतत्वाद्विश्वस्य मिथ्यात्वं किं न स्यादिति चेत्। न हरेरिच्छाधीनत्वात् मायामात्रत्वात्॥७॥ ॥७॥ राम ४२

तर्हि श्रुतेः का गतिरिति चेत्। न परस्यैव परमार्थत्वात् सत्त्वं प्रमाणसिद्धं। स्वाधीनं सदिति प्रोक्तं पराधीनमसत्स्मृतं। अविद्यमानमेतस्माज्जगदाहुर्विपश्चितः। अनाद्य
नंतकालेषु विद्यमानमपि ध्रुवं। अस्वातंत्र्यात्तु नास्त्येवेत्येवं वाच्यं जगत्सदा। सदाद्यैर्नैव विद्यमानमिति श्रुत्याद्यादि क्वचित्। तथापि नाप्रवृद्धिः प्रवाहात्तु घटस्य नित्यता।
व अतो निर्दोषमित्याद्युः प्रपंचोऽस्तीत्ययुक्तिः। यद्यपि विष्णोरिच्छावशत्वाच्च मायामात्रमिति स्फुटं। परमार्थेन तैकमेव स्वातंत्र्याद्धि विष्णुमयं। यदि कल्प्यते दोषः सत्यप्र
त पंचनिवर्तयेत्। विष्णुस्तस्मादृश्यत्वान्नास्तीति हेतुमुच्यते। स्वातंत्र्येण हरेरेव ज्ञानेपराधीनत्वान्निस्ता स्याद्। इत्याद्युपदेष्टारः आचार्यास्तत्त्ववेदिनः। यु
धेरराजन्निहाते नान्योऽस्तीति स्फुटं वचः। स्वातंत्र्यात्पारतंत्र्यात्तु तद्भूत्यादिषु सत्स्वपि। पृथ्व्येव सर्वेषां प्राधान्याद्विहितीयो हरिः स्मृतः। एवं मुक्तावितानंति
तापुत्रंषापिताविभोः। अनंतकाले पश्यंतो जगदेतद्वशावरं। तस्यैकस्य प्रविज्ञानात् केवलं भ्रांतिरूपकं। जगद्युक्तातमायां तु तद्विशितव्येशशापनहीति। अनेन
धे प्रपंचो यदि विद्येत निवर्तेत न संशय इति श्रुतिरपि विवृतासत्यत्वार्थे पुत्रानये यदि विद्येतेमरिष्यंत्येव ते ध्रुवं परिरक्ष्य करोत्येव न श्यंत्येव न संशयमिति धृतराष्ट्रस्य
वचने पदिशब्दस्य विपर्ययपर्यवसानेन वस्तुत्वार्थः प्रतीयते तथात्रापि। यदि शब्दस्य वस्तुत्वेऽपि अस्वातंत्र्येव संशये। अवस्तुशब्दस्य शक्ति स्म
शक्तो न करिष्यते। इत्यनेन यदिशब्दस्यावस्तुत्वार्थोऽपि ज्ञायते॥७॥ श्रीरामजयरामजयजयराम॥ राम गतीतोहारी॥ गंगायै नमः॥

भा॰ए
४२

द्व

प्रागुक्तस्तोकार्थमेव विवृणोति। सोपिहितिहि मायारचितेषु भोगसाधनेषु तस्मादिष्वपि ज्ञानेषु भोगबुध्या विषयभोगसाधनबुध्या पतलो भि
तस्मा विवशमनाः फलं नश्यतीत्यर्थः॥८॥ मधुकरशिक्षितं मतिमुपदिशति स्तोकमिति। मधुकरस्य वृत्तिमाधुकरीं समातिष्ठेत् मुनिर्गृहानहिंसन्नित्यन्वयः
॥९॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः सारं भगवद्भक्तिज्ञानं भिक्षु॥१०॥ भिक्षितं भिक्षयाप्राप्तमन्नं सायन्तनं सायंतनार्थं श्वस्तनं श्वस्तनार्थं च न ते
संगृह्णीत। कथं तर्हि भोजनमत्राह पाणीति। पाणिपात्रत्वेनोदरं मत्रत्वेन वा भुंजानइति शेषः। संग्रहे कोदोष इत्यत्राह। मक्षिकाइति तेन धनेन सह

यो षित्तु तल्लाभरणाम्बरादि द्रव्येषु मायारचितेषु सदृ॥ प्रलोभितात्माह्युपभोगबुध्या पतङ्गवन्नश्यति नष्टदृष्टिः॥८॥ स्तोकं स्तोकं ग्रसेद्ग्रा
सं देहो वर्तेत यावता। गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः॥९॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव ष
ट्पदः॥१०॥ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितं। पाणिपात्रोदरामत्रो मक्षिकेव न संग्रही॥११॥ मक्षिका इव संगृह्णन्सह तेन विनश्यति सदा आर्क
पि युवतीं भिक्षुर्न स्पृशेद्दारवीमपि॥१२॥ स्पृशन्करीव बध्येत करिण्या अंगसंगतः॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः॥१३॥ बलाधिकैः
जौ स हन्येत गजैरन्यैर्गजो यथा॥ न देयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं। भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु॥१४॥ सुदुःखोपार्जितैर्वित्तैराशासानां
गृहाशिषः॥ मधुहेवाग्रतो भुंक्ते यतिर्वै गृहमेधिनां॥१५॥

विनश्यति चोरादिनेति शेषः॥११॥ गजशिक्षितमुपाक्रमत्राह। पदेति। करिण्या अंगसंगतः स्पृशन्करीव बध्यते॥१२॥ एतदेव विवृणोति नाधिगच्छेदिति॥१३॥
मधुहन्तापि काद्युद्भिशिक्षितमाह नदेयमिति। लुब्धैर्यद्दुःखेन संचितं न देयं दानयोग्यं। नोपभोग्यं नोपभोग्यं च तत्सर्वं वित्तमर्थविद्भिन्यो भुंक्ते। कथ
मिव मकरन्दं न संग्रहीमधुवत्। किमनेनालमित्यत्राह। सुदुःखेति यतिर्निर्जितेन्द्रियग्रामः॥१५॥

ध्र

४२
राम

कृ
न हि देहयात्रा कथंकारं वर्तते त्यतो जगराद्युपात्तबुद्धिमाह ग्रासमिति। दिष्टेन दैवेन देवं दिष्टं भागधेयमित्यभिधानं। ग्रासस्तु कवलः ध्रतेति च। विरसं दत्तं पद
यैवापतितं अतार्कितत्वेनोपपन्नं। अक्रियः प्रयत्नरहितः अजगरो यथा ग्रसेत्तथा मुनिरिति शेषः॥२॥ ननु यदृच्छया पिपासा सो भवेत् किं कुर्यात्तत्राह
शयीतेति। अनुपक्रमः क्रियारंभरहितः यदि यदृच्छया पिपासो नोपनमेत्तर्हि महाहिरिव दिष्टं भुक्त्वा निद्रालुस्तत्र निमित्तं दिष्टं भुक्तिगतित्यदृ
च्छाशक्त्याशनत्वादित्यर्थः॥३॥ ननु तर्हि अन्नबलस्य देहस्य यात्राभावे पतनं स्यादित्याशंक्य सत्त्वं वहिर्मुखस्यैतत्र योगारूढः शरीरयात्रा स्य

ग्रासं सुमृष्टं विरसं महान्तं स्तोकमेव वा॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः॥२॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः॥
३४ यदि नोपनमेद्ग्रासो महाहिरिव दिष्टभुक्॥३॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकं॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवान ते
पि॥४॥ मुनिः प्रसन्नगम्भीरो दुर्विगाह्यो दुरत्ययः॥ अनन्तपारो ह्यक्षोभ्यः स्तिमितोद इवार्णवः॥५॥ ॥श्री॥ ॥

तस्य भगवद्गुणगणामृतध्यानलक्षणपानपूर्णे बले देहलादिति भावेनाह ओज इति। करचरणादीन्द्रियशक्तिमानपि योगारूढः शरीरयात्रार्थं
नेहेत न चेष्टेत। कीदृशः शयानः सर्वेषु रतिशून्यः तर्हि निद्रालुः स्यादिति तत्राह वीतनिद्र इति। निद्रा निरासस्यापासनसङ्गाभावादित्याह। विशृंदिति
आत्मभरणे न ध्यानलक्ष्यति। ओजः सह इबलात्मना बलेनायुतं देहं बिभ्रत् ध्यायेन्न अन्यत्र तादृशादृष्टेनेति मितं दृशोपलक्षितेऽपि वा हि त्यर्थः॥
अत एवाकर्मको नेहेत इद्धेश्वर हितं वा॥४॥ समुद्रशिक्षितमतिमाह मुनिरिति। अनन्तपारः अन्तपाररहितबुद्धिः अनन्तेनपारः इति
तिलसम्णायस्यसंतथेति वा। पारं तीरान्तरं जोक्षपारः सत्यापुमानित्यभिधानं। अन्यत्र निश्चिततीरान्तरः स्तिमितोदो निश्चलजलः निर्विकल्पकर्मा वा॥५॥
तें

भा॰ए॰
४२

चिंतायाः छेदनेहेतिः कथा।

निराशयाविज्ञातितस्याया चिंतायाः छेदनेनेति॥२६॥ यथागीतं तथा तत्तै भोमसकाशाच्छृणु॥२७॥ श्रोतव्यत्वे हेतुमाह। निर्वेद इति। यथा निशितो असिः पाशा
नां छेदने हेतुर्विहितस्तथा निर्वेदस्तत्स्याल्लक्षणपाशानां हियस्मात्तस्मात् अपि हेत्वन्तरमाह। नहीति॥२८॥ क्षितिविस्तारः बालिशायेन तस्मात्॥२९॥
म कथं बालिशेत्यत आह। संतमिति। नित्यमविनाशनं॥३०॥ आत्मनः। अतिगर्ह्या वृत्तिर्वर्तिर्यस्याः सा तथा तया सांकेतस्य मवैसांकेत्यं द्रव्यं तेन वृत्तिराजी आ॥वि॥ निं॥दि॥

तस्या विज्ञाशयासुख्यहं कायादीन् वेत्तसः। निर्वेदः परमो जज्ञे चिंताहेतिः सुखावहः॥२६॥ तथा निर्विण्णचित्तायागीतं शृणु यथा मम। निर्वे
द आशापाशानां पुरुषस्य यथा ह्यसिः॥ न ह्यंगाजातनिर्वेदो देहबंधं जिहासति। पिंगलोवाच। अहो मे मोहवितर्ति पश्यताविजितात्मनः॥२८॥
या कांतादसतः कामं कामये येन बालिशा। संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यमिमं विहाय। अकामदं दुःखभयाधिशोकमोहप्रदं तुच्छ
महं भजेज्ञा॥३०॥ अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया। स्त्रैणान्नराद्यार्थतृषोनुशोच्यात्क्रीतेन वित्तं र
तिमात्मनेच्छती॥३१॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं। क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या॥३२॥

कां विकातथा यथाहं वित्तमुद्दिश्य आत्मना देहेन जघ्येत्ववाविषयतृष्णया। अनुशोच्यान्क्रैणा नराद्क्रीत्वा रतिमिच्छत्यासंतत्वेतिशेषः
॥३२॥ यदर्थं यास्य मोक्षस्तितदीदृशं हीत्याह। यदिति। वरो मनस्वेस्त्यिकं पदं। स्थूणास्तंभाः मदन्या कीदृशी एतद्देहाख्यमगारं स्वहृ मुपैतीत्यन्व
य: वंशादीर्घतरस्तुत्विशषाः वश्यावंशप्रातातिरस्थी नेवेणवृक्षास्तूरंतिस्तवंतिनवद्वारापिधिस्वसतत्रया। अनेनान्यकांतानां हेयत्वमुक्तं स्व
भवतीति॥३२॥
४२
ना१

स्व इतोपि हेयादितिभावेनाह। विदेहानामिति। स्वस्मात् स्वकीयात् स्वस्वामिन इत्यर्थः। अतो जातो अतो न्यस्माद्व्यभिचारादित्यर्थः। अनिवेधे पुमान् निच्छाविति
यादवः यद्यस्मात्त्वमेव मनोवृत्तिप्रेरकत्वेन प्रसिद्धात्॥३३॥ सोयं सुहृत् प्रेष्ठानां प्रेष्ठः। नीयते ऐश्वर्यं प्रवर्तत इति नाथः। शरीरिणामात्मा नियंतायतमात्म
नामनतेवा विक्रीयानेनाच्युतेन सह स्वयं पिंगलानामान्यावेश्मानभवतिकिंतु विशिष्टा स्वरस्येका। अन्यथा स्यानेतादृश्यवुद्धिरुसंघते। तदुक्तं। भग
वद्भावेतायोग्याः काश्चिद्दक्षरस्त्रियः रमावेशात्करावित्युक्ताखेकापिंगला भवद्वात्तदन्यासांमहादोषो भगवद्भक्तेनास्मृतेरिति॥३४॥ लोकसि

म
विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः। यान्यमिच्छंत्यसत्यस्मादात्मदात्काममच्युतात्॥३३॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां। तं वि
क्रीयात्मनैवाहं रमेऽनेन यथा रमा॥३४॥ किं प्रियं ते व्यभजन् कांता मे कामदा नराः। आद्यंतवंतो भार्याया देवा वा कालविद्रुताः॥३५॥ नू
नं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा। निर्वेदोयं दुराशाया यन्मे जातः सुखावहः॥३६॥ मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः।
येनानुबंधं निर्हृत्य पुरुषः शममृच्छति॥३७॥

हृकांतत्यागे वोक विलक्षणकांतस्वीकारे अलं बुद्धिगोचरकामादात्त्वमाद्यंतवत्त्वं निमित्तमित्याह। कियदिति। ते नरा भार्याया मे कियत्प्रि
यं व्यभजन् विभजेयुरित्यन्वयः। तर्हि देवाः कांताः संतीत्यत्राह। देवा इति॥३५॥ विषयबंधन विध्वंसिनि भगवत्प्रसंगे किममुलभमिति भावेनाह।
नूनमिति। नूनं मे इदानी॥३६॥ समुद्भूतभक्तभगवद्भक्तिसुधा पिंगला पुनः शरादि विविक्त्य निमित्तक्लेशान् क्लेशं त्रिति प्रायुच्यते मैवमिति।
येन निर्वेदेन संसारबंधानिर्हृत्य परिहृत्य परं भगवन्निष्ठालभ्यं सच्चिदानंदलक्षणं सर्वविलक्षणं ब्रह्म प्राप्नोति स्यचयः। कुतो मा भूवन्नित्यत
आह। येनेति। पुरुषोनुबंधं भगवद्भक्तिं निहत्य भस्म कृत्वा शमं शाम्यं सुखोपरमं नरकरूपं छति। तिएतस्मादिति शेषः॥३७॥
म

भा॰ए॰
५४

त त्रिशमाह। तेनेति। तेन हरिणा उपकृतमनुगृहीतं निर्वेदं शिरसादाय ग्राम्यसंगतां दुराशां त्यक्त्वा। ॥३८॥ ...ध्याना।३९। अस्मादृगः
कः आत्मानं त्रातुं मुषितेक्षणं नष्टज्ञानं ॥४०॥ आत्मनः स्वस्य गोप्ता आत्मा परमात्मैव। यदाखिलान्निर्विद्येत तदेतज्जगत्कालाहिनाग्रस्तं पश्येत्॥४१॥
कांततर्षजा कांततृष्णाजाता॥४२॥ इममितिहासं श्रद्धापयति अश्रौषीत्॥४३॥ इत्येकादशे विवरणे अष्टमः॥ ॥तिरश्चीनकुरराख्यखगा ते

तेनोपकृतमादाय शिरसा ग्राम्यसंगताः। त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं॥३८॥ संतुष्टा श्रद्दधत्येतद्यथालाभेन जीवती। विहराम्यमु-
नैवाहमात्मना रमणेन वै॥३९॥ संसारकूपे पतितं विषयैर्मुषितेक्षणं। ग्रस्तं कालाहिनात्मानं कोऽन्यस्त्रातुमधीश्वरः॥४०॥ आत्मैव ह्यात्मनो गो-
प्ता निर्विद्येत यदाखिलात्। अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत्॥४१॥ ब्राह्मण उवाच। एवं व्यवसितमतिर्दुराशां कांततर्षजां। छित्त्वोपशम-
मास्थाय शय्यामुपविवेश सा॥४२॥ आशा हि परमं दुःखं नैराश्यं परमं सुखं। यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला॥४३॥ ॥
श्रीभागवते म॰ एकादशस्कंधे पिंगलगीति अष्टमोऽध्यायः॥ ॥ब्राह्मण उवाच। परिग्रहो हि दुःखाय यद्यत्प्रियतमं नृणां। अनंतं
सुखमाप्नोति तद्विद्वान्यस्त्वकिंचनः॥१॥ सामिषं कुररं जघ्नुर्बलिनोऽन्ये निरामिषाः। तदामिषं परित्यज्य स सुखं समविंदत॥२॥
न मे मानापमानौ स्तो न चिंता गेहपुत्रिणां। आत्मक्रीड आत्मरतिर्विचरामीह बालवत्॥३॥

किं विशिष्टं ज्ञानं शिक्षितमत्राह। परिग्रह इति। नृणां प्रियतमं यद्यद्वस्तु तत्तस्य परिग्रहः तस्य चिंतयां ततो न ...दुःखाय भवति। ततः किं फलि-
तमत्राह। अनंतमिति। तत्तस्मात् यो विद्वान् सोऽकिंचनो भवेत्॥१॥ इममर्थं विचित्री करोति सामिषमिति॥२॥ तज्ज्ञानफलमाह। न मे इति। इह पुत्रवतां या
चिंतैषणादिचिंता सापि नास्ति॥३॥
बालकाच्छिक्षितां मतिमाह। ४४ राम

हरिणाद्भोगेंद्रियजयो न कर्तव्य इत्याह। ग्राम्येति। अहं वनचरो यति ग्राम्याणां गीतं स्त्रीगीतं न शृणुयां ...हरिणाच्छिक्षेत कीदृशात् मृगयोर्गीतमोहितात् तेन बद्धात्
॥१६॥ ग्राम्यगीतस्य श्रवणे का हानिरित्यत आह। नृत्येति। क्रीडनकोऽधः क्रीडासाधनवद्वशः॥१७॥ मत्स्याज्जिह्वेंद्रियजयप्रकारं शिक्षयति। जिह्वयेति। असद्बुद्धिरलब्धः
॥१८॥ रसनजयो दुष्कर इत्युपपादयति इंद्रियाणीति। रसनं रसनेंद्रियं तस्य रसस्य विषये वर्द्धते॥१९॥ जितेंद्रियजयस्य ...इंद्रियजयो ते।

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित्। शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात्॥१६॥ नृत्यवादित्रगीतानि जुषन्ग्राम्याणि योषितां। आसां क्री-
डनको वश्यः स्यादृष्यशृंगो मुनिर्यथा॥१७॥ जिह्वयातिप्रमाथिन्या जनो रसविमोहितः। मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा॥१८॥ इंद्रियाणि जयंत्याशु रौ
निराहारा मनीषिणः। वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते॥१९॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान्। न जयेद्रसनं यावज्जितं सर्वं जिते रसे॥२०॥ ता
पिंगला नाम वेश्यासीद्विदेहनगरे पुरा। तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन॥२१॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती। अभूत्काले बहिर्द्वा-
रि बिभ्रती रूपमुत्तमं॥२२॥ मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ। तान् शुल्कदान् वित्तवतः कांतान्मेनेऽर्थकामुका॥२३॥ आगतेष्वपयातेषु सा संके-
तोपजीविनी। अप्यन्यो वित्तवान्कोऽपि मामुपैष्यति भूरिदः॥२४॥ एवं दुराशया ध्वस्तनिद्रा द्वार्यवलंबती। निर्गच्छंती प्रविशती निशीथं समपद्यत॥२५॥

नान्यदित्याह। तावदिति। रसो रागः रसे रागे विषये जिते सर्वं जितमित्यादयः॥२०॥ पिंगलाया वैराग्यमुपशिक्षितमिति वक्तुमुपक्रमते। पिंगलेति॥२१॥ सैक-
दा संकेते विलाससमये कांतमुपनेष्यती आत्मसमीपं प्रापयंती गृहद्वारे स्थितेत्यन्वयः॥२२॥ मार्गे आगच्छतः पुरुषान् वीक्ष्य ते पुंसु ये तान् वित्तवतः शुल्-
कदान् कांतान् मेने॥२३॥ अस्मादन्यो भूरिदो बहुद्रव्यप्रदः स्यादिति मत्वा॥२४॥२५॥

दृष्टकाराद्धि। स्थितबुद्धिप्रकारमाह। मन इत्यादिना। एकत्र परमात्मनि ब्रह्मणि।।११।। मनो येन जेनेनाकिं फलं ये नावश्यं कर्तव्यं स्यात् अत आह
२ यस्मिन्निति। यन्मनो दुष्कर्मरेणून् मुंचति। तद्वा सुखचिन्मनो निर्वाणं नाशमुपैति। कथं भूतं निरिंधनं ज्योतिरिवेति। सुखोपमं। बाह्यं मनो विलीनं
स्यात् मुक्तौ चिन्मात्रकं मनः तेने वानुभवेत् सर्वस्वात्मा भिन्नेन मुक्तिर्गमं इति वचनात्। बाह्यमेवनष्ट्यं तेन चिन्मात्रं तन्नाशे विषयानुभवो किं त्वि
नुध्येतेति।।१२।। अथ चिन्मनोनाशानंतरं किं मनसा ध्यानप्रकारमाह। तदेवमिति।।१३।। अनिकेत निलयन एकलेनक्तसंचरणं दुःखदेतु कर्म

मनएकत्रसंयुंज्याज्जितश्वासो जितासनः। वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः।।११।। यस्मिन्मनो लब्धपदं यदेतच्छनैः शनैर्मुंचतिकर्मरेणून्। सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनं।।१२।। तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा। यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे।।१३।। एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः। अलक्ष्यमाण आचारैर्मुनिरेकोऽल्पभाषणः।।१४।। गृहारंभो हि दुःखाय विफलश्चाध्रुवात्मनः। सर्पः परकृतं वेश्म प्रविश्य सुखमेधते।।१५।।

नारंभश्च सर्पाच्छिक्षितमित्याह। एकचारीति। अत्र एकचारित्वादिकं विधेयं न तु विशेषणं। गुहायां हृत्कमलमध्ये गुहायां पर्वते
तायां आशयो अंतःकरणं यस्य सतथा। निरंतरं भगवदुपासनापर इत्यर्थः। अल्पेनाशनादिनातोषणं तस्मिंस्तस्य सतथा।।१४।।
अध्रुवात्मनः अनित्यदेहस्य जीवस्य। अत्र लोभोपमामाह। सर्प इति। अनेन निवासोपायोपि दर्शित इति।।१५।।

४५
राम

(१) गुणैनानेरूपं शिक्षितमाह एक इति। एकः केवलं निरपेक्षः नारायणो देवः स्वमायया स्वेच्छया। कल्पांते कालकलया संहारकांशेन पूर्वसृष्टमिदं जगत् संहृत्य एकत्वसंख्या
विशिष्ट अभूत्। कालादीनां तदासत्वात्। कथमिदमुपपद्यते इति तत्राह। अद्वितीय इति। द्वितीयोऽन्यो नास्ति। त्येवोच्यते न तु सर्वात्मनासर्वनिषेधेन तत्सतिसर्वस्य था
तेनैक्यउपपत्रं स्यादत्र वर्तयुक्तिकृतौ आह। अखिलाश्रय इति। न ह्याधाराधेययोरेकत्वं क्वापि दृष्टचरं। न चैतद्दृष्टांतेनुपाधारांतरस्याभावस्य दत्राह। आत्माधा
र इति। नन्वेतद्युक्तिविरुद्धमत्राह। ईश्वर इति। एतदेन विवृणोति। कालेनेति। आत्मनः स्वस्यानुभावेन तत्रकाले वितृष्णस्यादिभावस्वरूपेण कालेन तदं ने
तयामिणासत्वादिगुणवाच्यासु शक्तिषु साम्यं साम्यावस्थां नीतासु सतीषु प्रधानपुरुषयोरीश्वर स्वयारीश्वर आदिपुरुषः परावरा

एकोनारायणोदेवः पूर्वसृष्टं स्वमायया। संहृत्य कालकलया कल्पांत इदमीश्वरः।।१६।। एक एवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः। कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु।।१७।। सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः। परावराणां परम आस्ते कैवल्यसंज्ञितः।।१८।। केवलानुभवानंदसंदोहो निरुपाधिकः। कालेनात्मानुभावेन स्वमायां त्रिगुणात्मिकां। संक्षोभयन्सृजत्यादौ तयासूत्रमरिंदम।।१९।।

शक्तिविषयत्वादशक्तित्वात्। एषां कार्यकारणानां परमो व्यापार मंतरेण आस्ते। तदा किंनामेत्यत्राह। कैवल्येति। तमाधिकरोति इति सत्वादिगुणानां शक्तिशब्दवाच्यत्वे किं प्रमाणमिलेत
ब्रोग्यं प्रकृतिश्च गुणाश्च वशवर्त्यत्वाच्छक्तयस्तताः विष्णोः स्वरूपभूता स्तुरूपे कटाक्षशक्तिरुच्यतत्वनेनपरिहृतं ज्ञातव्यं। कालप्रकटत्वादिप्रवर्तनेनोदासीनत्वा मिति
दक्षिणापायेणेक इति वा पुनरुक्तं। कालप्रकृतिजीवेषोऽलयेसत्वप्रवर्तनात्। तन्निमित्तस्य कार्यस्य विष्णुरेक इतीयते। सद्धिकालादिकं सर्वं वर्तते यत्समित
श्रुतिरिति वचनात्।।१६।१७।।१८।। संहारप्रकारमुक्त्वा तस्मात् सृष्टिप्रकारमाह। केवलेति। निरुपाधिकोजडदेह इति तत्कालेन कालांतर्यामिणा।
आत्मनः स्वस्मात् अनुभावो जन्मव्यक्तिर्यस्य स तथा तेन स्वमायां स्वाधीनप्रकृतिं संक्षोभयंस्तस्य पिसृष्टिं कुर्वन् तया प्रकृत्या सूत्रं प्रथमं ब्रह्मा
एवं सृजति।।१९।।

नो
स्वमायया सृष्टं स्वरूपमाह। तामिति। विश्वतोमुखं सर्वतो दिक्षु यथा मुखं भवति तथा सृजंती। यस्मिन् प्रकृतिस्वरूपेपेन प्रधानेन प्रलीनो क्लिष्टीनः संसारमेती तिश्रुतिः कोल
न सह्यु परितिन नेना बना सा पेक्षत्वं आत्मानुभावेना ख सामर्थ्येने तिया। २१ अत्रोदाहरति यथेति। ऊर्णा हृदयं वक्त्रतो मुखेन। संतत्य विस्तृत्य यथायथे २१॥ २१॥ ष्टं
पेशस्कृतः शिक्षितां बुद्धिमाह यत्रेति दिही यत्र यत्र स्नेह संक्लिन्न धियो मनो धारयेत् तत्तत्स्वरूपतां न स्यतत्स्य सदृश रूपतां याति। अत्रेदं तात्पर्यं। स्निग्ध यादि
याध्याय तिचेत् स्निग्ध रूपं सुखरूपं याति। द्वेषध्यिया चिंतयति चेत् द्वेषरूपं दुःखरूपं याती त्यादि योज्यं। तदुक्तं भयादपि हरिं स्मृत्वा चिंतयेत्स तत्स्वरूपतां पे
शस्कृद्विदायाति द्विषद्वेषरवस्तलांइति। द्विषजी ना विविधा लोः सुखरूपस्यापि हरेर्द्वेष्यस्य दुःखरूपत्वात्तत्स्वरूपतां यातीति युक्तं सुखरूपस्य वि

तमाद्गुणव्यक्तिं सृजंती विश्वतोमुखं। यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान्॥ २०॥ यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः। तया
विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः॥ २१॥ यत्र यत्र मनो देही धारयेत्सकलं धिया। स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्सरूपतां॥ २२॥ स

द्वेषो दुःखरूपस्तीयेते। तस्माद्दुर्सद्वया तिद्वेषवांत् पुरुषो न मदतिव रावणादीनां रामात् द्वेषात्ति दुःखानंद भगवत्स्वरूपप्राप्तुक्या सुखवासिश्रु
तः कागतिरिति चेद् उच्यते तत्र रक्षोरूपादिनां द्वेषात् दुःखावाप्ति जयादीनां भक्त स्वंपू पुर्वेनसुखाव गतिः नृसिंह द्वेषतो दुःखरक्षोरूपेण रावणा अ रू
गा झरामविद्वेषाच्छिशुपालस्तथैवच ततो भक्त्या परं याता द्वेषरूपान्न मो गतिरिति। तस्मात् सत्वगुणोद्रेकि विद्वेषात्तस्वेदोषवान् भवेदिति सरूपत्वं
द्वेषादेः पुरुषस्य मैत्रेरही। तिमानात् यथोपासनं फलानवाप्तो श्रुतिव्याकोपश्च स्यात्। तं यथा यथोपासते तदेव भवतीति। तैः भूतिरितिदेवाउ
पासां व क्रितेवभे वुस्तस्माज्जो बद्यते तर्हिंशुन्नो भूर्भूरिस्वि प्रश्नसित्यश्रुतिरिस्सिसुरास्ते हपरावभूवुरित्यादिश्रुतेः॥ ॥२२॥ ॥७॥ ५

७६
शिव

खं
श्रे
ननु तर्हि कीटस्य चिंता नास्तीत्यत्राह। द्वाविति। गुणेभ्यः सत्वादिभ्यः पहोक्लसम्पूर्णं ईश्वरं गतो ज्ञातः स्मात्मिगुणात्मत मनुस्मरन्नित्यर्थः॥ ७॥ कुमा
र्याः शिक्षितज्ञानमाह। क्वचिदिति। त्वरणेवानाश्वरणेवुंत्र अर्हणमभ्यागतपूजनं॥ ५॥ शालीन् कुंडमानदृष्टदविवी हि कुड्येन पाषाणे। शाल्यमः कूल ८८
माद्याद्यपरिष्टकार्यं पुंस्यमत्यमरः। यथा महत्परिमाणं भवति तथा चकुरितिक्रिया विशेषणं॥ ६॥ महती विवाहोक्त वर्तमानत योग्येत्यर्थः।

ह्येवं चिंतयामुक्तोपरमानंद माप्नुतो। योविमुग्धो जडो बालो योगुणेभ्यः परं गतः॥ ४॥ क्वचित्कुमारी त्वात्मानं वृणानान्गृहमागतान्। स्वयं
तानर्हयामास क्वापि यातेषु बंधुषु॥ ५॥ तेषामभ्यवहारार्थं शालीन्रहसि पार्थिव। अवघ्नंत्याः प्रकोष्ठस्थाश्चक्रुः शंखाः स्वनं महत्॥ ६॥
सा तज्जुगुप्सितं मत्वा महती व्रीडिता ततः। बभंजैकैकशः शंखान् द्वौ द्वौ पाण्योरशेषयत्॥ ७॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म शंखयोः।
भ तत्राप्येकं निरभिददेकस्मान्नाभवद्ध्वनिः॥ ८॥ अद्राक्षमिमं तस्या उपदेशमरिंदम। लोकाननुचरन्नेताँल्लोकतत्वविवित्सया॥ ९॥ वासो
बहूनां कलहो भवेद्वार्ता द्वयोरपि। एक एव चरेत्तस्मात् कुमार्या इव कंकणः॥ १०॥

घो
अभ्यागत समवेत्री हिताउनंरारिद्युस्वकमितिवीहिताउलज्जता॥ ७॥ शेषो अवघ्नंत्या इत्यस्ते धिकार्ये अभ्यागतैः शंखस्वनोन्स्थुत
इति सस्यते। संभिश्च विपक्षावशात् क्रियतरूतिविश्यकरणेलक्षत्वाद्वे निरभिंदत् निरभिनत्॥ ८॥ इदं कथं संभाव्यत इत्यत्राह। लोकानि
ति॥ ९॥ एकाकित्वस्य विपक्षे बाधकमाह वास इति। अत्र दुर्जनैः सहवासो निषिध्यते न तु मद्भिः तस्य विहितत्वात्। असज्जनैस्तु
संवासो न कर्तव्यः कथंचन। यावद्यावद्बहुभिः सज्जनैः सतु मुक्तिदः इति वचनात्॥ १०॥

भा॰ए॰
४९

ता

ननु गृहे स्थिमादिवोदनोंदरणीयाकिंनेत्याह। यमानिति। यमनियमाः अहिंसासत्यमस्तेयमसंगो ह्रीरसंचयः आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं। शौ
चं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं। तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं। इति वक्ष्यति। क्वचिदिति कदाचित्। निवृत्तादिवत्तानि त्यक्त्वा गुरूपासनमप्यंतर
ग मित्याह। मदभिज्ञमिति। मय्येव आत्माधानात्तमर्थं बुद्धिर्यस्य स तथा तं। मामेव व निबंधीयात् यो मंत्रार्थसप्रकीर्तिताः इति वचनात्॥५॥ तस्य गुरु मा
निष्ठा प्रसादजनकगुणानाह। अमानीत्यादिना। निरतांग मयती। तैर्गमो निर्णायकं वै स्पावश्यात्रंतरिमित्याह॥६॥ सर्वेषु जायापत्यादिष्वात्मनः स्वस्यार्थमि नि
व प्रयोजनं उभयोः समं न तु विशेषं पश्येत्। इवो भमेव स्मादृष्येदिति वा। यावत्प्रयोजनं पश्येदिति वा॥७॥ किंच परमात्मानावपि परस्परदेहादे जीव

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्॥ मदभिज्ञं गुरुं शांतमुपासीत मदात्मकं॥५॥ अमान्यमत्सरो दक्षो निर्ममो दृढसौहृदः॥ असत्वरोर्थजिज्ञा
स्व सुरनसूयुरमोघवाक्॥६॥ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु॥ उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः॥७॥ विलक्षणः स्थूलसू
क्ष्माद्देहादात्मेक्षिता स्वदृक्॥ यथाग्निर्दारुणो दाह्याद्दाहकोन्यः प्रकाशकः॥८॥ निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान्॥ अंतःप्रवि
ष्ट आधत्त एवं देहगुणान्परः॥९॥

अभिन्नत्वेन ज्ञातव्याविति सदृष्टांतमाह। विलक्षण इति। स्वदृक् स्वयंप्रकाशः ईक्षिता सर्वस्य द्रष्टा आत्मा परमात्मा। स्थूलसूक्ष्माद्देहाद्वि
लक्षणो भिन्न आत्मा जीवश्च देहादेरभिन्न इति ज्ञातव्याविति शेषः। दाह्याद्दारुणोन्यः पावकः प्राप्तस्य हि प्रतिषेध इति न्यायादनयोरभे
दशंकायाः किं बीजमत्राह। निरोध इति। यथा जीवो निरोधादीस्तत्कृतान्देहकृतान् गुणानाधत्ते। एवं परोपि देहमनुप्रविष्टो देहगुणानाधत्त
इत्यन्वयः। निरोधो मरणं। अणुत्वं बृहत्वं। नानात्वं सुरनरादिनानाजातिविशिष्टत्वं अनयोर्वैलक्षण्याज्ञाने बीजमित्यर्थः॥ ॥९॥

४९
नाम

सौ यैव फलदातृत्वविशेषादपेशस्कृत तत्दमावादत्मैदेवोपि न हेतुः प्रसादजनकत्व न योर्नैर्वैसाम्यंलो केवत्थादर्शनात्। जन्यलोपि हर्यैव स्वेहस्यानुदस्संकरः ×३
अत्रोदाहरति। कीट इति। ननु भवदिष्टार्थविषममुदाहरणं देवत्तत्समताशास्ववामात् उच्यते। सत्यं भोजनं दास्यतीति लिहस्य बाकुल्येन क्रमेणा जस्य देवस्या
भिमननानिवर्तनेन नैहस्य पक्षदेने नवतत्समतावाप्तिरितीति सत्यप्यत्यल्पविद्वेषे भोजनं दास्यतीति। स्निहूबाकुल्यतः कीटः पेशस्कृत्। इति समो भवेद् द्विषसर्वात्मना ति
नष्टस्नेहवैवविवर्द्धते। स्यपूर्वमप्रदेहस्यात्कीटस्येव हेरपीति। किं च हरेर्द्वेष स्नेहस्यानुसंकरः सोयं विशेषो नान्यस्य फलदातानकेशवः। न हि पेशस्कृतः कि

कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः॥ याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन्॥२३॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः॥ स्वा
त्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो॥२४॥ देहो गुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्वनिधनं सततार्त्युदर्कं॥ तत्वान्यनेन विमृशामि यथात
थापि पारक्यमित्यवसितो विचराम्यसंगः॥२५॥

चित्फलदातृत्वमिष्यतो स्वातंत्र्याद्धि द्विविधं वै वकेशवो न सुरवस्य इति वचनात्॥२३॥ उपसंहरति। एवमिति॥२४॥ स्वदेहाच्छिक्षितमतिमाह। स्वात्मेति। देहो
मम गुरुरित्यत्र हेतुत्वमाह। कुतोत्राह। विरक्तीति। सत्वं बलज्ञानसमाहारो निधीयते यस्मिन्परमेश्वर इति सत्वनिधनः तं सततमतिशयेनोत्तरकरूपः सुरवस्त्व
पद्इति सततार्त्युदर्को भगवांस्तं बिभ्रद्देहः विरक्तिविवेकहेतुत्वात् सत्वनिधनस्य सततार्त्युदर्कस्य हरेरधिष्ठानत्वात् तत्वानि यथावत्तत्वविचार स्व द
साधनत्वाच्च गुरुरेवेत्यर्थः। नहि देहयत्नं कुतः इति तत्राह। तथापीति। पारक्यं परकीयं मातापित्रादेरधीनमित्यवसितो निश्चितः॥२५॥

भा॰ए॰

७

योहरिणा करुणया मनुष्यजन्म प्रापितेनानेन देहेन सर्वस्मात्प्रियं विनाश्येवेते। तस्यापि वृक्षबीजमिव संसारपरंपरां भवबीजमित्यनर्थहेतुरित्याह जायेत्यादिना।
जायादीनां प्रियचिकीर्षया कर्माणि वितन्वन्यो जायादीन्पुष्णाति स वृक्षस्येव धर्मो यस्य स मानो देहः। स्वप्राणाद्यपोषणायैवावरुद्धमनाः स्वस्य बीजमिव स्थितिः
स्वदेहं सृष्ट्वावसीदति नित्यक्लेशवान्भवतीत्यर्थः। यथैको वृक्षो बीजेन बीजांतरपरंपरां भजते एवं तथा देहोपि सज्जायादिपोषणलक्षणं बीजं देहांतरपरं ण पेरे
कारण रूपेणेत्यर्थः। ॥२७॥ अवसीदतीत्युक्तं विवृणोति। जिह्वेति। अमुं संसारिणं कर्मशक्तिः पाण्यादिलक्षणा सर्वा ॥२८॥ अनेन नर्सर्वभोगायतनेभ्यो विशिष्टत्वाने दृष्टशक्तिं

त न सो
जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन्। स्वांते सकृच्छ्रमवरुद्धमनाः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा ॥२७॥
जिह्वैकतोमुमपकर्षति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं कुतश्चित्। घ्राणोन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति ॥२८॥ सृष्ट्वा पु
राणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्। तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः ॥२९॥
लब्ध्वा सुदुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमनित्यमपीह धीरः। तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु सर्वतः स्यात् ॥३०॥

दृश्यादिमत्तया पुरुषोर्थे योग्यत्वेनास्य श्रेष्ठ्यादनेन रसादिविषयान्विजित्य पुरुपुरुषार्थो यसाधनानुष्ठानं विधेयमन्यथानर्थपरंपरा बलवत्यस्थेवेत्युक्तं। तत्र
सर्वस्मादस्य शरीरस्य श्रेष्ठ्यं कथमवसीयत इति तत्राह। सृष्ट्वेति। अजया प्रकृत्यात्मशक्त्या स्वाधीनस्वासमर्थ्योपेतया पुराणि शरीराणि पुरुषं पु
रुषशरीरं ब्रह्मावबोधधिषणं ज्ञानाश्रयं। ॥२९॥ इदानीं परमपुरुषार्थाय प्रयतनीयमित्यर्थतः स्वचित्तं स्पष्टमाह लब्ध्वेति। बहुसंभवांते बहूनां जन्मावसाने।
अनुमृत्यु पश्चात्तनुगतांतकं। शरीरयात्रोपयत्नो पि नानुष्ठेय इत्याह विषय इति धीरः अनित्यमर्थदमिदं शरीरं यावन्न पतेत्तावत्ततः पूर्वमेव निःश्रेयसा ५७
य यतेत नेत्यन्वयः ॥३०॥ राम

सर्वसाधनेषु वैराग्यं प्रथममापाद्यं इत्याह आन्वीक्षेतेति। अंतःकरणशुद्धिहेतुना वर्णाश्रमादिविहितत्वाचारेण ये स्वधर्मा मामकाः पुरुषार्थ्यादिषु तत्त्वज्ञानेन पुरुषार्थसाध
नत्वेन निष्ठा प्रयत्नेन विषयात्मनां विषयेष्वासक्तचित्तानां सर्वेषां कर्मारंभाणां विपर्ययं फलवैपरीत्यमन्वीक्षेतेत्यर्थः। आत्मक्षणेन नामयथावस्तुदर्शनं। तदेव पुरुषा नी
ना र्थसाधनमेव ॥२॥ भक्तिरजतादिज्ञानवन्मुमुक्षुणा हेयमिदं ज्ञानमिति भावेनेतदुपपादयति सुप्तस्येति। यथा सुप्तस्य नाग्न्यत्वेन विषयालोको यथा
क्रोधमहं थि वा ध्यायतो मनोरथश्च नानात्मकत्वाद्दूरस्थितरन्यथात्वाद्विफलो अत एवाविद्यमानः तथात्मधीर्गुणैः स्ववासनाबुद्धिस्थगुणैरस्वरूपैः कामक्रोधादिभिर
भेदो ह्यैकामतिलकादिलक्षणेष्वासेहि यत्वयः वस्तुस्थितेरन्यथात्वं नानात्वमिति कीर्तितं। ज्ञानस्य स्वरूपानानात्वान्मस्यात्कामाद्य हंमतिः कामादिषु स्वधर्मत्व
रूपेणैवलंजीवस्य स्थितिः प्रतीतिबुद्धिरभेदः स्यात्तनः कार्यं कर्म्यंबन। अदुष्टकाम इत्युपेत्तिवाभिमस्वरूपतः। दुष्टकामो मनोधर्मस्तस्माद्देयः संदेन सदगति।

न
आन्वीक्षेत विशुद्धात्मा देहिनां विषयात्मनां। गुणेषु तत्त्वज्ञानेन सर्वारंभविपर्ययं ॥२॥ सुप्तस्य विषयालोको ध्यायतो वा मनोरथः। नानात्मक
त्वाद्विफलस्तथा भेदात्मधीर्गुणैः ॥३॥ निवृत्तं कर्म सेवेत प्रवृत्तं मत्परस्त्यजेत्। जिज्ञासायां संप्रवृत्तो नाद्रियेत्कर्मचोदनां ॥४॥

प्रमाणेन रसत्वं ज्ञायत इत्यर्थः। ॥३॥ अकामात्मेत्युक्तं विवृणोति निवृत्तमिति। फलानपेक्षणं यथा वस्तुज्ञानपूर्वं यथोक्तमत निवृत्तं तदेव सेवेत कुर्यात्। अनीदृशं य
त्कर्म तत्प्रवृत्तं त्यजेन्न कुर्यात्। अहमेव परो यस्य स मत्परः अनेन निष्कामात्मनो बुधस्य कर्मविधानं प्रतीति किंतु ॐ मितिपरास्त। निष्कामं तानस्वं च निवृत्ति
मिति वोच्यते। निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमिति एतदत्र मानं नतु सकामस्य कर्मविधानात्तत्यागः कथमत्राह जिज्ञासायामिति। जि अ
ज्ञासायां ब्रह्मविचारे कर्मचोदनां कर्मविधिं ब्रह्मज्ञानोत्पत्तेः प्रवृत्तानां सर्वशब्दानां कर्मादिविषयत्वांगीकारविरोपत्वात्तत्रानादरलक्षणत्यागो
विधीयते न तु सर्वात्मना अंतःकरणशुद्धिद्वारा ज्ञानांगत्वेनांगीकारादिहेदिस्यतो नाद्रियेदित्युक्तं। ॥४॥ ॥श्रीरामनरेंद्रप्रसन्न॥ ॥गंगायै नमः॥

ता

भा॰ए॰
४८

स्वनिश्चितार्थमाह। एवमिति। आत्मनि विज्ञानालोकः परमात्मविषयविज्ञानलक्षणप्रदीपः प्रकाशः। ३०। एकस्माद्गुरोः स्वार्थसिद्धेर्बहुगुरुकिंप्र
योजनं सर्वस्मादसंगत्वादिकं एवतात्पर्यमाह। न हीति। सुष्ठुपुष्कलं पूर्णं तत्र हेतुमाह ब्रह्मेति। बहुधा गीयमानत्वादलब्धेर्निश्चयो न स्यादिस
थिः। समे ब्रह्मणि चित्तं यस्य स तथा हीत्यनेन। एकस्मात्तु गुरोर्ज्ञानं जायते नैव कस्यचित्। एकस्मादेव जायेत योग्याद्गुरुपदस्य तु। स्वयं तप

एवं संजातवैराग्यो विज्ञानालोक आत्मनि। विचरामि महीमेतां मुक्तसंगो नहंकृतिः। ३०। न ह्येकस्माद्गुरोर्ज्ञानं सुस्थिरं स्यात्सुपु
ष्कलं। ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः। ३१। श्रीभगवानुवाच। इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गंभीरधीः। वंदितोभ्यर्चितो
राज्ञा ययौ प्रीतो यथागतं। ३२। अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः। सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह। ३३। इति श्रीभा॰
परस्थानमभीक्ष्णामित्यनेन पुरादिषु भिक्षाटनं निराकृतं। वानप्रस्थाश्रमस्थानेषु नित्यं भैक्षचरणस्य किं फलमित्यत आह। संसिध्यतीति। शिलांधसा शिलोद्धृतान्नेन शुद्धसत्वं अंतःकरणं यस्य सतथा। असंमोहः मिथ्याज्ञानरहितः। आशु संसिध्यतीति अपरोक्षज्ञानं प्राप्नोति।।२५।। संसिद्धस्य दर्शनप्रकारं विधत्ते नैतदिति। एतज्जगद्वस्तुत्वेन परब्रह्मत्वेन न पश्येत् हेतुः विनश्यद् दृश्यमानमिति एवं पश्यतो वैराग्यानुसंधानं कर्तव्यमित्याह। असक्तेति। इहामुत्रासक्तचित्तः स्यात् ततः किमत आह विरमेदिति। चिकीर्षितात् कर्तुमिष्टात् कर्मादेर्विरमेत् तत् कर्तव्यो भवेदित्यर्थः।।२६।। एतदेव स्पष्टयति यदेतदिति मनोवाक्प्राणैः संभृतं संपन्नमात्मनि हरौ स्थितं। अत्र मयेत्याक्षेपः परमेश्वरो मन्त्रितिश्रुतेः। यदेतज्जगत् तत् सर्वं मायेति तर्केण वेतनाज्ञत्वेन त्यक्त्वा नानुष्ठितानुगुण

वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत्। संसिध्यत्याश्वसंमोहः शुद्धसत्वः शिलांधसा।।२५।। नैतद्वस्तुतया पश्येद् दृश्यमानं विनश्यति।
असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात्।।२६।। यदेतदात्मनि जगन्मनोवाक्प्राणसंभृतं।। सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत्।।२७।।

न

मायातीत्याय: फलं तन्मायेति मायामिति वक्तव्ये मायेति स्त्रीलिंगत्वेन वचनमस्तं तास्व तेज्ञप्रकल्पनायेत्यतो ज्ञानेन प्रयोजनाभावान्नैतत्तु स्वाय स्यादितित्यक्त्वा स्वतंत्रत्वात्त्या विष्णुस्य तेगादद्धहित्येन मुक्तिफलप्रदत्वात् स्वस्थः तदेकशरणो भूत्वा तज्जगन्न स्मरेत् विष्णुमेव प्रयोजकं स्मरेदित्यर्थः। यदि विष्णुः स्वतंत्रो न स्यात् तर्हि जगन्न भितं न स्यात् तत्तु नित्यसुखं स्यान्न चैवं तस्मात्तत एव तत्र चेतना। दितर्केणयेश्वमिथ्या दृश्यत्व एवं तर्केण मायामयत्वं प्रपंचस्यानंतरत्यंततर्यतिरयं परिगेधात् विश्वं सत्यमिथ्या दिष्णुनिभामाण्यादस्म दुक्तार्थे त्रिगुणाप्रकृतिर्मायात ज्ञत्वाद्विश्वमीर्थ दृष्टां अनाद्यनंतकालवृत्तमायेत्याद्युर्विपश्चितः अचेतनत्वान्नैवैतत्प्रयोजकतया स्मरेत्। चेतनत्वं स्वतंत्रत्वं सर्वेको विष्णुरेव तु। आचलफलमुद्दिष्टप्रोक्तं मायेति निष्फलं।। फलात्मत्वात्तु मायेषाभिसंप्रोक्ता त्रिगुणात्मिका। महाफलप्रदत्वात्तु विष्णुराद्य इतीरितः इति प्रमाणसद्भावेस्तु पेक्ष्य णीयं।।२७।। त्यादि न २५ राम

आश्रमान्। उपमाना।

ज्ञानपरिपाके आश्रमस्य गतेई त्रिप्रकारं विधत्ते। ज्ञाननिष्ठ इति। ज्ञानस्य निष्ठोत्कर्षो यस्य स तथा। विरक्तो मुमुक्षार्थो निष्कामार्थोऽन्योन्यनिष्कामार्थो वा लक्ष नेपक्षक निरपेक्षो संग्रहाद्युनिष्ठः। सलिंगान् दंडादिलक्षणसंहितान् मुक्त्वा विधिरगोचरः अयं पतिरयं इत्यादिरूपव्यवहारागोचरः स्वयं रेद्विचिरंत्य न वर्णैर्न तरः दृश्यः स्पष्टवेदोक्तविधिविकितत्वे न सन्ध्योपासनादिनकरोति किंतु ज्ञानस्वतो वक्तव्यैव करोति।।२८।। तं प्रकारं वक्ति। बुध इति। गोचर्यां गोवृत्त्यां अज्ञवज्रण मित्यर्थः। नैगमः वेदोक्तविधिनावर्तमानः इत्यनेनाविधिगोचरत्वं इत्यत्र विधित्यक्त्वाना तथा इति नियमः।।२९।। नैगम इत्युक्तं विश

ध्य धि

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः। सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः।।२८।। बुधो बालकवत्क्रीडेत्कुशलो जडवच्चरेत्।
वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत्।।२९।। वेदवादरतो न स्यान्न पाषंडी न हैतुकी।। शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत्।।३०।। नोद्वि
जेत जनाद्धीरो जनं चोद्वेजयेन्न तु। अतिवादांस्तितिक्षेत नावमन्येत कंचन।।३१।।

स्यति। वेदेति वेदेन सह वादो विवादः विप्रतिपन्नत्तत्वरतो न स्यात्। कुतर्के एवैद्दृश्यजीवब्रह्मणोरैक्या प्रवचनपरो न स्यादित्यर्थः। वेदेन सह वादो यो वेदवाद इतीरितः। तर्केण वेदस्यान्यार्थकल्पनं तद्विदो विदुः। तत्कुर्यात् कदाचिच्चतत्कुर्वन्वै द्रुह्यभवेदिति वचनात्। उक्त एवार्थः। कृविचारविधुरः तत्स्यादर्थो नैव। किंच पाषंडपाशुपतादिदर्शनाभिमानी न स्यात्। हैतुकी अक्षपादादिदर्शनाभिमानी च न स्यात्। शुष्कवादवि वादेन प्रसंगतः प्राप्ते निरर्थवादकलहेन योगसांख्यकणादाक्षपादादिवै हैतुवादिनः। पशुपति शाक्तबुद्धाद्याः पाषंडा इति कीर्तिता। इति वचनाच्च
।।३०।। नोद्विजेत दुर्जनाद्वो द्विग्नस्यात्।।३१।। हृ

वैराकरणेनकिंनिमित्तमत्राह । एक इति । परः सर्वोत्तम आत्मा परमात्मा एक एव भूतेषु चराचरसंज्ञेषु आत्मनि च स्मिंश्चावस्थितो हि यस्मात्तस्मात् उपाधिछाद्नेनाद्वैरं न
त । कुर्यादितरद्रियादित्यर्थः । एको देवः सर्वभूतेषु गूढः इति श्रुतेः । अत्र दृष्टांतमाह । खं यद्वदिति । यद्वद्यथाकाशं उदपात्रेषु घटादिषु एक एव स्थितस्तथात्माप्यत्र विशे
षतश्च घटादिषु महाकाशो निर्विशेषश्च सनतः घटावयवरूपस्तु तथैवान्योन्यघटो गतः घटनाशेऽप्यनाशः स च मध्यमाकाश इष्यते । एकदेशाभिमानित्वादि
त्याकाशात्त्रयस्मृताः । महाकाशो विभुरात्मा विभ्रान्तस्तत्र तु मध्यमाः । क्षुद्रविभ्रान्तदित्तरस्त्वमात्मा त्रिधा स्मृतः । महारवव त्सरस्तानजी वा मध्यस्थ
त्याकाशात्त्रयस्मृताः । महाकाशो विभुरात्मा विभ्रान्तस्तत्र तु मध्यमाः सुद्रविभ्रान्तदित्तरस्त्वमात्मा त्रिधा स्मृतः । महारवववत्सरस्ता नजी वा सर्वे पिसंस्थिता भर
वत्स्मृताः घटानुगखवत्प्रोक्ता जसुरा नित्यदुःखिनः । महाकाशवशाः सर्वे आकाशाः इतरे स्मृताः । परमात्मवशा तद्वज्जीवाः सर्वेपि संस्थिताः ॥

देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् । एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥२२॥ खं यद्वदुदपात्रेषु भूतान्येकात्मकानि च । अतःध्यान

धृति देहमुद्दिश्य पशुवद्वैरं कुर्यान्न केनचित् । एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ॥२२॥ खं यद्वदुदपात्रेषु भूतान्येकात्मकानि च । अतःध्यान
विवीदेत कालेकालेऽशनं क्वचित् ॥२३॥ लब्धान्न श्येद्धर्धिमानुभयं दैवतंत्रितं ॥ आहारार्थं समीहेत युक्तं तत्प्राणधारणं ॥२४॥ ॥

वं विष्ण्वात्मकमिदं जगत्यशेषद्यतिः सेदन्यस्मान्मानादवगंतव्यः । किं वलं नाकाशवत् भूतानां परमात्मनश्च व्याप्यव्यापकसंबंधोपि तु तस्मादिशेषो
प्यस्तीत्याह । भूतानीति । एकः परमात्मा एवात्मा व्यापकश्चारं तानि येषां तानि मात्येका त्मकानि कप्रत्ययः स्वार्थे विशिनष्टि भूतानामिक एवान्नाथकी
भूतेषु संततः एको भूतानि वा इत्यतस्मा देकात्मका निर्धितिवचनात् ॥२२॥ अशनमिति ध्यानमिति योरपि महत्क्लिष्टासो न कर्तव्य इति भावेनाह । अलब्धेति ।
दैवस्य ममतं वित्तमधीनं ॥२३॥ ननु तर्हि प्रयत्नेनापि तदर्थे न कर्तव्यमित्याह । आहारेति । न तु गार्हस्त्यं विंतयेत् प्राज्ञ इति निषेधः कथमत्राह । युक्तं र
ति । यावत्प्राणधारणार्थमपि चिंतनं विहितत्वायुक्तं । न वा अंजी विष्णमिमानरवाद्गतिरिति श्रुतेः ॥

९८ नाम

मा॰ तस्योपासिप्रकारमाह । आत्मानमिति । मुनिर्यतिरात्मानं परमात्मानमेकं प्रधानं सर्वोत्तमं चिंतयेत् । किं च मया अभेदेन । उपलक्षणमेतत् । मत्स्वाद्यवता प्रणमिदं
राभिन्नत्वेन स्वगतभेदराहित्येन मया लक्ष्म्या सह देवेति वा । तत्र किं न मुख्याप्युखार्हमयेति । पूर्णमदः पूर्णात्पूर्णमुदुच्यते इति श्रुतिप्रमाणेन सेत्र सत्यः पुरुषोत्तमः
कैतिमया सिद्धमात्मानं स्वांशभेदेन चिंतयेत् । किं तु एकमन्यं चिंतयेत् । एक मुख्यान्य केवलाह नित्यन्यमीशमस्य महिमानमिति तन्नो कः इति मयाह तु नाशो
मद्वा आत्मा वा इदमेक एवाग्रआसीदिति श्रुत्या मया सिद्धमात्मानं एकं मुख्यं चिंतयेत् अन्यदविषयेऽज्ञीने नैक्यं न दिंतयेदित्यर्थः । सत्वंभिदास

आत्मानं चिंतयेदेकमभेदेन मया मुनिः ॥२१॥ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया । बंधं चेंद्रियविक्षेपो मोक्ष एषां च संयमः ॥२२॥
तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः ॥ विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् ॥२३॥ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्च
रेत् । पुण्यदेशसरिच्छैलवनाश्रमवतीं महीम् ॥२४॥

स्मी
त्वं भिदेति श्रुत्यास्यमया सिद्धत्वात् [illegible] प्रमाणयो मोक्षत्वान्निषेधे वा विकीर्त्येतत्त्वभिधानं ॥२१॥ भगवदुपास्त्या वित्द्मंतरंगमित्याह । अन्वी
क्षेतेति । ज्ञाननिष्ठयात्मनः स्वस्य बंधं मोक्षं चात्मनो हरेः सकाशादन्वीक्षेत नत्वयं हरिरस्य बंधमोक्षौ कथमापादयतीति तत्राह । बंध इति ॥२२॥
इंद्रियाणां विषयेषु विक्षेपः प्रसारणं बंधः स्यात् वा भिंद्रियाणां संयमो निग्रहो विषयेभ्य आहृत्य मयि स्थापनलक्षणो मोक्ष इति यतएवं तत ॥२२॥ रवं
स्मादिदं विधेयमित्याह । तस्मादिति । कर्मेंद्रियाणामेकेन मनसा सह षट्ज्ञानेंद्रियाणि आत्मनि भान्विम हत्सुखं लब्ध्वा तुच्छकामेभ्यो वि
रक्तो भूत्वा विषयेनिरपेक्षत्वेनात्मनि सुखं लब्धेति वा ॥२३॥ पुण्यशब्दः देशादिभिः प्रत्येकं संबध्यते ॥२४॥

एवंविधज्ञानप्राप्त्युपायमाह। दुःखोदर्केष्विति। उपव्रजेदित्युपसर्गेण गुरुसमीपमेव तं गुरुकुटे निवासः कर्तव्य इति ज्ञाप्यते।।३९।। मुमुक्षोरेवेति तस्तावद्यावद्ज्ञाने दृढे गुरुं।
ततः परं शुश्रूषेयथा तस्याप्रियं भवेदिति स्मृत्यर्थं स्पष्टमाह। तावदिति। यावद्ब्रह्म मां विजानीयात्तावद्गुरुमेव परिचरेत्स्वयं। आज्ञद्रूत्वेन ज्ञानोदयानंतरमपि गुरु
शुश्रूषा कर्तव्येति ज्ञाप्यते।।४०।। विषयमात्र धारिणोऽयत्नतया प्रत्याहृत्यास्मिन्नपक्षे वा धर्मकमित्याह। यस्त्विति। प्रचंडइंद्रियाणां सारथिर्मनो यस्य स तथा।

दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान्। अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत्।।३९।। तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः। यावद्ब्रह्म वि
जानीयान्मामेव गुरुमादृतः।।४०।। यस्त्वसंयतषड्वर्गः प्रचंडेंद्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति।।४१।। सुरानात्मानमात्मस्थं नि ते मो
ह्नुते मां च धर्महा। अविपक्वकषायोऽस्मादमुष्माच्च विहीयते।।४२।। भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौकसः।। गृहिणो भूतरक्षेज्याद्वि
जस्याचार्यसेवनं।।४३।। ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं। गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं।।४४।। इति मां यः स्वधर्मेण भ
जेन्नित्यमनन्यभाक्।। सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात्।।४५।।

त्रिदंडं त्रिवेणुलक्षणं।।४१।। सुरानात्मस्थं स्वांतर्यामिणमात्मानं श्रेष्ठं मां च निह्नुते निराकरोति। सोऽस्माल्लोकादमुष्मात्स्वर्गादेश्च विहीयते। अधः
पततीत्यर्थः।।४२।। चतुर्णां विशेषतः कर्तव्यं धर्ममाह। भिक्षोरिति। यतेः शमाहिंसे धर्मः वानप्रस्थानां तप ईक्षा आलोचनं च धर्मः। गृहस्थानाम् भूतर
क्षादिना ग्रहणे इज्या यागश्च। द्विजस्य ब्रह्मचारिण आचार्यसेवनं गुरुकुलवासः।।४३।। गृहस्थस्याप्यृतावेव दारेषु गंतुरिति विशेषः।।४४।। एतैर्ध
मैः साध्यमाह इतीति।।४५।। ऋतुरेव

९६
राम

इतैर्धर्मैः साध्यमाह इतीति।

मद्भावो भक्तिरेव प्रयोजके स्याद्भक्ते ति।।४५।। स्वविहितधर्मेण निर्णिक्तं धौतं सत्त्वमंतःकरणं यस्य स तथा। निर्ज्ञातेति ज्ञातमद्गतिः।।४७।। भक्तिरेव मम परमप्रा
प्तिसाधनं वर्णादिविहितधर्मोऽपि भक्तिसंवलित एवेति भावेनाह। वर्णेति।।४८।। उपसंहरति। एतदिति। यच्च पृष्टोऽर्थस्तं यथा मां समियात्तथैवाभिहितं।। ।।इत्येका
व दशे विवरणेऽष्टादशोऽध्यायः।। ।।हरेः प्रसादजनकं ज्ञानमेवं तत्स्य भक्तिरलस्यायमाद्यः। कृष्णेनाह्वले तिय ज्ञानं तत्सर्वमस्मिन्नध्याये निरूप्यते। तत्र प्रथ
मतः। उत्पन्नज्ञानं तदर्थं विधिं प्रसादसंपादकमिति भावेनवक्ति। य इति। यो विद्यायाः वेदांतादिलक्षणायाः श्रुतेन श्रवणेन संपन्नः उत्पन्नज्ञानः आनुमानिक

भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं।। सर्वोत्पत्त्यप्ययं ब्रह्मकारणं मोपयाति सः।।४६।। इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः।। ज्ञानविज्ञानसं
पन्नो न चिरात्समुपैति मां।।४७।। वर्णाश्रमवतां धर्म एष आचारलक्षणः। स एव मद्भक्तियुतो निःश्रेयसकरः परः।।४८।। एतत्तेऽभिहितं साधो भवान्पृच्छ
ति यच्च मां। यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं।।४९।। इति श्रीभा॰ भगवदुद्धवसंवादेऽष्टादशोऽध्यायः।। ।।१८।। ।।श्रीभगवानुवाच।। ।।
यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः।। मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि संन्यसेत्।।१।। ।। ।।श्री।। ।।

उपक्रमादियुक्त्या निर्णीतसंशयविपर्ययश्चा आत्मवान् ममात्माऽऽत्मस्वामी हरिरिति निश्चितः हरितेवामा अपरोक्षीकृत्य मदिदं जगन्मायामात्रं मदिच्छे
च्छाधीना पदानुग्रहाति निर्मितत्वात् तन्मायिकं ज्ञात्वा ज्ञानं च ममेदं ज्ञानं हरिप्रसादलब्धं यं तत्प्रसादेनोत्पन्नं तदधीनं चेति मयि संन्यसेत्। संन्यगर्पयेदित्यर्थः। त्रि
गुणात्मकं नित्यमायापरवशं चात्मकं जगत्। निर्मितं जगत्सर्वमेतन्मायेति सा स्मृतेति वचनात्। इदं ज्ञानं हरेः प्रजा हरेरेवोदितं सदा। हर्यधीनं च सर्वं चेत्येवं
न्यासो हरौ स्मृत इति वचनात्। उक्तप्रकार एव हरौ ज्ञानन्यासो न तत्त्यागप्रकारः।।१।।

कस्मात्त्वयि ज्ञानसंन्यासरत्यतस्तत्रिविधमाह। ज्ञानिन इति। तुशब्दस्तारतम्यद्योतकः स्वात्मस्वार्थो आनंदलक्षणो यस्मात्तस्य हेतुर्ज्ञानोत्पादकः संमतो ज्ञातुः कृतोपीत्याह स्वर्गेष्वपीति।।२।। स्वार्थस्य सिद्धिप्रकारमाह। ज्ञानेति। विदुषे भवंति निगमयति। ज्ञानीति। प्रियतमत्वे नियामित्तमाह। ज्ञानेनेति।।३।। तपस्तीर्थादिभिर्यत्तु शुद्धमतं आ स्तवप्रियत्वेन ज्ञानं विशिष्य कीर्त्तितो वीतितत्राह। ज्ञानपदेति। याश्च दुर्जनेष्विन्द्रकृतानां शुद्धिं प्रभवादी निर्जलसंपदं कुर्वंति त्यन्वयः।।७।। यतः सर्वश्रेयप्राप्ति

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः।। स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः।।२।। ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम। ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां।।३।। तपस्तीर्थं जपो दानं पवित्राणीतराणि च।। नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता।।४।। ज्ञानविज्ञानसंहित्तं ज्ञात्वा स्वात्मानमुद्धव। ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः।।५।। ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि।। सर्वयज्ञपतिं मां
गुः वै संसिद्धिं मुनयोगमन्।।६।।

ज्ञानस्योत्तमसाधनत्वमतः त्वयापीदमेव संपादनीयमित्याह। ज्ञानेति। स्वात्मानं परमात्मानं तं च परतममभिवदति स्वात्मनि तिष्ठतीति श्रुतेः।।५।। कस्येदं दृष्टम् लपेन विश्वस्य भजनीयं स्यादत्राह। ज्ञानेति। आत्मनि हृदये स्वमीशं ज्ञात्वा सिद्धिं मुक्तिं यस्मात् समतयाप्ता।।६।। ।।गंगायेनमः।। विश्वनाथप्रसन्न।

अज्ञानाल्लाभेदे हस्य प्राणवियोगस्तेन देहस्य पंचत्वं तेन रागादीनां स्वस्वकारणसंपत्तिः तत्र पुरुषार्थोपयोगित्वादि मर्शो न सम्भाव्यते न पुरुषार्थानुदयो तोदे हमात्रार्थ मशनचिंतनमावश्यकमित्याशयेनाह। तत्त्वमिति। निर्देहेन नत्त्वं विमृश्यते।।३५।। तत्र तत्क्षितत्वाहायदृछ्येति।।३६।। शौचादीनि कर्माणि स्वभावत एव कुर्यान्न तु ज्ञानी
त विधिवदित्याशयेनाह। शौचमिति। ज्ञानीयतिः भगवतो धर्मप्रोनविधेयं किं तत्र रेत्। अलं फलं इत्यादि तेन स्वभावे फलं तु तं न भिन्नं वचनात्। अत्रहेतुमाह। नहीति। तस्य ज्ञानिनो विकल्पाख्याज्ञानस्यात विरुद्धकल्पनास्य क्रियाकार्येयस्मात्तज्ज्ञानी विधिं विहाय स्वत एव शौचादि क्रियां कुर्यादित्यर्थः।

तत्त्वं विमृश्यते तेन तद्विज्ञानमपि मुच्यते।। यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं।।३५।। तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः।।३६।। शौचमाचमनं स्नानं न तु चोदनया चरेत्। अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः।।३७।। न हि तस्य विकल्पाख्या या च मद्वीक्षया हता। आदेहांतात् क्वचित्ख्यातिस्ततः संपद्यते मया।।३८।।

ज्ञानिनोपि यावद्देहं निषिद्धेषु मनोगमनादू घंसानास्तीत्याह। मद्वीक्षयेति। आदेहान्तेति प्रारब्धकर्मनिवृत्तिपातपर्यंतं ज्ञानिनोपि निषिद्धविषयेषु स्या निर्मनोगतिलक्षणा ख्यातिः स्यात् सापि मद्वीक्षया ज्ञानखड्गेन मत्कटाक्षेण निरीक्षणेन हता स्वयं किमुद्योगयितुमसमर्था स्यादित्यर्थः। ततः प्रारब्धकर्मसूलदेहपातानन्तरं मया संपद्यते मत्प्रसादेनाभिभूत स्वरूपानंदो भवतीत्यर्थः। निषिद्धं मनसा कुल्यपूर्णतीति विहितमाचरेत्। अज्ञो तस्य तु संकल्पः स्वभावाद्विहितानुगः।। यो यो यथा स्थितः को पिनिषिद्धं पिमनो व्रजेत्। तथापि तस्य नानर्थो मोक्षे नैवान्यथा व्रजेदिति स्मृतेः।।३८।।

भा.ए.
१८

एतज्ज्ञानं यथा स्थितं तथा व्याख्याहि ॥८॥१२॥ ज्ञानं स्पष्टं तस्य उत्तरत्वेन धर्माणां कथनं कथं संगच्छत इत्यत उक्तं ज्ञानेति ॥१३॥ येन ज्ञानेन भूतेषु जीवेषु स्थितान् नव एकाद
श पंच त्रीन् भावान् अष्टाविंशति तत्त्वान्यन्वीक्षेत तत्त्वलक्षणं तन्नस्मिन् स्वरूपं सर्वं कं पश्यति एषु तत्त्वेषु तन्नियामकतया स्थितमेकं तत्त्वं यः प्रधानं तत्त्वं पतिं हरि
मपि पश्यति तज्ज्ञानं निश्चितं ज्ञानमपि पृथिव्यादिपंच भूत बुद्ध्यहंकारचित्तमूलप्रकृत यो नव मनस्तासह श्रोत्रादीन्द्रियाण्येकादश त्रयः सत्त्वादयो गुणाः
शब्दादयः पंच ज्ञात्वा तान्यानि तेष्वंशांसर्वतत्त्वेश्वरं प्रभुं ज्ञानं ज्ञानिभिर्वेत्तव्यस्य योग्यध्यानं विशेषतः एकोऽत्र एव योजानन् स विज्ञानी भवत्विति त्व

उद्धव उवाच ॥ ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्यविज्ञानयुतं पुराणं ॥ आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ॥ ८ ॥ तापत्रयेणा
स भिहितस्य घोरे संतप्यमानस्य भवाध्वनीश ॥ पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ॥ ९ ॥ दष्टं जनं संपतितं बिलेऽस्मिन्कालाहिना दष्ट
त नाक्षुद्रसुखोरुतर्षं ॥ समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच महानुभाव ॥ १० ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं ॥
अजातशत्रुः पप्रच्छ सर्वेषां नोऽनुशृण्वतां ॥ ११ ॥ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः ॥ श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत ॥ १२ ॥ ता
६ न्अहं तेऽभिधास्यामि देवव्रतमुखाच्छ्रुतान् ॥ ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहितान् ॥ १३ ॥ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ॥ ईक्षेताथैक
मप्येषु तज्ज्ञानं मम निश्चितं ॥ १४ ॥ एतदेव हि विज्ञानं न तथैकेन येन यत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां ॥ १५ ॥ ॥श्री॥ ॥

न
तमत्र मतेनेनाश्विष्टंज्ञानं च हि ज्ञानेनन हि किंतत्राह एतदेवेति हि शब्दो विशेषद्योतकः स्वस्य यद्विशेषतो ज्ञानं तद्विषयस्याविशेषस्य ज्ञानेन सह तन्मेत
दिव ज्ञानं सिद्धी तिशेषः तस्यापि तत्त्वेशविषयत्वात्कथं विज्ञानं नेति तत्राह नततथेति यद्यपि तत्तत्तदीश्वरविषयं तथापि तथैव पूर्वोक्तप्रका न
रेण तत्त्वानि ज्ञात्वा सर्वं तत्त्वेश्वरं विषयी कुर्वन् ज्ञानं विज्ञानं न भवति स्वयोग्यपुरुषार्थसाधनत्वान्न स्मात्स्वविवेकज्ञानविशिष्टमेव विज्ञानमि
त्यर्थः हरेस्तत्त्वैकत्वात्प्राधान्यकृतं स्यतआह एकेनेति नो स्मार्कं तत्त्वानां मध्ये एकेनान्य निरपेक्षेण येन तत्त्वेन यद्यं स्थिता ताव दाधारस्त्व ५६धीनतेन
न त्रिगुणात्मनां सत्त्वादिगुणाभिर्मितदेहानां भावानां स्थित्युत्पत्त्यप्ययान्पश्येत् ॥ १५ ॥ ने
नान १८

दूर्ध्व

सं
पश्चतत्त्वमादावंते सृष्टेः प्राक्प्रलयानंतरं मध्ये स्थितिकाले वर्तते सर्वतं पुनस्तत्प्रतिसंक्रमेतस्य सृष्टस्य संहारे स्वरूपं जगत् यात्प्रविशति यद्वशेषेत अवशिष्ट दन्त्व
मविनाशितदेव सत्त्वं तत्त्वं सत्त्वंस्वातंत्र्यमुद्दिष्टं तत्त्वकृष्णोऽन्यापरे अपरस्यात्त्व्या तदन्येषामसत्त्वंसिद्धि भारतेति स्वनाद्भुरिसेवतत्त्वेषु प्रधानं तत्त्वमिति भावः
॥१६॥ अत्र किं प्रमाणमिति तत्राह श्रुतिरिति निकमेवाक्यार्थमयं तन्त्र मतं हरेः प्रमाणमपि तुश्रुत्वा दिचतुष्टयमपि दृष्टिते द्यमागम भेदः प्रयोजनमाह प्रम अ
णोक्तिति एवं वेदाद्यमाणैर्विदित्वा शेषतत्त्वतदीशविशेषनयाज्ञानविज्ञानसंपन्नः पुरुषो विकल्पाद्विरुद्धकल्पनाज्ज्ञीवंस्यात्तत्त्वता नादिलक्षणाद्वि स्छात
रज्यते विरक्तो भवतीति मिथ्याज्ञानरहितो भवति त्वर्थः सोऽपि माणिकल्पित्वकथ मित्यतउक्तं वमतः कर्मेति श्रुत्यादिप्रमाणेकृतअन्यप्राधान्यस्यानवस्था

आदावंते च मध्ये च यत्सृज्यं सृज्यतोऽन्वयात् ॥ पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् ॥ १६ ॥ श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं ॥ प्रमाणेष्वनव
स्थानाद्विकल्पात्स विरज्यते ॥ १७ ॥ कर्मणां परिणामित्वादाविरिंच्यादमंगलं ॥ विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ॥ १८ ॥ भक्तियोगः पुरैवोक्तः प्रीयमा
णाय तेऽनघ ॥ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं ॥ १९ ॥ श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनं ॥ परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम ॥
॥ २० ॥ आदरः परिचर्यायां सर्वांगैरभिवंदनं ॥ मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥ २१ ॥

नात्तात्पर्यार्थेषु शास्त्रिस्थितस्वभावात् चोरवत्पलायमानात्वादित्यर्थेन प्रमाणानां नानेव प्रतीयमाना नां तात्पर्यार्थे पपरिज्ञानात् ॥ १७ ॥ उत्पन्नाद्वै
वैराग्यं विशिनष्टि कर्मणामिति अविरिंचात् मनुष्यस्य आरभ्य विरिंचिपर्यंतं जगत् अमंगलं असारं अतएव नश्वरं पश्येत् अदृष्टं स्वर्गादिकमपि
दृष्टगृहादिवत् पश्येत् कर्मणां फलरूपत्वात् ॥ १८ ॥ विरक्तोमपि भवेनाह भक्तियोग इति ॥ १९ ॥ निरतिशय भक्त्युत्पत्तौ कारणं वक्तुमुद्दिति
अमृतवज्जरामरणहारिण्यां हरिकथायां परिनिष्ठा आस्था भक्तिं कुर्यादिति त्यागपद्यपि यावज्जीवनमनुवामीति निश्चयः ॥ २० ॥ अभिवंदनं प्र
णामः मन्मतिः संनिहित इति मत्स्मरणं ॥ २१ ॥

भा०द
११

मदर्थेषु अङ्गचेष्टा च यांतेतद्यातेषु परमभागवतेषु ॥ अंगचेष्टाशरीरव्यापारैर्नृत्यलक्षणचेष्टा ॥२२॥ मदर्थेमत्प्रीत्यर्थे ॥२३॥ निधीरत्नइत्यत्रापिकारणवशात्
न केषांचिन्मित्याहकोन्यइति ॥ अस्यपुरुषस्य ॥२४॥ यदासत्वगुणेनोपबृंहितंसंवर्धितंअतएवशांतंनिवृत्तं मय्यर्पितंभवतितदाधर्मादिकमाप्नोति ॥ तदेनैव
शि धर्मादयोविशिष्टाः स्तुतीलवतत्वपरिहृतं ॥२५॥ विपक्षेबाधकमाहयदीति ॥ यदितच्चित्तंविकल्पेअर्पितंमिंद्रियेरपिनिंदितेषुविषयेषुधावतितदातच्चित्तंरज
र स्वलंरजोदूषितंराजसमसन्निष्ठंतामसंचविपर्ययं दुःखकारणंचविद्धि ॥२६॥ धर्मादिकमभिपद्यतइत्युक्तंतद्विशिनष्टि ॥ धर्मइति ॥ एकात्म्यदर्शनमित्येत

मदर्थेंगचेष्टा च वचसामद्गुणेरणं ॥ मय्यर्पणंचमनसः सर्वकामविवर्जनं ॥२२॥ मदर्थेचपरित्यागो भोगस्यचसुखस्यच ॥ इष्टंदत्तंहुतंजप्तंमदर्थं
यद्व्रतंतपः ॥२३॥ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदनां ॥ मयिसंजायतेभक्तिः कोन्योर्थोस्यावशिष्यते ॥२४॥ यदात्मन्यर्पितंचित्तंशांतंसत्वोपबृंहितं ॥
धर्मंज्ञानंसवैराग्यमैश्वर्यंचाभिपद्यते ॥२५॥ यदर्पितंतद्विकल्पेइंद्रियैःपरिधावति ॥ रजस्वलमसन्निष्ठंचित्तंविद्धिविपर्ययं ॥२६॥ धर्मोमद्भ
क्तो क्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनं ॥ गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः ॥२७॥ उद्धवउवाच ॥ यमः कतिविधः प्रोक्तोनियमोवारिकर्षण ॥ कः
शमः कोदमः कृष्णकातितिक्षाधृतिःप्रभो ॥२८॥ किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते ॥ कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा ॥२९॥
कस्त्यागःकिंधनंचेष्टंकोयज्ञःकावदक्षिणा ॥ पुंसः किंस्विद्बलंश्रीमद्भगोलाभश्चकेशव ॥३०॥ काविद्याह्रीःपराकाश्रीःकिंसुखंदुःख
मेवच ॥ कः पंडितःकश्चमूर्खःकःपंथाउत्पथश्चकः ॥३१॥

द ॥ एकः प्रधानमुद्दिष्टोविस्मोः प्राधान्यदर्शनंएकात्म्यदर्शनंप्रोक्तंसर्वज्ञानेनममंवतदित्यनेनव्याख्यातं ॥२७॥ तत्रतत्रभक्तिसाधनानियमादि
यः कृष्यंतेतत्स्वरूपंविवित्सयातत्रोद्धवःपृच्छति ॥ यमइत्यादिना ॥ श्रीमत्त्वंकिंस्वित् ॥२८॥ ॥३१॥ ११
राम

ननुतथापिदेहित्वेनजन्मादिनादुःखादिसंभवात्कथंत्वत्प्राप्तिर्मुक्तिःस्यादित्याशंक्यस्वतश्चिदानंदस्यतवजन्मादिर्नास्ति ॥ तदेहस्यैवममनुतादृशोदेहस्वनास्तिनि
अ र्गुणत्वात् ॥ कुतोजन्मादिरतोनित्यनिर्दुःखानंदानुभवस्यममप्राप्तिरेवमुक्तिरितिभावेनाह ॥ त्वयीति ॥ देहउद्भवायस्त्रिविधोजन्मस्थितिसंहारलक्षणोविकारस्त्वय्या
श्रयतिसंप्रवर्ततेसमायानिर्मितोननुस्वाभाविकः ॥ अन्यथानिर्मितंजीवेजन्मादिहरिणायत ॥ तस्मान्मायैवतितत्वाद्भूमायानिर्माणमुच्यतेनहिजीव
स्यजन्मादिस्वतोनित्यस्यसंभवेत् ॥ सृष्टेःप्राक्प्रलयेचैवपत्तोजन्मादिनास्तिहि ॥ तस्मान्मध्येपिनास्यास्तिदेहादिस्थंतुविस्पुना ॥ कर्मभिर्निर्मितंजीवप्रलये
यन्नजीवगं ॥ यन्नविधेतहिलयेयन्नविधेतमुक्तिगो ॥ जीवस्यनस्वभावोसौप्रायेणेतिविनिश्चितइतिप्रकाशिकायां ॥ किंचमायेत्युक्तेनिर्मितंतुयतोजन्मादिनिर्मितं ॥
देहादिकेपरोशेनमायाजन्मादितेनविल्वस्माच्च ॥ अतर्कितोपपन्नवदागतत्वान्नस्वाभाविकइत्याह ॥ अंतरेति ॥ योजन्मादिरंतरासृष्टिकालेआपतितकर्मभिर्व त
शादागच्छति ॥ आद्यपवर्गयोर्नप्रलयमुक्त्योर्नविधेत ॥ यंन्नविधेतविलयेयन्नविधेतमुक्तिगो ॥ जीवस्यनस्वभावोसावित्युक्तत्वाच्चउक्तोर्थोयतंत्वाप्यनुभवतिहि

त्वय्युद्भवाश्रयतियस्त्रिविधोविकारोमायांतरापततिनाद्यपवर्गयोर्यत् ॥ जन्मादयोस्यवदमीतवतस्यकिंनुस्युराद्यंतयोर्यदसतोस्तितदेवमध्ये ॥३१॥ ॥

इत्यादावेनाह ॥ जन्मादयइति ॥ तस्यपरिणामस्वस्वरूपेदेहस्यदृश्यमानाजन्मादयोस्यचिदानंदस्वरूपस्यतवस्युःकिंमांप्रतिवदंबलमानंदइत्यत्रश्रुतेर्ज्ञानमना
फलेरित्यादेःउपसंहरति ॥ आद्यंतयोरिति ॥ असतइतिहेतुगर्भंस्यविशेषणं ॥ अस्वतंत्रत्वादवस्तुनोजगतआद्यंतयोःप्रलयमुक्त्योर्यन्नास्तिचिदानं जोतो
दस्वरूपंतदेवमध्येसृष्टिकालेपिस्वरूपंतस्माद्देहाभिमानिकृतसंसारोमदपरोक्षज्ञानेननिवर्ततइतिभावः ॥ ज्ञानिनोमनुष्याहइत्यनुभवतःसुखैकरूपामु
क्तिःकर्मसेत्यजिज्ञन्यस्मान्नाद्दृश्यत्वानुपपत्तेरित्याशंक्यकालत्रयेपिजीवस्यैकरूपत्वेनाभिमानिकआगंतुकःसंसारोमत्प्रसादेननिवर्ततइत्येतदा
ह ॥ त्वयीति ॥ आद्यंतयोःसुगमाद्याद्यंतरहितस्यतु ॥ आद्यंतेभाविनोमध्येकथमन्याहर्षांचपुरित्यतःसिद्धंकिंच ॥ अनित्यस्यतुदेहस्यतस्यजन्मादिकंमध्ये
हि ॥ मुक्तिप्रलयसंबंधेकथंजीवतिदिष्यतइति ॥ अनित्यस्यगुणामध्येभवेयुःस्वतएवतु ॥ ननुस्वतस्तुनित्यस्यकदाचित्कगुणेर्मुक्तिरिति ॥३१॥ ॥

भा॰ए॰
१००

णां

अतः संतुष्टो विषया संतोषवान् दरिद्रः विषये दोषबुद्धिः सन्निंद्रियवशे स्थितः कृपणः विषये दोषबुद्धिः सन्निंद्रियाणां वशे स्थितः कृपणः सतु सतोक्तो
गुणबुद्धिर्विपश्चिदिति गुणेषु विषयेषु अशक्तः स्ववशः ईश्वरः गुणसंगी सर्वविषयसंगी विपर्ययो विपरीतः पुरुषार्थमतिर्यस्य विषयेष्वपि देहिनः श्रेयः
परीतः सतु ज्ञेयः स्वात्मनो विपरीततः इति स्वनात् विनासंतोषमाचाद्दरिद्रः सर्वविषयसंगी विपरीतः ॥४५॥ निरूपिताः परिहृताः शास्त्रतात्पर्यार्थं
कथयति । किं वर्णितेनेति । गुणदोषयोर्लक्षणमुक्तं प्रबहुनावर्णितेन किं विहितकरणं गुणः निषिद्धकरणाद्दोषः इति गुणदोषवृद्धिर्दोषः भगव
ति प्रियत्वा प्रियत्वमंतरेण निशेषः । उभयवर्जनं गुणः उभयोर्गुणदोषयो भेददर्शनत्यागो गुण इत्यर्थः अत्र हरेर्यत्प्रियं स गुणः यदप्रियं स दोष

दरिद्रो यस्त्वसंतुष्टः कृपणो यो जितेंद्रियः गुणेष्वशक्तधीरीशो गुणसंगी विपर्ययः ॥४५॥ एतेउद्धव ते प्रश्नाः सर्वे साधु नि
रूपिताः ॥ किं वर्णितेन बहुना लक्षणं गुणदोषयोः ॥४६॥ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥४७॥ ॥इति श्रीभागवते वर्ज
महापुराणे एकादशस्कंधे एकोनविंशः ॥ ॥उद्धव उवाच ॥ ॥विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते ॥ अवेक्षतेरविंदाक्ष गुण
दोषं च कर्मणां ॥१॥

मि
इति सत मिनदितितात्पर्यं यद्वा बहुना वर्णितेन किं गुणदोषयोर्लक्षणं स्वरूपं दुर्ज्ञानमिति शेषः कथमत्राह । गुणेति । गुणदोषयो रन्योन्यदृशिर्दो
षः उभयवर्जनं गुणः अत्रापि हरिप्रियत्वादि प्रयोजनमिति ॥४६॥४७॥ ॥इत्येकादशविवरणे एकोनविंशः ॥ ॥अधिकारिणामनेकविधत्वेन सा
धनानामपि तथात्वात्कथं विदंतर्भाव विवक्षया कर्मयोगादिभेदेन त्रिधा विभज्य तत्स्वरूपं कथयत्यस्मिन्नध्याये तत्र भगवत्प्रिय एव गुणस्तद
प्रियो दोष इति भगवदभिप्रायं ज्ञापयितुं बाविविच्य ज्ञापनाय पृच्छति । विधिश्चेत्यादिना हे अरविंदाक्ष ईश्वरस्य ते तव विधिश्च प्रतिषेधश्च
प्र विधिर्विधिनिषेध उक्तेन निगमो वेदः कर्मणां गुणदोषं चापेक्षते विहितकरणाद्गुणं च निषिद्धकरणाद्दोष इति वक्तीत्यर्थः ॥१॥ ५

१००

विपरीतमुक्तोऽयोन्यं दोषैः ।।३२।।३५।। दुहन्ति फलानीति शेषः ।।३५।। दंडन्यासः अशास्त्रविहितदंडत्यागः दंडत्याग इति वा पाठः । स्वभावविजयः स्वमनोजयः
समदर्शनं यथावस्तुदर्शनं ।।३७।। कर्मस्वसंगः नाहं कर्तेति ।।३८।। इष्टं धनं धर्मः । भगवत्तम इति यतः यज्ञेन इज्य इत्यर्थः । ज्ञानसंदेशः ज्ञानोपदेशः दक्षिणा ।।३९।।

ढ्यः

कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं । क आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ।।३२।। एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ।। श्रीभगवानुवाच
अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः । आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभयं ।।३३।। शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं । तीर्थाट
नं परार्थेहा तुष्टिराचार्यसेवनं ।।३४।। एते यमाः सनियमा उभयोर्द्वादश स्मृताः । पुंसामुपासितास्तात यथाकामं दुहंति हि ।।३५।। शमो मन्निष्ठता बु
द्धेर्दम इंद्रियसंयमः ।। तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ।।३६।। दंडन्यासः परं दानं कामत्यागस्तपः स्मृतं ।। स्वभावविजयः शौर्यं सत्यं
च समदर्शनं ।।३७।। ऋतं च सूनृता वाणी कविभिः परिकीर्तिता ।। कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ।।३८।। धर्म इष्टं धनं नृणां यज्ञोऽहं भगवत्त
मः ।। दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलं ।।३९।। भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः ।। विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ।। द
।।४०।। श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः ।। दुःखं कामसुखापेक्षा पंडितो बंधमोक्षवित् ।।४१।। मूर्खो देहाद्यहंबुद्धिः पंथा मन्निगमः
स्मृतः । उत्पथश्चित्तविक्षेपः स्वर्गः सत्वगुणोदयः ।।४२।। नरकस्तमउन्नाहो बंधुर्गुरुरहं सखे ।। गृहं शरीरं मानुष्यं गुणाढ्यो ह्याढ्य उच्यते ।।४३।। दे द्यो

ऐश्वरो भावो मे ऐश्वरत्वभावनं भगः । आत्मनि भिदाबाधः सर्वतः विलक्षणोऽहमिति ज्ञानं विद्या । दुःखात्ययात्सुखं मोक्षलक्षणं सुखं कामानां विषयाणां
सुखापेक्षा सा दुःखं ।।४२।। देहादावहंबुद्धिर्यस्य स तथा । मन्निगमः मद्विषयो वेदः सत्वगुणोदयः सत्वगुणाभिवृद्धिः स्वर्गः ।।४३।। तम उन्नाहः अज्ञानो
न्नतिः नरकः भक्त्यादिगुणाढ्यः ।।४४।।

लौकिकं सर्वपक्षमुपसंहरति। गुणेति। यतो वेद उक्तमंत्र यस्तुतेन कारणेन नियमात् गुणदोषभेददृष्टिः स्वतो हि स्वाभाविक्येव। ननु तर्हि स्थं निश्चित
वतस्तत्र किमिति तत्र भ्रम इति तत्राह। नियमेनेति। चशब्द एवार्थे भवता भिदायाः गुणदोषयोर्भेदस्य नियमेनैवापवाद उच्यते इति यत्तस्मात् भ्रमः
संजातस्तत्को निश्चयं भवेतं पृच्छामीति भावः। स्वतः सर्वगुणातीत्वात् विष्णुरेकः सनातनः। अन्यत्सर्वं तत्प्रियत्वात् गुणदोषस्तथाप्रियं एवं ज्ञा
नवतां दृष्टिरक्तस्तत्रावगच्छति। कालदेशविशेषेषु प्रीतिभेदमपेक्ष्य तु। अविज्ञातवतस्तस्य मर्यादा विरतः कृता। गुणदोषभिदा नास्ति भगव
ध त्प्रियमंतरा। गुणदोषदृशो दोषो न्यत्र भगवत्प्रियात्। गुणास्त्वदृष्टदोषतामीयुर्दोषांश्च गुणतां क्वचित्। अतो दोषो न दोषः स्यात् गुणोपि

गुणदोषभिदादृष्टिर्नियमोत्तेन हि स्वतः।। नियमेनापवादश्च भिदाया इति हि भ्रमः।।५।।

गुणो भवेत्। भगवत्प्रीतिविज्ञानात् गुणदोषभिदां यदि दोषश्चेत्तत्र गुण्यैव विपर्यासं न कारयेत्। गुणदोषभिदा क्वापि स्वातंत्र्येण न हि क्वचित्। इ
सनेनास्यातात्पर्यार्थो विज्ञायेत। यद्वा गुणदोषभिदादृष्टिर्नियमोक्तेनव मते स्वतो न हि। प्रत्युत गुणदोषभिदाया अपवादोपि अतो भ्रम इति। गु
णदोषयोर्विहिताविहितकर्मानुष्ठानपरिनिष्ठितत्वं वेदो वक्तीति यद्वादिति तात्पर्यार्थो न किंतु मत्प्रियाप्रियविवेकज्ञानपरिनिष्ठा
विषयः। स्वतस्तु गुणदोषः त्वद्दृशो भेदेन वस्तुनां दोषोपि गुण एव स्यात् भगवत्प्रीतितो गुणः। दोषस्तु तद्द्वेषरीत्यादिति दृश्याङ्गेके गुणः। वे
कालदेशविशेषेणप्रीत्यज्ञानाजगत्स्थितेः।। मर्यादा ५ गुणदोषाणां कृता वेदेषु सर्वेश इति। खेस्वधिकोरयानि छेत्यादिवक्ष्यते।।५।। १०२

विहिताद्यनुष्ठानपरिनिष्ठितत्वेन गुणदोषभेदनियमोक्तिर्मत्प्रियादिविवेकाय ज्ञानविषयेतिभाः। वेन भगवानुद्धवप्रश्नं परिहरिष्यं स्त्रित्वेन कोऽपि कल्प
मुक्त्युपायानाह। योगास्त्रय इति। योगा उपाया नृणामर्थास्समर्था विद्वानिति गुणविशिष्टानां नृन यद्वितिध्यातोः। तान्निर्दिशति। ज्ञानमिति। अन्य
योगं व्यवच्छिनत्ति। नेति। तत्रमौ ज्ञानयोगाधिकारिण आह। निर्विण्णानामिति। इह कर्मसु निर्विण्णानां न्यासिनां सनकादीनां। मिति शेषः

श्रीभगवानुवाच।। ।।योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।। ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कुत्रचित्।।
।।६।। निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु।। तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां।। ।।७।। ।। श्री।। ।।

सनकाद्या ज्ञानयोगाः भक्तियोगाश्च देवताः। मानुषाः कर्मयोगाश्च त्रिधैते योगिनः स्मृताः।। सर्वेषां सर्वयोगैश्च प्राप्या मुक्तिर्न संशयः।।
तथापि तु विशेषेण समस्तेषां विधीयते। इति वचनमत्र मानं। ज्ञानादिगुणानां त्रिषु सत्वेपि सामान्यविशेषविवक्षया विभागो युज्यते।।
प्रमाणानां सत्वात् कर्मयोगाधिकारिण आह तेष्विति। तान् मुक्तिपोगिनो पेक्ष्य ज्ञानभक्त्योरज्ञत्वात् कर्मयोगिन इति।। ७।। श्री।।

भक्तियोगाधिकारिणमाह यदृच्छयेति। तुशब्दो विशेषं सूचयति। यः पुमान् नातिनिर्विण्णो नातिसक्तः यदृच्छया केनापि भाग्योदयेन भगवदिच्छया जातश्रद्धो मत्
नि कथादौ विशिष्टश्रद्धावान् ततः निर्विण्णो निर्वेदस्य संसारतापस्य त्यागे न कदाचित् निर्वेदो नातिसक्तः नित्यसंसर्गो भोगत्यागं न करोति किन्तु विषयानु
गो तिसक्तस्य पुरुषस्य एवंभूतस्य भक्तियोगो मुख्यभक्तिर्वा मुख्यसिद्धिदः इत्यर्थः। उक्तमेतल्लक्षणं देवानां मध्ये दिव्या एव भक्तियोगिन इत्यर्थः।
भगवद्गुणानुसारेण वेदार्थो निश्चितो हि येन भक्तियोगास्तु तेषां कामाद्या हि गुणाः सदा अंगानुसारि वेदार्थं ज्ञात्वा तदनुसारतः भगवद्गुणा
येन निर्णीतं तेषां ज्ञानयोगिनः कर्मणि शास्त्रसंजातत्वात् तदाधान्यानुसारतः। विज्ञानवैर्गुण्यविशेषोऽज्ञेयास्तेषु कर्मयोगिनः भक्तियोगिनो वा
सु विशेषुष्वधिपि जायते। तथापि कर्मयोगास्तेषु केवलं कारणात् भगवद्गुणानुरागित्वमधिकं भक्तियोगिनां। तस्मात् न्यधिकारोऽस्तु ष्ये

यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान्। न निर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः॥८॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता। मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते॥९॥ स्वधर्मस्थो यजन् यज्ञैरनाशीःकाम उद्धव। न याति स्वर्गनरकौ यद्यन्यन्न समाचरे
त्॥१०॥

देवा एव विशेषतः इदं हि साम्यमन्यत्र सर्वं देवेषु जायते। अथापि रागोऽप्यधिको देवानां नात्र संशयः। ज्ञानाधिक्यं तु देवानां भक्त्याधिक्यं तथैव च॥
विरागोऽप्यधिकस्तेषां सदैव सनकादीनां ज्ञानाधिक्यान्मनुष्येभ्योऽप्यन्ये ज्ञानयोगिनः न तु ज्ञानाधिकास्ते वै देवेभ्यः खलु कथं च न दिवानामपि क
र्मित्वं विद्यते यद्यपि स्फुटं। तथापि सत्यपाधित्वान् मनुष्याः कर्मयोगिनः त्रियोगाभ्यधिको ब्रह्मा सर्वेभ्यः परमो विभुः। महायोगेश्वरो योगेशस्तस्माद्गु
रुः वा चतुर्मुख इत्युक्तिविवचनात् तत्समस्तं उक्तं॥८॥ ज्ञानभक्तियोगिनामपि ज्ञानभक्त्युदयात् सर्वं ज्ञानभक्तिसाधनत्वात् अंतःकरणशुद्धिद्वारा कर्म
योगाः कर्तव्यतामर्हतीत्याह। तावदिति दिवादित्वयोग्यानां मनुष्याणां निरंतरं तयैव द्वा कर्मयोगिनमेव विशिनष्टि। तावदिति कर्मणां बंधकत्वे
न ज्ञानभक्तिद्वारा श्रेयः कारणत्वं कथमित्याशंक्य परिहरन् तत्करणप्रकारमाह। स्वधर्मस्थ इति ज्ञानयोगी निराशी निःकामः अन्य
न्निषिद्धं न करोति चेत्॥१०॥

१०२

धि तदधिकारापादक वर्णाश्रमाणां विकल्पं भेदं च प्रतिलोमजो नाधिकार्यनुलोमजोऽधिकार्यनुलोमजो रीतिः प्रतिलोमानुलोमजं च अत्रापि वि
तान शिष्टमातापितृजातो विशिष्टकारी तिच धर्मार्जितद्रव्यं कुरुक्षेत्रादिदेशं। जातपुत्रकृष्णकेशः इत्यादिलक्षणं वयः वसंतादिकालं चेति द्र
व्यदेशवयःकालान्। तथा पुण्यफलं स्वर्गं पापफलं नरकं चापेक्षितमिति सर्वत्र योज्यं॥२॥ संशयबीजमुद्भावयति। गुणेति। तव वचस्तु गुणदोषभि

वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं॥ द्रव्यदेशवयःकालान् स्वर्गं नरकमेव च॥२॥ गुणदोषभिदादृष्टिमंतरेण वचस्तव॥ निःश्रे
यसं कथं नृणां निषेधविधिलक्षणं॥३॥ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर। श्रेयस्त्वनुपलब्धेऽर्थे साध्यसाधनयोरपि॥४॥

दादृष्टिमंतरेण वर्तते॥ विहितप्रतिषिद्धकर्मणां गुणदोषभेददर्शनं विहाय गुणदोषयोर्भेदो नास्तीत्येवं विधं तत्र निषेधविधिलक्षणं विहि
कृतवा तनिषिद्धकरणे हि तु गुणदोषभेददर्शि वचनं कथं नु निःश्रेयसं पुरुषार्थपर्यवसायी स्यात्। तदर्थमेव प्रवृत्तस्य तदनुचितं॥३॥ कुतो
त्राह। पितृदेवेति हे ईश्वर तव वेदो नुलब्धेऽर्थे अप्रत्यक्षे स्वर्गधर्मादिविषये साध्ये सुखादौ साधने कर्मादावपि पित्रादीनां श्रेयश्चक्षु
र्दिव्यमेव चक्षुरित्यन्वयः॥४॥

१०३

मानुषत्वमवाप्य संसारसमुद्रतरीं स्वभक्तिमकुर्वतः पुंसोऽधःपात एवेत्याह। नृदेहमिति। सुष्टुकल्पं दुर्लभं स्वदभीष्टसाधनं प्लवं संसारनदीतर
मानुषत्वमवाप्य संसारसमुद्रतरी। मयानुकूलेन नभस्वता वायुनेरितं नृदेहं प्राप्य यः पुमान् भवाब्धिं मध्ये न तरेत् स मार्गे तटं लिङ्गे न प्राप्य मा
न यानतरीं गुरुरेव कर्णधारो यस्य स तथा तं। अधःपतनं त्वन्वयः। मद्भक्तिगुरुत्वाभावान्नरकं भूमिं प्राप्नोतीत्यर्थः॥१७॥ उपास्तिप्रकारमाह। यदे
विनारब्धसंस्कारनाशे शरीरनाशे अधःपतनं त्वन्वयः। मद्भक्तियुक्तो योगी यदारम्भेषु कर्मसु परिक्लेशेषु निर्विण्णो आत्मनो अभ्यासेन पुनः पुनः अयत्ने नमनो बलं ध
ति। योऽपरमात्मनि विरक्तो निरतिशयोऽहं तत एव तं यतेन्द्रियो योगी यदारम्भेषु कर्मसु निर्विण्णो आत्मनो अभ्यासेन अभाव्यमिति भावेनाह। धार्यमाणमिति। यहि यदा धार्यमाणम
र यति॥१८॥ इन्द्रियविषयोपरक्तं मनसो बलत्वेन धारणं दुष्करमपि प्रयत्नेन नैर्भाव्यमिति भावेनाह॥

नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं॥ मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा॥१७॥ यदारम्भेषु नि
र्विण्णो विरक्तः संयतेन्द्रियः॥ अभ्यासेनात्मनो योगी धारयेदचलं मनः॥१८॥ धार्यमाणं मनो यर्हि भ्राम्यदाश्वनवस्थितं॥ अतन्द्रितोऽनुरो
धेन मार्गेणात्मवशं नयेत्॥१९॥ मनोगतिं न विसृजेज्जितप्राणो जितेन्द्रियः॥ सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत्॥२०॥ एष वै पर
वे मो योगो मनसः संग्रहः स्मृतः॥ हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतो मुहुः॥२१॥ व्यो

पि आशु विषयेषु भ्राम्यत् लब्धेऽपि अनवस्थितं तदाप्यतन्द्रितो निरालस्यो भूत्वानुरोधेनानुकूलेन मार्गेणात्मवशं नयेदित्यन्वयः॥१९॥ दम्यो
ऽपि पुनरुक्तमाह मनसि। अगतिं विरुद्धगतिं विषयगतिं प्रति। नाभावोऽन्यविरोधश्चेति यावत्॥२०॥ सत्त्वगुणसंपन्नया सर्वेषामेव मनस
संयमनं धावनादिभ्य उपसंहरति। एष इति। अभ्यासेन नत्वक्तेति यदेव राज्ये एव गृह्यत इति। एतस्य संवादमाह। वाक्य इत्यनेन योगोपायः संग्रहः संय
मः मनःसंग्रहेणैव किं स्यादित्याह। हृदयेति। हृदयज्ञत्वं अभिप्रियत्वमन्विच्छन् मनो यच्छेदिति शेषः। ततः किमत्राह। दम्यस्येति। अभिप्रियत्वमिच्छतः पुंसः
मत्प्रसादेन तत्रेन्द्रियनिग्रहश्च भवतीति शेषः। मुहुरित्यनेन क्षणमपि विषयानुगतं न स्यादिति ध्वनयति॥२१॥

१०३

५

अस्तु मनो वशं नयेदिति। तत्केन प्रकारेण स्यादिति तत्राह। सांख्येनेति। यावन्मनः प्रसीदति तावत्सर्वभावानां ब्रह्मादिसर्वपदार्थानां सांख्येन तत्त्व
ज्ञानेन प्रतिलोमानुलोमतः भवाप्ययौ अनुक्रमतः सृष्टिं व्युत्क्रमतः संहारमनुध्यायेद्धरेरिति शेषः। अनेनैव योगेन मनः प्रसन्नं स्यात्॥२२॥ किम
न्याह। निर्विण्णस्येति। निर्विण्णस्य स्वर्गादिविषयभोगोऽनित्य इति ज्ञानवतः तत एव तस्मिन्विरक्तस्य घोषभवाभ्यासबुद्धिरहितस्यात्मवेदिनः अ
त्मना त्वविवक्तृत्वस्य दौरात्म्यं कामक्रोधादि चिन्तितस्य ध्यानविषयस्य हरेरनुचिन्तया पुनः पुनर्निरन्तरस्मरणेन मनस्त्यजतीत्यन्वयः॥२३॥
स्मरणात्पूर्वभाविनो यमादयोऽप्यवश्यका इति भावेनाह। यमादिभिरिति। अफलत्वादयो यमादिभ्यः सुखसाध्यो पायान्तरमाह। ममार्चेति। अर्चा प्रतिमा ह
रिः सन्निधानस्य मुख्याधिष्ठानत्वात् प्रतिमेति शास्त्रोऽप्यत्र विवक्षित इति ज्ञातव्यं। तत्राप्यशक्तानां स्याद्वरं स्वयमाह। पुनरपि विकल्पे तिर्किं नेत्यो

सांख्येन सर्वभावानां प्रतिलोमानुलोमतः॥ भवाप्ययावनुध्यायेन्मनो यावत्प्रसीदति॥२२॥ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः॥ मनस्त्य
जति दौरात्म्यं चिन्तितस्यानुचिन्तया॥२३॥ यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया॥ ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः॥२४॥
यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं॥ योगेनैव दहेदंहो नान्यत्तत्र कदाचन॥२५॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः॥
विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः॥२६॥

ह। नेति। एतैरुक्तैरुपायैर्विनान्यैरुपायैः क्षिप्तं इति निरोधलक्षणं योग्यं मनो न स्मरेदित्यर्थः॥२४॥ योगिनः प्रमादिकपापपरिहारोपायप्रकारमाह। यदी
ति। योगेन ध्यानेन। अन्यं यत्नं न कुर्यादिति शेषः। यत्र मिति पाठे अन्यत्प्रायश्चित्तं नास्तीत्यर्थः॥२५॥ विहितो हितकरणं योगगुणदोषत्वात्तावेकस्योभयं वि
वत्तु प्रियाप्रियनिबन्धनत्वेन गुणदोषत्वं स्तुत्वमाक्षेपं परिहरति। स्वे स्व इति। उभयोर्गुणदोषयोरेष निर्णयस्तत्त्वतः। विधिनिषेधबद्धैर्नादिजन
प्रति मयास्य मधिकारस्तु यदत्तोपमधिकारस्तस्मिन्निति। यथा यथोपदिष्टं स्यात्तथा स्वेऽधिकारे विहितकर्मणि या निष्ठा व्रतं नियमः स गुणः मलीनि
क जनत्वात्परिकीर्तितो न्यायशिष्टैः। विपर्ययेनाधिकारेऽविहितकर्मणि या निष्ठा सदोषः परिकीर्तितो मदप्रीतिहेतुत्वात्। अनुशब्देन निषिद्धस्य ब्रह्म
हत्यादेर्गुणत्वं विहितस्याप्यसुरादिकृतस्य दोषत्वं च वक्ति। इन्द्रो वै वृत्रं हत्वा महानासीत्। यद्विप्रागुणो मलकं प्रगुणा तिरत्यादि वचनाद॥२६॥

विषयेण निकारे अविहितकर्मणि यानि च्छासदोषः परिकीर्तितो मदर्शीति हेतुलात् तु शब्देन निषिद्धस्य हत्यादे गुणत्वं विहितस्य विहिताविहि
तकरणाद्गुणदोष नियमोक्तिः भगवत्प्रियाप्रियविषयत्वाशयेनाह। कर्मणामिति। विधिनिषेधात्मको वेदस्य शुद्धानां खतः अशुद्धानां कर्मणां दोजा
नियमेणैव गुणदोषभेदमपेक्षत इतियो नियमस्तस्यैव कृतः नियमोऽमदिष्टो गुणेण मदनिष्ठो दोषः इति विवेकमशुद्धानां पुंसां नितु सिद्धानां पक्ष इति ता
विहितकारणेन गुणो निषिद्धकरणे न दोषः इत्यनेन गुणदोषविधानेन हसां त्याजनेच्छया नियमो मया कृतः खलो शुद्धानां गुणत्वं कथं स्यादि
त्यत उक्तं। विति विध्यनुसारेण अनुष्ठाने गुणत्वमेव स्यादित्यर्थः। विध्यनुसारित्वं च मत्प्रियोपहितत्वमित्यपि विशेषणं तु शब्द एव वक्ति॥ भग व

कर्मणां जात्यशुद्धानामनेन नियमः कृतः। गुणदोषविधानेन त्वं हसां त्याजनेच्छया॥२७॥

प्रियाप्रियत्वे गुणदोषयोः कारणत्वं वेदे तद्विधानं किमर्थं क्रियत इत्यत आह। कर्मणामिति। गुडजिह्विकान्यायेनां हसां त्याजनेच्छया स्वतोऽशु
द्धानां कर्मणामनेन गुणदोषविधानेन नियमः कृतो न तु प्रियाप्रियत्वे निषेधेन कर्मबहिर्मुखानां कर्मणि बुध्यवतारार्थं शास्त्राचं दुन्याय्य वदत् अशुद्धानां
जात्यशुद्धानां शुद्धत्वं न स्यात्। अतो मत्प्रियाप्रियत्वे गुणादयः कारणं अनेन वित्तमहत्पुण्यं कर्म करोतीति तद्वाक्यात् ततः क्षीयत एवेति शुते रि
त्यर्थः। गुणदोषयोः कारणं भगवत्प्रियाप्रियत्व नियमः कस्मादित्यत आह। कर्मणामिति। अहं सां त्यागेच्छया जात्यशुद्धानां कर्मणामनेन
गुणदोषविधानेन मत्प्रियत्वाप्रियत्वनियमः कषायोपरि चूर्णवद्वस्य यथा जात्यशुद्धानां पापहरणसामर्थ्यं तु दयादविकिल्विषेव
यथार्पकेन पंको भवतीति बहूनादतो मत्प्रियत्वेन मदर्पणेन कर्मकर्तव्यमिति भावः॥२७॥ न्य

१०४
राम
८

विहितकर्मणा स्वर्गादिकमप्राप्यं चेत्किं तर्हि लभ्यमत आह। अस्मिन्निति। वैलाह्यउपमाने समुच्चये वा। यथा ज्ञानमाप्नोति तथा भक्तियोगी मद्भक्तिं वा
कर्मयोगी स्व शुद्ध ज्ञानभक्ती। ज्ञानभक्तिसाधनत्वान्मनुष्यशरीरमुत्तममित्याह। स्वर्गिण इति। लोकं देहं निरयिणः नारकाः ज्ञानभक्तिभ्यां पुरु
षार्थसाधकं तदुभयं स्वर्गे नरकस्य शरीरं ज्ञानभक्त्योरसाधकं फलरूपत्वात् तस्मान्मानुषमुत्तममित्यर्थः॥१२॥ भु भूखुयानरक स्वर्गमनुष्य
गतयः स दुःखत्वात्प्रमादहेतुत्वाच्च नाकांक्ष्या इत्याह। न नर इति। इमं मनुष्यलोकं देहावेशात्प्रमाद्यति प्रमादवान् भवति। ननु तर्हि निराकां
क्षस्तु नरकाय किमत आह। एवमिति। पूर्वोक्तप्रकारेण स्वर्गादीनां दुःखादिमत्वाद्विद्वान् इदं मनुष्यशरीरं मर्त्यमप्यर्थसिद्धिदं ज्ञात्वा मृत्योरभवाय

स्थो। अस्मिन्लोके वर्तमानः स्वधर्मस्थोऽनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया॥११॥ स्वर्गिणोऽप्येतमिच्छंति लोकं निरयिणस्तथा॥
साधकं ज्ञानभक्तिभ्यामुभयं तदसाधकं॥१२॥ न नरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्षणः। नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति॥१३॥
एवं विद्वान् पुरा मृत्योरभवाय घटेत सः। अप्रमत्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं॥१४॥ छिद्यमानं कालनयमैः कृतनीडं वनस्पतिं। खव
गः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः॥१५॥ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः। मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति॥१६॥

संसारस्योन्मूलनाय घटेतेत्यन्वयः॥१४॥ किं वा तदुल्लभ्याह। छिद्यमानमिति। रुद्रैरिद्रियैर्गोछतिजनातिविषयानिति खगो जीवः कालाव
यवैः स्फटिकादिलक्षणैः छिद्यमानं स्वदेहमुत्सृज्य क्षेमं मोक्षं याति। अलंपयो विरक्तो ज्ञानसामग्री बीजं कुर्यत्र भव। खे गच्छतीति खगः
पक्षी न लक्षेदनरतिथितोऽकालावयवैः परश्वादिनिशितमधैः छिद्यमानमात्मना कृतनीडं वनस्पतिं विहाय क्षेमं प्राप्नोति सामिवः अलं
पटउत्संतनसमर्थेश्चपटगतासिति धातुः॥१५॥ उक्तमेव विशदयति अहोरात्रैरिति। परंपरमात्मानं संसारादुपशाम्यतिपरं हस्तांतरं उपग
पपूव म्य शाम्यति शांत दुःखो भवति निरीहः निर्गीत हस्थिष्टः॥१६॥

२५

कर्मादिना प्राप्यं यच्छ्रेयो न तत् लब्धं स्यादित्याशंक्याह मा भूदित्यर्थः। यत्कर्मभिरिति। यदि वांछति तर्हि लभते न तत्रैत्तरापेक्षास्तीत्यर्थः। योगेन प्राणायाम लक्षणेन ध्यानेन वा ।३३। ननु यदीति युष्यते रागिणां तेषां सर्वाभिलाषसंभवादिति तत्राह। न किंचिदिति। रागिणो पि ते भक्तिफलत्वं ध्यानादि किंचिद्वांछंति ।३४। सुखं न वांछंति वेत्ते दुःखयोग्यात् किं नेत्याह नैरपेक्ष्यमिति। नैरपेक्ष्यमकल्मषं निष्पापं परं श्रेष्ठं निःश्रेयसं प्राहुरिति यत्तस्मात् । ते देवदेवपरायणानां तेषां स्वतः किं सुखफलत्वं फल अन्यथा पापाणत्वमपि निःश्रेयसः स्यादित्याशंकां परिहरन्नुपसंहरति। तस्मादिति। निराशिषः संसारविषयविमुक्तस्य मेरूकप्रस्था निरपेक्षस्य तस्य मत्प्राप्तिरानंदरूपिणी भवेदित्यन्वयः। यतो भक्तिविषयेण भक्तायफलं देयं सतः इति। यदि दद्यात् तर्हि भक्तियोगफलं मोक्षम

न यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् ॥ योगेन दानधर्मेण श्रेयोभिरितरैरपि ॥३२॥ सर्वं मद्भक्तियोगेन मद्भक्तो लभतेंजसा ॥ स्वर्गापवर्गं मद्धाम कथंचिद्यदि वांछति ।३३। न किंचित्साधवो धीरा भक्ता ह्येकांतिनो मम ॥ वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवं ।३४। नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्पकं ॥ तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ।३५। न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः ॥ साधूनां समचित्तानां बुद्धेः परमुपेयुषां ।३६।।

पीश्वरः। भक्तियोगफलत्वेन न तद्गृह्णाति युरेवेत। कामिनो पि स्वयं कामान् भुंजते न फलात्मना ॥ तस्माद्विरागेप्यधिकादेवारवहिताद्धा। तस्मादाकात् मुक्तिफलाभक्तिलक्षणता धनस्याधिकानंदबुद्ध्यर्थः ।३६। भक्तियोगिनो रागिणां वै तेषां विषया गुणदोषोद्भवका स्फुरंतीति तत्राह नेति। कामित्वेपि तेषां भक्तिफलात्मना विषयभोगाभावात् गुणा विषयाः गुणदोषोद्भवका न भवंति कुतः समचित्तानां समत्वेन मायिकविहितकारणात्कद प्रियनिषिद्धवर्जनात्। एतदपि कुतः बुद्धेरिति। बुद्धेः प्रकृतेः परमात्मा कामानां भेदकहितकरणत्वस्य युक्तित्वादित्यर्थः। अनेनैषां वैराग्यमपि पु आधिक्यमित्युक्तं भवतीति तदुक्तं। कामिनोपि स्वयं कामान् भुंजते न फलात्मनेति ।३७।

१०५

कर्माणामपि योगिनां फलमाह। एवमेतानिति। कर्मयोगिनः क्षेमं विंदंति तत्र ज्ञानयोगिनो वैकुंठादि मत्स्थानं भक्तियोगिनो ब्रह्मतत्त्वापि मुख्यभक्तिभाजू ब्रह्म परमं ब्रह्म विंदंतीति। उत्तमो भक्तियोगस्ततो ज्ञानयोगस्तु मध्यमः। अधमः कर्मयोगश्च ब्रह्मैको मुख्यभक्तिभाजूः। ज्ञानमप्यधिकं तेषां निर्वेन भक्तियोगिनां। उदेति भगवद्भक्त्यात्तद्वज्ज्ञानयोगिनः। भक्त्यंशकं यतो ज्ञानं हरनं स्नेहात्मिका हि सा। तथापि ज्ञानयोगित्वं मानुषज्ञानतो धिकं। भक्तियोगततोप्यत्रः कार्यो बुद्धिमिरंजसे। यतः तारतम्यमवगंतव्यं। ।इति एकादशे विंशोध्यायः॥ ॥कर्मयोगिनां भगवत्प्रियत्वेन द्व्यदेशादिपूर्विरुत्थनपूर्वकं कर्मकरणप्रकारं वक्तु फलमिति अध्यायोनत्र कथितानां यागामप्यकर्मनुष्ठितां गतिमाह। य एतानिति। भक्तिज्ञानक्रिया न

एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः। क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ।३७॥ ॥इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे विंशोध्यायः॥ ॥श्रीभगवानुवाच॥ ॥य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान्। क्षुद्रान्कामांश्चलैः प्राणैः जुषंतः संसरंति ते॥१॥ स्वे स्वेधिकारे या निष्ठा स गुणः परिकीर्तितः॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्चयः।२। शुद्ध्यशुद्धी विधीये ते समानेष्वपि वस्तुषु॥ द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ ।३।

निकां भक्तिज्ञानकर्मयोगविषयां यथा गुणदोषौ मत्प्रियाप्रियौ पहितविहिताबहितकरणनिबंधनौ एवं गुणदोषमूलपुण्यपापनिबंधने शुध्यशुद्धी। अपि वर्तृनिधानविशेषतदभावरूपे। १। आसयणजात्यधिकतेदृतिं हर्वत्किानुवादसर्वशुध्यशुद्ध्यव्यवस्थामाह। स्वे स्वे इति। उक्तार्थायं ।२। पंचभूतात्मकत्वेन समानेष्वपि वस्तुषु। द्रव्यस्य शुध्यशुद्धी गुणदोषौ च शुभाशुभे च मत्सन्निधानविशेषतदभावरूपत्वे न विधीयेते किमर्थमत उक्तं विचिकित्सार्थं शुध्यशुद्धिविवेकज्ञानेन पुंप्याधिकेन सुरवाधिक्यं भवतीति ज्ञापनार्थमिति। पंचभूतात्मकत्वेन समानेष्वपि वस्तुषु। हरिसन्निधिकेरेयो द्विशेषस्य महान्भेदेति वचनात् ।३।

ना० ई
१०६

एतदेव विवृणोति धर्मार्थमिति। हुकृतादिप्रयोजनमुद्दिश्य धर्म्यं धर्मसाधनं धुरमुद्वहतां मया यात्रार्थं शरीरयापनार्थं।।४।। भूम्यम्बु इत्युक्तमेव विवृणोति भूमीति। स्थावरादीनामाब्रह्मपर्यन्तादीनां भूतानां जीवानामात्मना परमात्मना संयुताः शारीराः भूम्यादयः पंचधातवो महाभूतानि।।५।। पंचभूतात्मकत्वेन समानेष्वपि स्थावरादिब्रह्मान्तेषु धातुः परमेश्वरः यद्वा धातुः पृथिवी मितिश्रुतिः तस्य सन्निधान विशेषाद्गुणधैर्ये तत्सन्निधानविशेषात्तद्गुणधैर्येण भेदेन तारतम्यलक्षणेन विषमाणि नामरूपाणि विकल्प्यन्ते विधित्वेन कल्प्यन्ते व्यवहारयोग्या वि

ब्रह्म

धर्मार्थं व्यवसायार्थं यात्रार्थमिति चानघ। दर्शितोऽयं मयाचारो धर्म्ममुद्वहतां धुरं।।४।। भूम्यम्ब्वग्न्यनिलाकाशा भूतानां पंचधातवः। आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः।।५।। वेदेन नामरूपाणि विषमाणि समेष्वपि। धातुषूद्धव कल्प्यन्त एतेषां स्वार्थसिद्धये।।६।। देशकालादिभावानां वस्तूनां मम सत्तम। गुणदोषौ विधीयेते नियमार्थं हि कर्मणां।।७।।

योग्यानि क्रियन्ते विद्वद्भिर्मया चेति शेषः। किमर्थमेतेषां देहिनां स्वस्वलक्षणानां जीवानां स्वार्थसिद्ध्यै स्वस्वयोग्यपुरुषार्थसिद्ध्यर्थमिति। आब्रह्मस्थावरादीनां आत्मतिलक्षणता न योग्यानामित्यर्थः तस्य स्मरणायेर जदिति वचनात्। यद्यद्देहे संहितं तत्तद्गुद्धतरं मतं।। खतः शुचिनमो विष्णुः सान्निध्यं च स्वभावतः इति वचनात्। देशादीनां स्मृतिस्मृतिलक्षणी मम मुखेन कृतं वचनमेव गुणदोषप्रयोजकं किंचिदित्याह देशेति। अयं देशोऽयं कालः एतद्द्रव्यमितीमानि कर्मयोग्यानि नेतराणीति मम वचनात् देशादीनां गुणदोषौ विधीयेते। कर्मणां नियमार्थं फलसाधनार्थं।।७।।

राम
१०९

सत्त्वियाप्रियविवेकत्वेन गुणदोषविदो भक्तियोगिनो देवात्त्याज्यत्वेन भक्तियोगिनां स्थितिं विदधानो निगमयति। जातश्रद्ध इति। यतो मत्प्रियाप्रियानिर्बन्धो गुणदोषौ ततो मां भजेतेत्यन्वयः। कीदृशो भक्तियोगी आरब्धाददृष्टाद्विषयपरित्यागेऽनीश्वरो विशारदज्ञानेन मत्कथासु जातश्रद्धत्वेन सर्वकर्मसु निर्विण्णोऽपि कामान् विषयान् दुःखात्मकान्वेदयन्।।२८।। यः श्रद्धावान् प्रीतः सन् दृढालुः प्रेत्यापि भगवद्रूपास्तिं न मुञ्चतीत्यर्थः। अत एव दृढनिश्चयो भवन् विरोधिनः कामान् जुषमाणस्तु दुःखोदर्कानभिषिद्धान्कामान् गर्हमाणस्सन्नित्यर्थः। विषयसेविनो योगिनः कर्दमगर्ते पतितवत्तत्कदापि स्यान्नेनस्यादित्यर्थः तद्गुणफलमाह प्रोक्तेनेति। उक्तलक्षणेन भक्तियोगेन असकृत्सदा निरन्तरं मां भजतो मुनेः परोक्षज्ञानिनो भक्तियोगिनो हृदि स्थिताः अनभीष्टाः का

श्र

जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु। वेद दुःखात्मकान्कामान् परित्यागेऽप्यनीश्वरः।।२७।। ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः। जुषमाणश्च तान्कामान् दुःखोदर्कांश्च गर्हयन्।।२८।। प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः। कामा हृदय्या नश्यन्ति सर्वे मयि हृदि स्थिते।।२९।। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि।।३०।। तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः। न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह।।३१।।

माः सर्वे निर्मूलं नश्यन्ति। नश्यन्तीत्यत्र हेतुर्मयि हृदि स्थिते प्रकाशमाने सतीति।।२९।। एतदेव विवृणोति भिद्यत इति। हृदयग्रन्थिः प्राकृतानां करणाख्यो बन्धः लिंगशरीरलक्षणः। अखिलात्मनि सर्वगते मयि दृष्टे अपरोक्षितस्सतीति शेषः।।३०।। यस्मात्सर्वकर्मणां विनाशो न किंचिदुक्तस्योपमर्दे उत्तरस्य अपेक्षितं भक्तियोगिनः सर्वपुरुषार्थो ततः तस्मादिह जीवशरीरे मदात्मनो मदेकचित्तस्य मद्भक्तियुक्तस्य योगिनो ज्ञानवैराग्ये नापि श्रेयो न भवेत् वैराग्यात्तु तस्मादित्यन्वयः। नन्वेवं तर्हि ज्ञानवैराग्याभ्यां श्रेयः उक्तिः कथमित्यत आह यदिति। भक्त्यनुसारि ज्ञानवैराग्यं विना अन्यस्मात् ज्ञानवैराग्याच्छ्रेयो निषिध्यते दिवानीरागित्वेऽपि भुक्तिसंभवात्। रागिणोऽपि विमुच्यते देवात्सत्यत्र संशयः। रागाय नो दनायेवं वज्ञानं साधयन्ती श्वरैरितिवचनात् किं च स्मृते व्यवहारविषये दोषाय तामिन्नेतट्टे वनेः। हरिरेवसदाराध्यस्त्वस्थं देवतेरपीति।।३१।।

श्रमोन भवे

प
भजना।
तः

कीदृशा देशाः शुचयस्स्युरित्यत आह। कृष्णसार इति। ब्राह्मणानां कर्मकरणाय कृष्णसारो नाम मृगो देशानां शुद्धिः शुद्धिकरो भवेत्॥ कृष्णसारो यं देशमधिव
पि सति स देशः शुचिरित्यर्थः। अथ [illegible] कृष्णसारविधुरोऽपि देशः शुचिरिति निरूपयति। नदीसमुद्रगिरयः आश्रमाश्च वनानि च नगराणि च दिव्यानि साल द्र
ग्रामादयस्तथा॥ तेषां समीपगाश्चैव देशा योजनमात्रतः। कर्मण्यास्ते समाख्यातास्तदन्ये कीकटाः स्मृताः॥ तदन्येऽपि तु ये देशाः कृष्णसारो विनाः स्थलः।
कर्मण्या एव ते ज्ञेया इति वचनात्। उक्तस्यापवादमाह। कृष्णसारोऽपीति। कृष्णसारेऽपि सौवीरकीकटासंस्कृतेरिणेभ्योऽन्ये देशाः शुचिहेतुः। एषां स्थलवासोऽपि स्य
ने शुचिकरो नेत्यर्थः। खर्परादूषितो देशोऽसंस्कृत इत्युच्यते। तदुक्तं। यस्मिन् शुषिता खले रितिनि त्रापि विशेषोक्ती तु तुक्तं। खलेर ध्रुषिताश्चापि यदि सन्निरुधि
ध्रु

कृष्णसारोऽस्ति देशानां ब्राह्मणानां शुचिर्भवेत्॥ कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणो॥ ८॥ कर्मण्यो गुणवान्
कालो द्व्यंतः स्वत एव वा॥ यतो निवर्तते कर्म सदोषो कर्मकः स्मृतः॥ १॥

षिता। कर्मण्या इति विज्ञेया विष्णुलिंगा नियत्रैवेति। ईरणं देश। लावणिकं उषाद्वीपादिकाः। देशान्निरूप्य कर्मयोग्यं कालमाह। कर्मण्य इति। कर्मण्या इति
विज्ञेया इत्यादि वक्ष्यमाणसिद्धांत मर्थं इति प्रकटनाय कर्मण्य इति स्मृत्युक्तशब्दानुवादः। गुणवान् नाहनिस्थानकालः कर्मण्यः यज्ञादिकर्मयोग्यः सर्वादि वि
धः। द्व्यंतः स्वत इति। वा शब्देन द्वावपि योग्याविति विवक्षि। एवशब्देन तृतीयो नास्तीति निश्चीयते। द्व्यंतः कर्मण्यो वसंतादिलक्षणः स्वतः कर्मण्यः सं
ध्यादिलक्षण४ कालस्य गुणवत्त्वं नाम किं येन कर्म वर्तते इति। तं विविनक्ति यत इति। यतो यस्मिन्काले निषिद्धात्कर्म निवर्तते न क्रियते स कालः सदोषो नि
षिद्धः। अकर्मकः कर्मानर्हः निशीथादिलक्षणः स्मृतः। निशीथो मध्यमा रात्रिः राक्षसानां तु गोचरे इत्यादिना यतो दोषात्कर्म निवर्त्यते नेन दोषेणाश्रुक्तः का युतः
लः सदोषत्वादकर्मकः॥ २॥
तिथि।

पु॰ मा॰
१०७

ई अत्र

द्रव्यस्य शुध्यशुद्धी प्रकारोपि बहुविध इत्याह। द्रव्यस्येत्यादिना। ताम्रादेर्द्रव्यस्याम्लादिद्रव्यसंयोगेन शुद्धिः। भांडादिद्रव्यस्य तूच्छिष्टामेध्यसुरादिसंयोगेनाऽशुद्धिः महतां वचनेन च शुध्यशुद्धी स्तः। तद्यथा अभक्ष्यत्वं यतिपात्रत्वं च ब्रह्मबुनोदृष्टं। केषांचित्प्रक्षालनादिसंस्कारेण शुद्धिः गर्भयानमर्सस्कृतवाप्यादेः केषांचिदयोग्यापहृतगृहादिद्रव्यविप्रोषाणां कालतः शुद्धिः अश्मादीनां कालेनाशुद्धिः अन्नादीनां महत्त्वे श्वादिस्पर्शे स्पृष्टांशत्यागे नशिष्टस्य शुद्धिः अथ वा त्रस्याल्पतया अन्नत्वेन शुनास्पृष्टस्य तस्य शुद्धिः। अल्पस्यापि पापस्य पिपीलिकाहवेनादिरशुदित्वं नाम हतो द्रव्यस्य च धात्रशुद्धिः शक्त्या शुद्धिः शक्तस्य पुंसः तीर्थयात्रादिना ब्राह्मण वचनादिना वा शुद्धिः। अशक्तस्य ज्वरादिरोगपीडितस्य देवार्चनादिलक्षणेन नित्यकर्मानु (शुद्धिः संस्कारेण शुद्धिः १)

या द्रव्यस्य शुध्यशुद्धी च द्रव्येण वचनेन च। संस्कारेणाथ कालेन महत्त्वाल्पतयाथ वा॥१०॥ शक्त्याशक्त्या च वाग्बुद्ध्या समृध्या च तथात्मनः॥ न

अन्ये शुध्यंतीति हि तथा देशावस्थानुसारतः॥११॥ धान्यदार्वस्थितन्तूनां रसतैजसचर्मणां॥ कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः॥१२॥

ष्ठानेन शुद्धिः अशुद्धस्यापि महतां वा वाक्शुद्धिः अशुद्धस्यापि बहूनां वा वा तच्छुद्धिः बुद्धिरपि शुध्यशुद्धी हेतुस्तथाहि। सुरापानादि पापनिश्चये अशुद्धिः हरिकथाश्रवणादिषु पुण्यनिश्चये शुद्धिः। तथा समृद्धिः संपदात्मनः शुध्यशुध्योः कारणं महापात्रदोदिसर्व्ययेन। असत्यान्नदानगणिकादिभोगविषया समृद्धिः (द्ध)

द्धवसंवादे पंचविंशः। ।श्रीभगवानुवाच। मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः। आनंदं परमात्मानमात्मस्थं समुपैति मां। १।
गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया। गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः। २। वर्तमानोपि पुमान्युज्यते नावस्तुभिर्गुणैः। ३।

सत्यात्मन्मद्धर्मे भागवतसंज्ञे आत्मस्थं हृदिस्थं तं समुपैति दर्शनेनेति शेषः। पश्यतीत्यर्थः दृष्टत्वं स्वस्य यावद्देहपातं स्थितिसकारमाह। गुणमय्येति।
पुमान् ज्ञानी अवस्तुभिरमंगलैः गुणैः शब्दादिभिर्न युज्यते न संबध्यते योग्यतातिरेकेणासेवनात्। तत्र कारणमाह। ज्ञानेति। परतत्वापरोक्षज्ञान दृष्टिरूपतबा
निष्ठया गुणमय्या सत्वादि गुणारूपया जीवयोन्या लिंगशरीराख्यमायया विमुक्तस्तदभिमानरहित इत्यर्थः। मायामात्रेषु प्रकृतिनिमित्तेष्ववस्तुतो
स्वातंत्र्येण दृश्यमानेषु गुणेषु शरीरेषु वर्तमानोपि। वस्तुत्वं न स्वतंत्रमुद्दिष्टमस्वतंत्रमवस्तुवेति वचनं वस्तु तत्त्वनेन मिथ्यात्वमुच्यते।
तन्निरत्यर्थं साधनसामग्रीविधानं व्यर्थापत्तेरिति। २।

भा. ११.
१३४

सुखभेदमाह। सात्विकमिति। आत्मोत्थं परोक्षज्ञानं शास्त्रश्रवणसंज्ञानं यत्तस्मादात्मनो मतेर्जानादुत्थं सुखं सात्विकं। परोक्षज्ञानमात्मोत्थं उत्थाने
मद्भावाश्रयमदपरोक्षज्ञानजन्यं सुखं निर्गुणं। आपरोक्ष्येण दर्शनं। विष्णावाश्रयं सुखं नित्यं गमयेत्तत्प्रसादितद्दृति। भगवतः स्वरूपसुख भिदं नेत्य
भा तो नद्दाश्रयमित्युक्तं। नतु विष्णोः स्वरूपं तु सुखं केन विदाप्यते। तस्येन विषयत्वात्तु तत्सुखं चेति कथ्यते। परोक्षज्ञानगोचरत्वाद्विषयस्वेमनोगतः। अ
नआत्मोत्थमित्येव सुखमाहुर्विपश्चितइति वा।।२९।। किंबहुना सर्वपदार्था त्रिगुणसंबंधेन त्रिविधाइत्याह। द्रव्यमिति। फलं स्वर्गादि कालः ज्ञानादि

सात्विकं सुखमात्मोत्थं विषयोत्थं तु राजसं।। तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयं।।२९।। द्रव्यं देशः फलं कालो ज्ञानं कर्म च कारकः।
श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व एव हि।।३०।। सर्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्ष
भ।।३१।। एताः संसृतयः पुंसां गुणकर्मनिबंधनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः।।३२।। भक्तियोगेन मन्निष्ठो मद्भावाय प्र प द्य ते

जीवनमुक्तस्य भ। भजनसादेन

अवस्थाजाग्रदादिलक्षणा। आकृतिः क्रियानिष्ठा वृत्तं। तदेव विवरणेनाति। सर्वइति। पुरुषेण विष्णुना अव्यक्तेन प्रकृत्या च अधिष्ठिताः अवस्थापि
ताः सत्वादिकृतसंसारजयोपायमाह। दृष्टमिति। बाह्यं दृष्टं श्रोत्रेण शास्त्रेण श्रुतं बुद्ध्या वा शास्त्रार्थरूपेण दृष्टं वा परं अनुध्यातं अनुध्यायेत् निरंतरं स्मरे
त्।।३२।। अनेन ध्यानेन किं फलमत आह। एताइति एवमुपासकेन येन जीवेन चित्तजाताः सत्वादिगुणा निर्जिताः तेन गुणकर्मनिबंधनाः संसृत
यश्च प्रायुक्ता निर्जिता भवंतीति शेषः।।३२।। ननु त्वत्प्राप्तिमंतरेण संसृतिजयेन किं तत्राह। भक्तीइति।।३३।।

भाग
१३४

मथितमाह। तस्मादिति। ज्ञानविज्ञानयोः संभवो यस्मात्तस्तथा तं अवधानेन। शास्त्रद्वारा जातं ज्ञानं अपरोक्षेण जातं विज्ञानं निर्गुणमिति निसंगिरंते। सत्वाद्गु
णसंगं गुणस्पर्शं नमयेयः धूनयेयः धुरिता धीना पुरुषो वा हि विषमेषु नाचरेत्। अंतर एव रद्विषे न्यूत्यागात् निर्विषयत्वेन चरेदित्यर्थः। संसारस्यातत्वा दर्शितोहत
स्मिन्नायिरतो भवेदिति वा। अंतरछिद्रादि दृश्यतीनं चरेत्स्यात् इति वा। अंतो मृत्यं सितमृत्यो स्वभावे परमात्मनि नीति। अंतरो मां विना वृक्षरोदिति वा।।३४।। व
इति श्रीमद्भागवतटीकायां विजयध्वजतीर्थकृतायां एकादशस्कंधे पंचविंशोध्यायः।। ।।अनंतरातीताध्याये सत्वः संगमुत्सृज्य मन्निष्ठेन कार्यमित्युक्तमेवार्थ न
मितिहासप्रदर्शनेन प्रपंचयत्यस्मिन्नध्याये। तत्रादावुक्तमपि ब्रह्मध्यानफलं विध्यासजनाय पुनरप्याह। मल्लक्षणमिति। मां लक्षयतीति मल्लक्षणं बुद्ध्याय स्व तं नमलक्षणं

तस्माद्देहमिमं लब्ध्वा ज्ञानविज्ञानसंभवं। मय्येव ब्रह्मणा धैर्येण निर्धूय विनीतस्थ्यरेत्।।३५।। ।।इति श्रीभागवते महापुराणे एकादशस्कंधे भगवदु
द्धवसंवादे पंचविंशः।। ।।श्रीभगवानुवाच।। मल्लक्षणमिमं कायं लब्ध्वा मद्धर्म आस्थितः। आनंदं परमात्मानमात्मस्थं समुपैति माम्।।१।।
गुणमय्या जीवयोन्या विमुक्तो ज्ञाननिष्ठया।। गुणेषु मायामात्रेषु दृश्यमानेष्ववस्तुतः। वर्तमानोपि न पुमान्युज्यतेऽवस्तुभिर्गुणैः।।२।।

सतथा तं मद्धर्मं भागवतसंतं आत्मस्थं हृदिस्थं तं समुपैति दर्शनेनेति शेषः। पश्यति यथार्थं दृष्टत्वस्य यावद्देहपातं स्थितिप्रकारमाह। गुणमय्येति।
पुमान्ज्ञानी अवस्तुभिरसंगैः गुणैः शब्दादिभिर्न युज्यते न संबध्यते योग्यतातिरेकेणासेवनात्। तत्र कारणमाह। ज्ञानेति। परतत्वापरोक्षज्ञान दृशोपतत्वा
निष्ठया गुणमय्याः सत्वादिगुणारूपया जीवयोन्या लिंगशरीराख्यमायया विमुक्तः तदभिमानरहितइत्यर्थः। मायामात्रेषु प्रकृतिनिर्मितेष्ववस्तुतो
स्वातंत्र्येणादृश्यमानेषु गुणेषु शरीरेषु वर्तमानोपि। वस्तुत्वं स्वतंत्रमुद्दिष्टमस्वतंत्रमवस्तु चेति बचनं वस्तुत्वस्य नेन मिथ्यात्वमुच्यते।
तन्निरस्तं र्थसाधनसामग्रीविधानवैयर्थ्यापत्तेरिति।।२।।

भाग०
१३५

शानां निःसंगतातिरेकेण विषयनिषेवानकार्येत्युक्तं किमुत ज्ञानार्थिनेत्यत्रैकेतिहासमाह। संगमिति। शिश्नोदरतृपः तर्पयंतीति शिश्नोदरतृपः तेषामसतां संगं स्नेहलक्षणं न कुर्यात्। कारणेन बाधकमाह। तस्येति। तस्यासत इति ज्ञाताविक्षसवनं। अनेन विषयसंगेन ज्ञानेन्द्रियेति किं वक्तव्यमित्युक्तं भवति। ।३। संगात्क्लेशानर्थः कस्यचित्कुर्वकरोति निर्वेदश्च भवति विदितं उच्चश्रवस्यमूर्न्यद्भ्वनी शंकां परिहर्तुमैलोपाख्यानमाह। ऐल इति। गाथां श्लोकं बृहच्छ्रवाः जाने घोरेति छिन्नेनेन हे जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृण्वा वहे हे चिन्तीदंक्षयति। वर्षयामिनीः वर्षरात्रीः उर्द्दिश्य यांती गणनां न वेद। अत्रानेहेतुमाह।

संगं न कुर्यादसतां शिश्नोदरतृपां क्वचित्। तस्यानुगस्तमस्यंधे पतत्यंधानुगांधवत्।।३। ऐलः सम्राडिमां गाथामगायत बृहच्छ्रवाः। उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयुतः।।४। त्यक्त्वात्मानं [illegible] तीं तां नग्न उन्मत्तवन्नृपः।। विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः।।५। कामानतृप्तोनुजुषन्क्षुल्लकान्वर्षयामिनीः। नवेदगणनां या[illegible]उर्वश्याकृष्टचेतनः।।६। ऐल उवाच। अहो मे मोहविस्तारः कामकश्मलचेतसः। देव्या गृहीतकंठस्य नायुःखंडा अनुस्मृताः।।७।। नाहं वेदा[illegible] सूर्येणाभ्युदितोमुषा।। मुषितो वर्षपूगानां बताहानि गतान्युत।।८।

उर्वशीति। मोहविस्तारः अज्ञानविस्तारः आयुःखंडाः अहोरात्रविभागाः।।५। उक्तमेव विवृणोति। नाहमिति। अहं वर्षपूगानां संख्यातयोग्यानि गतानि अहान्युत न वेद किमुतान्यानि सूर्योदयादिना ज्ञातुं शक्यत्वात् [illegible] मितदत्राह। अभिनिर्मुक्तः इति। सूर्येणाभ्युदितोहंशः सूर्येणाभिनिर्मुक्तः का लिराज्यं शहतिरपृषा विकृतान भावात् कुतोत्राह। मुषित इ[illegible] संगेन ज्ञानस्य मृतत्वात् अभिनिर्मुक्त इत्यादिराजविभाषा वा।।९।।
मुष्टे

नाम
१३५

६

पुनरपि पश्चात्तापमाह। अहो इति। आत्मा मनो हृत्रिगुणेवा क्रीडामृगश्च कृत इति दोषः।।१०।। क्रीडामृगत्वं लक्षयति। सपरिच्छदमिति हस्त्यश्वादिपरिकरोपेतं।।११।। अनुभावादिगुणे स्त्रीसंगदोषत्वेपनस्यादितित्राह। कुत इति। अनुभवस्तत्वनिश्चयः तेजः सामर्थ्यं ईशत्वं योगशक्तिविशेषः अनेन संगदोषं मात्रैनं तमर्थादेतगुणरहितत्वं भवति। स्मरवाणेनैवनानुगमने हेतुरुक्तते।।१२।। विद्यादयोपि संगदोषेण मात्रं न प्रभवंतीत्याह। किं विद्ययेति। ६

अहो मे आत्मसंमोहो येनात्मा योषितां हृतः।। क्रीडामृगश्चक्रवर्ती नरदेवशिखामणिः।।९। सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं। यांतीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रुदन्।।१०।। कुतस्तस्यानुभावं स्यात्तेज ईशत्वमेव वा। योन्वगच्छं स्त्रियं यांतीं स्मरबाणविताडितः।।११।। किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा।। किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं।।१२।। स्वार्थस्याकोविदं धिङ्मां मूर्खं पंडितमानिनं। योहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः।।१३।। सेवतो वर्षपूगान्मे उर्वश्या अधरासवं। न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा।।१४।। पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचितुं प्रभुः।। आत्मारामेश्वरमृते भगवंतमधोक्षजं।।१५।। बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः। मनोगतो महामोहो नापयात्यजितात्मनः।।१६।।

।।१३। जातनिर्वेदो राजा स्वात्मानं धिक्करोति स्वार्थस्येति। स्वार्थे विषये। अकोविदं स्वप्रयोजनज्ञानपाटवरहितमित्यर्थः।।१४।। आत्मभूरात्मस्थाने कार्यत्वेन अतः कुतिरं कामिरत्नं नेकामइति।।१५।। संसारकामबेरिणिशासि जायतिसमुनास्ती निष्पांक्वनं कथं युज्यत इतितत्राह। आत्मारामइ नि।।१६।। बोधकभावदिदमभूदितिनेत्याह। बोधितस्येति। किमेतया वत्सेत्यादिसूक्तवाक्येन।।१७।।

भा॰ए॰
१२६

स्वस्य स्वरूप ज्ञानेन

एतयोर्वेश्यारहसि रतया किंनु सुखं न किमपि प्रत्युत दुःखमेव।तत्र दृष्टांतः रज्ज्वां वै सर्पचेतस इति।यथा रज्ज्वां सर्पबुद्धेर्भयलक्षणं दुःखं तथा अन्यथाबुद्धेः किं
कारणमत आह।द्रष्टुरिति।द्रष्टुरीश्वरस्य स्वरूपाविदुषः किं यो ऽहं मादृश ईश्वराधीनसत्ताको ऽहं तस्य मम स्वरूपाविदुषः ईश्वरस्वरूपं ज्ञानं मत्स्वरूपज्ञानं च
कारणमित्यर्थः।स्थांगपोर्णेः स्वरूपं ज्ञात्वा जितेन्द्रियत्वमेव कारणमित्याह।यदिति।१९।एतेनापि स्वदेहस्याप्यनिमेव कारणमित्याह।क्वायमिति।सौ
मनस्यं सौरस्यं दौर्गंध्यादिगुणाधिकरणस्य देहस्य सौमनस्यादिगुणसमवायो न घटत इति हि यस्मात्तस्मादनात्मन्यविद्यया तद्गवत्त्वरूपज्ञानेनाध्यासो
तस्मिन्तद्बुद्धिर्भ्रमस्तस्य यः।अध्यासं प्रपंचयति पित्रोरिति।भार्यया अपि भोगार्हत्वात् द्विषयका स्वतभावः यो देह पित्रादीनामस्यैनेनावसीयते न निश्चीय

किं त्वेतया म एकांते रज्ज्वां वै सर्पचेतसः।द्रष्टुः स्वरूपाविदुषो यो ऽहं यदजितेंद्रियः।१८।क्वायं मलीमसः कायो दौर्गंध्याद्यात्मको ऽशुचिः।क्व गुणाः
सौमनस्याद्या ह्यध्यासो ऽविद्यया कृतः।१९।पित्रोः किं स्वं नु भार्यायाः स्वामिनो ऽग्नेः श्वगृध्रयोः।किमात्मनः किं सुहृदामिति यो नावसीयते।२०।अ
७ तस्मिन्कलेवरे ऽमेध्ये तुच्छनिष्ठे विषज्जते।अहो सुभद्रं सुनसं सुस्मितं च मुखं स्त्रियः।२१।त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ।विण्मू
त्रपूये रमतां कृमीणां कियदंतरं।२२।अथापि नोपसज्जेत स्त्रीषु स्त्रैणेषु चार्थवित्।विषयेंद्रियसंयोगान्मनः क्षुभ्यति नान्यथा।२३।

ते।२०।तस्मिन्तुच्छानां भूतानां पंचानां भूतानां निष्ठा कर्षो यस्मिन् तुच्छा निष्ठा व्यवस्था च यस्य स तथोक्तः वा।तस्मिन्नमेध्ये कलेवरे सुभद्रमिति विषज्ज
ते पुरुषः अहो भ्रांतिरिति।इतोपि स्त्रीणामर्थं तु दुःखं कुर्वन् भ्रांत इत्याह।त्वगिति।संहतौ त्वगादिनिविष्टे देहे रमतां रममाणानां कृमीणां कीटकानां चांतरं व्यवच्छेदनं
कियद्।२२।स्त्रीष्वभिरममाणानामपि गार्हं तियस्मात् अथ तस्मादर्थवित् स्वप्रयोजनवित् स्त्रीलोलेषु च नो विषज्जेत यद्यपि विशेषो नास्ति तथापि कैर्कर्तव्य
मित्यत आह।अथापीति।स्त्रीसंगादिवर्जनेन मनोवशीकरणमेव प्रथमं साधनं अन्यथा सर्वं कुंजरस्नानवन्निष्फलं स्यादिति भावेनाह।विषयेति।अन्यथावि
षयेंद्रियसंयोगाभावे मनः क्षोभो नास्तीति।२३।नामम

नाम
१२६

तदुपपादयति।अदृष्टादिति।भावो मनः अदृष्टादश्रुताद्भावाद्वस्तुनो नोपजायते विकारविशिष्टं न भवति संयोगलक्षणसंबंधाभावात्।अतो दृष्टश्रुतवस्तुन्येव वर्त
बंधसमर्थं मनः।ततश्च प्रकृते किमनेनेति तत्राह।असंप्रयुंजत इति।यतो विषयेंद्रियसंयोगात् क्षुब्धं भवत्यतः प्राणानिंद्रियाणि विषयेषु असंप्रयुंजतः विषयेभ्य ये
आकृष्य तस्य वशीकुर्वतः पुंसः आकर्षणपाशाभावात् स्तिमितं निश्चलं मनः शाम्यति मृगवदेकनिष्ठं भवति।यथा उक्तं निगमयति।तस्मादिति।कुत इति
स्व तत्राह।विदुषामिति।२५।२६।जन्मप्रभृत्यभ्यस्तस्य दुःसंगत्यागो दुःसह इति न मंतव्यं सत्संगेन स्वयमेवाशिथिलीभूतस्य सुलभ इति भावेनाह।तत इति।

अदृष्टादश्रुताद्भावान्न भाव उपजायते।असंप्रयुंजतः प्राणान् शाम्यति स्तिमितं मनः।२४।तस्मात्संगो न कर्तव्यः स्त्रीषु स्त्रैणेषु चेंद्रियैः।विदुषां
चाप्यविस्रब्धः षड्वर्गः किमु मादृशां।२५।श्रीभगवानुवाच।एवं प्रगायन्नृपदेवदेवः स उर्वशीलोकमथो विहाय।आत्मानमात्मन्यवगम्य
मां वै उपारमज्ज्ञानविधूतमोहः।२६।ततो दुःसंगमुत्सृज्य सत्सु सज्जेत बुद्धिमान्।संत एतस्य छिंदंति मनोव्यासंगमुक्तिभिः।२७।संतो
नपेक्षा मच्चित्ताः प्रशांताः समदर्शिनः।निर्ममा निरहंकारा निर्द्वंद्वा निष्परिग्रहाः।२८।तेषु नित्यं महाभाग महाभागेषु मत्कथाः।संभवंति
हिता नृणां जुषतां प्रपुनंत्यघं।२९।

रूपगूढाकलेवरहितकूपपतनवद् दुःसंगो नर्मकारणमिति यत्ततः।ते किमस्य कुर्वंति।तत्राह।संत इति।संत एतस्य मनोवाक्कायकर्मभिः सम्यक्कृतानुगं
गी तस्य पुंसो मनोव्यासंगमनुसृत्य दुष्टेषु मनःसंगमुक्तिभिश्छिंदंति।२७।एवंविधमाहात्म्यांश्चैते कथं ज्ञातव्या इति तल्लक्षणमाह।संत इति।२८।अनपेक्ष
त्वादिगुणानामन्यत्रापि दर्शनात् तेषामपि दुःसंगनिवर्तकत्वं स्यादित्याशंक्य तच्छुद्धाधिकगुणसद्भावादन्यत्र तदभावादिति भावेनाह।तेष्विति।
ति।ततः किमत आह।तदिति।ताः कथास्य उत्क्षेपो मनोव्यासंगं छिंदंतीत्यर्थः।२९।

मि:

त्वदुक्तिर्हि सिमत्वव्यसनच्छेत्री तदनुदयेनां किमत्राह। तामेश्वर्यंनीति।२९॥ भक्तेः साधनोत्तमत्वमाह। भक्तिमिति।३१। एतमर्थं सोदाहरणं समर्थयते। यथेति।
विभावसुमग्निं निषेवमाणस्य शीतादिकं यथा नश्यति तथा साधुं सत्पुरुषं सेवमानस्य मनोव्यासंगविनाशो भवतीत्यर्थः।३२। इतोपि संतः सेव्या इत्याह। निम
ज्येति। तथा ते संतः पुंसां परायणं मज्जतां दृढा नौरिव।३३। सत्त्वपिप्रधानत्वं हमेवेति सोदाहरणमाह। अन्नमिति। तु मेव मेवं स्वस्थितानो अन्नं प्राणा
यथा सद्भृष्टवदपरं यथा अहं त्यमरणानंतरं धर्मो वित्तं च नृणां सुखाय यथा वार्तानां शरणं रक्षिता हमेव यद्वतः संसाराद्धि भ्यतां जनस्यारणं संत इ

वै

तामेश्वर्यंतिगायंतिह्यनुमोदंतिचादृताः। मत्पराः श्रद्दधानाश्च भक्तिं विंदंति ते मयि।३०। भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते। मय्यनंतगु
णे ब्रह्मण्यानंदानुभवात्मनि।३१। यथोपश्रयमाणस्य भगवंतं विभावसुं। शीतं भयं तमोप्येति साधून्संसेवतस्तथा।३२। निमज्ज्योन्मज्जतां घो
रे भवाब्धौ परमायणं। संतो ब्रह्मविदः शांता नौर्दृढेवाप्सु मज्जतां।३३। अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहं। धर्मो वित्तं नृणां प्रेत्य संतो
५ ऽर्वाग्बिभ्यतोरणं।३४। संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः। देवता बांधवाः संतः पिता माता हमेव च।३५। वैतसेनस्ततोप्येवमुर्वश्या लो
कनिःस्पृहः। मुक्तसंगो महीमेतामात्मारामश्चचार ह।३६। ॥इतिश्रीभागवते महापुराणे एकादशस्कंधे पुरूरवगीतिर्नाम षड्विंशः॥ ॥

ति।३४। यथा समुत्थित उदितोर्को बहिश्चक्षुर्दिशति तथा संतः आंतरं चक्षुर्दिशंति बहुवचनाद्दिव्यादधिकप्रयोजकत्वं सूचयति। सत्प्रधानो हरिरित्यस्या
कृतिः। कथमभूदित्यत्राह। देवता इति देवतादयो यथैवेत्यनेन सत्प्रधानत्वमवगतं हरिरिति विद्ध्यात्मसत्प्रधानत्वान्सनं विद्यते परं इत्याद्युदितं इत्यादि
सर्वेश्वरेश्वर इतिवाक्यवशादेन सूचयति। स्वार्थकमैर्थमितिहासेन संगमयति। वैतसेनेति। वैतसेनं निरूप्यते इति शेषः।३६। ॥इत्येकादशे षड्विंशः॥

मि

यो

सोपाय येनकेनतां सः नमोह

कर्मयोगमनुष्ठानप्रकारं प्रपंचयत्सप्तविंशेऽध्याये। तत्रोद्धवो विधिश्रेयस्क्रियोक्तं क्रियायोगं विस्तरतो विविदिषुः पृच्छति क्रियायोगमित्यादि
ना। क्रियातु निष्फलोपि शिक्षाचिकित्सायां कर्मसु। कारणं भक्त्या सुतं प्रधानं वैर्यत्यतो द्विलक्षमाह। भगवदाराधनमिति। सात्वताः सात्वतंत्रोक्तविधानवि
दुषः ते यथा कथमर्चंति।१। इदमेववक्तव्यं किमन्यत्सर्वं स्यादिति तत्राह। एतदिति। मुनयः एतद्भगवदाराधनं नृणां निःश्रेयसं पुरुषार्थसाधनं मुहुर्मुहुरनु
ह्यर्णावदंति। तदुक्तं आद्यत्वेन निर्दिशति नारदव्यादिना। अंगिरसः सुतः आचार्यो बृहस्पतिः।२। इतोपि दुर्मेत्र्यात्मनान्य इत्याह। निःसृतमिति।
वचनानां विकल्पसंभवात्कथं निर्णय इत्यतो नाह। निःसृतमिति। भवदास्यात् असुरज्ञानायान्यथावदच्छिवोपि दैन्यासत्वेनाह देव्यानिति देव्यात्मनेना प्रम

उद्धव उवाच॥ क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो। येन त्वां ये यथार्चंति सात्वताः सात्वतर्षभ।१। एतद्वदंति मुनयो मुहुर्निःश्रेयसं नृणां। दे
नारदो भगवान्व्यास आचार्योंगिरसः सुतः।२। निःसृतं ते मुखांभोजाद्यदाह भगवानजः। पुत्रेभ्यो भृगुमुख्येभ्यो देव्यै च भगवान्भवः।३। एत च
द्वै सर्ववर्णानामाश्रमाणां च संमतं। श्रेयसामुत्तमं मन्ये स्त्रीशूद्राणां च मानद।४। एतत्कमलपत्राक्ष कर्मबंधविमोचनं। भक्ताय चानुरक्ताय ब्रू
हि विश्वेश्वरेश्वर।५। श्रीभगवानुवाच। न ह्यंतोनंतपारस्य कर्मकांडस्य चोद्धव। संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः।६।

लत्वं सूचयति।३। उमस्योत्तमत्वमर्थात् यो किंतु नापरेषामधिकार इति नेत्याद्युपमितिभावेनाह। एतद्वै सर्वेति। संमतं समानं।४। अनेन कर्मबंधनिध्वंस
भवेत्तेनानुष्ठेनाहमिति निरत्याह। कर्मेति।५। कर्मकांडस्यापरिमितत्वेन तज्ज्ञानस्य च दुःसाधनत्वेन मंदमतीनां तदनुष्ठानं दूरोत्सारितमित्यतो भावद
र्शयमिति न मति कुरु किंतु यत्तं संक्षिप्याल्पं तत्तदनुस्मृत्य परिहारत्वेन वक्ष्यामीत्याह। न हीति। कर्मकांडस्य पंचरात्रागमस्य च शब्देन समुच्चयो किंतु केषां चिद्वे
दानंतपारत्वेन सर्वेषां अस्मदादिबुद्धिविषयत्वादत्रास्मिन्नर्थे।६।

वैदिकोवेदाधिकारविषयोऽग्निष्टोमादिस्तांत्रिकः तंत्राधिकारि विषयपुष्पांजल्यादिर्मिश्रः स्त्रीशूद्रादिविषयो नामसंकीर्तनादिरुभयो योगः स्कंदा
लक्षणः तत्रदधिकारिणमाह। त्रयाणामिति द्विजत्वेन तत्र्योग्येन॥ ७॥ स्वनिगमेयेन स्वशाखया विहितं यथा तथा॥ द्विजत्वमुपनयं प्राप्य॥ ८॥ अर्चादि
ष्वधिष्ठानानि उत्तरोत्तरं शस्तानि यथायोग्यं॥ १॥ उभयावैदिके तांत्रिके रपि मंत्रैः॥ १०॥ संध्योपास्त्यादिकर्माणि यानि नैः मम रूजां कल्पयेत्॥ किमर्थं
मयं संकल्पइतितत्राह॥ संध्यमिति॥ सम्यक् मत्पूजां त्वन संकल्पः कर्मशुद्धि करस्त्वयथः॥ ११॥ अर्चायामित्युक्त प्रतिमाभेदमाह॥ शैलीति शैली शिलामयी॥

वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्॥ ७॥ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः॥ यथा यजेत
मां भक्त्या श्रद्धयात न्निबोधमे॥ ८॥ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजः॥ द्रव्येण भक्तियुक्तो र्चेत्स्वगुरुं माममायया॥ ९॥ पूर्वं स्ना
नं प्रकुर्वीत धौतदंतोऽगशुद्धये॥ उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिभिः॥ १०॥ संध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे॥ पूजां तैः
कल्पयेत्सम्यक्संकल्पः कर्मपावनीं॥ ११॥ शैलीदारुमयीलौही लेप्यालेख्या च सैकती॥ मनोमयी मणिमयी प्रतिमाष्टविधास्मृता॥ १२॥
चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं॥ उद्वासावाहने नस्तः स्थिरायामुद्धवार्चने॥ १३॥ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयी॥
स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं॥ १४॥

लोही लोहेन कांस्यताम्रादिना निर्मिता लेप्या औषधरससंलिप्ता शिलालेख्या पटादिलिखित चित्र लक्षणा सैकती। तत्र काले चित्तसिकता
याकृता मनोमयी ध्यानकाले चित्तप्रतिबिंबिताकृतिः मणिमयी सूर्यकांतादिरचिता॥ १२॥ जीवमंदिरं देहः स्थूलमपि च लीनभूता स्थिरायां
प्रतिमायामर्चने उद्वासनावाहनेनस्तः॥ १३॥ अन्यत्र शिलादिष्वेव स्नपनं विलेप्याया तु शास्त्रास्थंडिलादावपि परिमार्जनं स्नपनमित्युच्यते॥ १४॥

प्रसिद्धैस्तैस्तैरेवद्रव्यैः भावेन ननिरूपितैः सामग्र्यभावे यथालब्धेर्द्रव्यैर्भक्त्या भावेन ध्यानेन द्रव्यध्यानसमुच्चयेन। शुद्धः स्वशक्त्या भक्तेस्सार्वत्रिकत्वेऽपि शक्त्ये
छा स्नानेधिक्ये॥ १५॥ तत्र स्वयं हे सद्भिदानंदस्वरूपस्य विन्यासः कर्मविधायने तत्त्वानंदार्थमलंकारादीनामित्याशयेनाह॥ १६॥ सूर्ये पुष्पादिभिरर्हणविष्णुं
निश्चयितप्रीतिजनकं॥ सर्वस्मादुक्तेस्सर्वकमुपाहृतं प्रेष्ठमित्याह॥ श्रद्धयेति॥ १७॥ प्रागुदक्प्रत्यगासीनः संमुखः अभिमुखः॥ १८॥ कृत न्यासः कलशमयूदकपात्रं प्रोक्षणीयः प्रसिद्धैर्द्रव्यैः प्रतिमादिषु मामयया भक्त्या चैव यथालब्धैर्द्रव्यैर्भावेन चैव हि॥ तीर्थपुष्पादिपात्रं॥ १९॥

द्रव्यैः प्रसिद्धैर्मद्यागः प्रतिमादिष्वमायया॥ भक्तस्य च यथालब्धैर्हृदि भावेन चैव हि॥ १५॥ स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव॥ स्थंडिले तत्त्व
लै विन्यासो वह्नावाज्यप्लुतं हविः॥ १६॥ सूर्ये चाभ्यर्हणं प्रेष्ठं सलिले सलिलादिभिः॥ श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि॥ १७॥ गंधो धूप
मुनि सुमनसो दीपोन्नाद्यं च किं पुनः॥ शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः॥ १८॥ आसीनः प्रागुदग्वार्चेदथार्चायामथाभिमुखः॥ कृत
न्यासो मद्न्यासः पाणिनामृज्यशुद्धये॥ कलशं प्रोक्षणीयं च यथावदुपसादयेत्॥ १९॥ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च॥ प्रोक्ष्य पा
त्राणि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत्॥ २०॥ पाद्यार्घ्याचमनीयार्थं त्रीणि पात्राणि देशिकः॥ हृदा शीर्ष्णाथ शिखया गायत्र्या चाभि
मंत्रयेत्॥ २२॥ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम॥ अण्वीं जीवकलां ध्याये न्नादांते सिद्धभाविताम्॥ २३॥
॥ २०॥ देशिको मंत्रज्ञः हृदा शिर्ष्णा शिखया मंत्रैर्नमआदिलक्षणेः॥ २१॥ ध्येयस्वरूपमाह॥ पिंडइति॥ प्राणायामैर्ग्यलिनवाय्वग्निसंशुद्धे पिंडे देहे हृत्पद्मस्थां जीव
कलायस्याः सा जीवकला तां जीवबिंबस्वरूपमित्यर्थः ध्यायेत्॥ हृदि स्थायां नादेमूर्तिं जीवोपाधिविवेकः यद्भवति तं जीवः सा तु जीवकलास्म
ता॥ शब्दैः सर्वात्मनानुक्तेर्महां तस्या तु साम इति वचनाद्ध्यायेत्॥ नादांते सिद्धभाविताम्॥ नादः शब्दः अंतोवसानं सर्वात्मना शब्दैरनुक्तत्वात्॥ शब्द
गोचरतया सिद्धैः सनकादिभिरुपासिता॥ शब्दैः सर्वात्मनानुक्तेरित्युक्तेः॥ २३॥

आत्माव्यात भूता नित्यं वर्तमानं या जीवकलां तया शरीरव्याप्तिं वा भव्य मूर्त्यां व्याप्य पिंडे देहे संपद्य सम्यक् प्रपत्तिं कृत्वा तन्मयः एवं ध्यानेन भगवत्प्रधानो
भूत्वा अर्चादिषु बाह्यमूर्तिषु आवाह्य तत्सन्निरूप्य न्यस्तांगं मातृकादिमंत्रैः न्यस्तं तदर्चायां मां प्रपूजयेत् तत्र स्वेन्न्यस्याः यः (व्याप्तो भूतश्च नित्यं यहाल भूतो हृदिस्थ
तः) जीवस्य तत्प्रधानत्वं तन्मयत्वमुदाहृत मिति वचनात् अन्तसमनत्वगमनहृति धातोः आत्मलक्ष्याद्यात्माति रूपं अनेन मयि स्थितता स्वयमेव स्वात्मानं भूा
वाह्य तत्त्वं व्यतश्लंदर्शनतयाव्याहनादिकुर्वीत्याद्युक्तं भवति॥२४॥ पाद्यादिभिः विमलादिभिः नवभिः शक्तिभिः सिंहासनं पीठं कल्पयित्वा॥२५॥ तत्र धर्मा
पद्मे दिकं तेषु पीठे अष्टदलपद्मं ध्यात्वा तत्र प्रकृतिसन्निहितं मां पूजयेत् वेदतंत्राभ्यां मंत्राभ्यां मह्यं महनीयं पूजनीयं उभयसिद्धये वेदतंत्रप्रोक्तफलसिद्ध्यै॥

तयात्मभूतया पिंडे व्याप्ते संपद्य तन्मयः। आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत्॥२४॥ पाद्योपस्पर्शनार्घ्यादीनुपचारान्प्रकल्पयेत्। धर्मा
दिभिश्च नवभिः कल्पयित्वासनं मम॥२५॥ पद्ममष्टदलं तत्र कर्णिकाकेसरोज्ज्वलं। उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये॥२६॥ सुदर्शनं पांचजन्यं
गदासीषुधनुर्हलान्। मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत्॥२७॥ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च। महाबलं बलं चैव कुमुदं कुमुदेक्ष
ने णं॥२८॥ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान्। स्वे स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्षणादिभिः॥२९॥ चंदनोशीरकर्पूरकुंकुमागरुवासि
तैः। सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति॥३०॥ स्वर्णघर्मानुवाकेन महापुरुषविद्यया। पौरुषेणापि सूक्तेन सामभी राजनादिभिः॥३१॥
पुष्प वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः। अलंकुर्वीत सप्रेम मद्भक्तो मां यथोचितं॥३२॥ पाद्यमाचमनीयं च गंधं सुमनसोऽक्षतान्। धूपदीपोपहार्याणि जनं
दद्यान्मे श्रद्धयार्चकः॥३३॥

॥२६॥ अनंतरं॥२७॥ मध्यावाहितप्रधानं वाहितं तानभिमुखान् प्रोक्षणीयादिभिः आर्घ्यादिभिः॥२९॥३०॥ स्वर्णघर्मानुवाकेन विष्णुसूक्तेन धर्मानुवाकेन धर्मानुवाकेन
धर्मो तस्मैतान्त्रिवृतत्वीर्यात्तुरित्यादिसूक्तेन महापुरुषविद्यया जितंते पुंडरीकाक्षेत्यादिकया पौरुषेण सूक्तेनापि सामभिः राजनादिभिः इतिश्रुतिपूर्व
मनं सूक्ती राजनं व्याप्तापि भगवान् विष्णुर्दहेसीसवनं तु तत् नधूपराज्यं फलदायस्मात् व्याप्तिलक्षनस्य संगति नितरां स्वर्णघर्मोपावमानेनु
मंडलं विष्णुनीराजनं तस्मादिदं ः समुदाहृत मिति वचनात् आदिशब्देन त्वज्जन्मेयेत्यादि सूक्तैस्तुतिं कुर्यात्॥३१॥३२॥ भा॰ए॰ १३९

सिद्धिनानि

सैंधवं गोधूमपायसं शष्कुली अत्रं अंबष्टिकेसति॥३३॥३४॥ मेखलावर्तवेदिभिः सह विहिते उदितं ज्वलितं॥३५॥३६॥३७॥३८॥ हविषा सर्पिषाभिसुतानिदा
अ रूणि समिधः प्रास्य हुत्वा आघारौ कोणात्कोणं प्रतिकृत्वा आज्यभागौ॥ विधानतः धर्मादिभिः मंत्रैः धर्मादिभ्यः स्वाहा यथान्यायं मंत्रविद् हुत्वा इति शेषः पुनः स्वि
ष्टकृतं कुर्यात्॥४०॥ अभ्यर्च्याथेति पाठे अभिमुखं कृत्वा अर्चयां कृत्वा इत्यर्थः भगवंतं नमस्कृत्येत्यर्थः॥४१॥ सुरभिमंत्र मुखवासं तांबूलाद्यं वदत्वान

गुडपायससर्पींषि शष्कुल्यापूपमोदकान्। संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत्॥३४॥ अभ्यंगोन्मर्दनादर्शदंतधावाभिषेचनं। अन्नाद्यगीत
सु नृत्यानि पर्वणि स्युरुतान्वहम्॥३५॥ विधिना विहिते कुंडे मेखलागर्तवेदिभिः। अग्निमाधाय परितः समूहेत्पाणिनोदितं॥३६॥ परिस्तीर्याथ पर्युक्ष्य
दन्वाधाय यथाविधि। प्रोक्षण्यासाद्य द्रव्याणि प्रोक्ष्याग्नौ भावयेत माम्॥३७॥ तप्तजांबूनदप्रख्यं शंखचक्रगदांबुजैः। लसच्चतुर्भुजं शांतं पद्मकिं
जल्कवाससं॥३८॥ स्फुरत्किरीटकटककटिसूत्रवरांगदं। श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं॥३९॥ ध्यायन्नभ्यर्च्य दारूणि हविषाभिघृतानि पु
नानि च। प्रास्याज्यभागावाघारौ दत्वा चाज्यप्लुतं हविः॥४०॥ जुहुयान्मूलमंत्रेण षोडशर्चावदानतः। धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृतं
बुधः॥४१॥ अभ्यर्च्याथ नमस्कृत्य पार्षदेभ्यो बलिं हरेत्। मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं॥४२॥ दत्वाचमनमुच्छेषं विष्वक्सेनाय कल्प
येत्। मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत्॥४३॥ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम। मत्कथाः श्रावयन्शृण्वन्मुहूर्तं क्षणि
को भवेत्॥४४॥

तरं चामरादि उपचारैः अर्हयेत् संभावयेत्॥४३॥ न केवलं उपगायन् गृणन् नृत्यन् एव किंतु मम कर्माणि अन्यैः कीर्तितानि अभिनयन् सर्वेषां प्रकाशयेत्।
अर्थांतरं वा हृ मत्कथा इति। अनेनाभिनयशब्दार्थो पि विवृतः। किमुक्तं स्यात् स्त्राहामुहूर्तं क्षणिक इति मत्कथार्थं मत्र मुहूर्तं क्षणमात्रं
त्वस्मिन्नर्थे गत्वात्यय पशमत्कथा निनादितस्सर्वकालो भवेदित्यर्थः॥४४॥

प्रवाहरूपेण
नवनीनोप॰

स्तवैर्मुक्तकस्तोत्रनिबंधनैः। परस्परं बद्धाभ्यां बाहुभ्यां सह शिरः मत्पादयोः कृत्वा॥४६॥ शेषां माल्यादि स्वतादिदानं शेषो स्त्री यन्य स्मिन्नुपयुक्तं ता

मा माल्याद्यन्तादिरानेत्ती निपादवः पत्रेषु अर्चादिषु यथा श्रद्धा तथा मिथ्वमेह॥४७॥ आर्चानुभावतः प्रतिमासामर्थ्यात्॥४८॥४९॥ प्रतिष्ठया गृहके

मीणि करणस्य जानां फलतारतम्यमाह। प्रतिष्ठयेत्यादिना। मत्साम्यतां निर्दुःखानंदानुभवरूपतां॥५१॥५२॥ तां पूजनं विना प्रतिष्ठा दिभिरेव साम्यतास्यां

स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि। स्तुत्वा प्रसीद भगवन्निति वंदेत दंडवत्॥४५॥ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं। प्रपन्नं

पाहि मामीश भीतं मृत्युग्रहार्णवात्॥४६॥ इति शेषां मया दत्तां शिरस्याधाय सादरं। उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः॥४७॥

अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत्। सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः॥४८॥ एवं क्रियायोगपथैः पुमान्वैदिकतांत्रि

कैः। अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां॥४९॥ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं। पुष्पोद्यानानि रम्याणि पूजायात्रो

त्सवाश्रितां॥५०॥ पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं। क्षेत्रापणपुरग्रामान्दत्वा मत्सार्ष्टितामियात्॥५१॥ प्रतिष्ठया सार्वभौ

मं सद्मना भुवनत्रयं। पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात्॥५२॥ मामेव नैरपेक्ष्येण भक्तियोगेन विंदति। स भक्तियोगं

लभत एवं यः पूजयेत मां॥५३॥ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः। वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतं॥५४॥

स्यादत्राह। मामेवेति। नैरपेक्ष्येण भक्तियोगेनैव मां विंदति साम्यं लभते नन्वेवं तर्हि प्रतिमादिपूजाव्यर्थेति तत्राह। एवमिति। यएवं मां पूज

येत् स भक्तियोगं लभते। न मामाप्नोतीति शेषः। अनेन ज्ञानभक्तिद्वारेण भगवत्प्राप्तिरित्युक्तं भवति॥५३॥ देवस्वापहरणे महाव्द्

ते

परस्याह। मद्दति॥५४॥

नाम
१४०

न केवलं प्रभेमादि स्वजा कर्तुरेव फलं साहाय्य कर्तृणां यथा योग्यं फलं भवतीत्याह। कर्तुरिति। सारथेः कार्यहेतोः प्रेत्य कर्मणो फलमागिनो भवंतीत्य

र्थः। फलतारतम्यमाह। भूय इति। भूयसि महति तत्फलं भूयो भवति॥५५॥ ॥इति श्रीमद्भागवतटीकायां विजयध्वजीयव्याख्याने एकादशस्कंधे सप्त

विंशोध्यायः॥ ॥हरेः परमस्वातंत्र्यं तदधीनसत्ताकत्वेन तद्गतो सत्तमस्वातंत्र्यमेवं हृद्गतत्वज्ञानेन संसारबंधनिवर्तनं नाभेदज्ञानेनेत्यादिकं

मुपदिशत्यस्मिन्नध्याये॥ तत्रादौ दुर्जनस्वभावतत्कृतपापकर्मप्रशंसनेन निंदाभ्यां सज्जनस्वभावतदनुष्ठितपुण्यकर्मस्तुतिनिंदाभ्यां वाच्यमवर्जयंमनु स्ते

रूपेणेति शिक्षयति। परस्वभावेत्यादिना। परो द्विपरमात्मनोरित्युक्तं। परः शत्रुः जीवजातयोर्वा लक्षण्यमसत्यतायाः अतद्मानित्वा दितिशोषः तत्स्वभ

निसर्वाणि स्वभावश्वानि तदाचरितानि पापकर्माणि तत्प्रशंसन्नप्रशंसयेन्निंदेन्निंदयेद्वा॥ किंवा परः परमात्मा तस्य परमेश्री नारायणेभ्यो आत्मा मनो यस्य सतथा तस्य

कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च। कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलं॥५५॥ इति श्रीभागवते एकादशस्कंधे महापुरुषा

रेधने सप्तविंशोध्यायः॥ ॥श्रीभगवानुवाच। परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्। विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च॥१॥

सैव प्रसीसैर

महापरो ज्ञेयः। ब्राह्मज्ञानीनस्य स्वभावं तेनाचीर्णानि पुण्यकर्माणि चरते नगर्हयेत् स्वयं नगर्हयेद्वा। प्रस्तुतप्रशंसयेद्वा। एतादृशः पुरुषो दुर्लभ इति तत्राह।

विश्वमिति। प्रकृत्या चेतनया पुरुषेण हिरण्यगर्भेण सह स्थितं विश्वमेकेन परमात्मना आत्मकं यान्हेम कात्मकं पश्यन्नसमर्थ्यज्ञानित्वात् भवितेवातानदु

र्लभ इति जनेन तथा पश्यत एव समर्थ्येज्ञानं भवतीत्युक्तं भवति न प्रशंसेत् निंद्यास्तु प्रशंस्यान्न निंद्यादित्युभयेयः कुतो त्येतदत्समात्मनतत्व धाश्रय

प्रशंस्यान्न प्रशंसेन्निंद्यो येन ननिंद्यते। सोपि तद्दोषमाप्नोति यन्नोरिवदुदासकृदिति वाक्यात्। परस्वभावकर्मणो प्रशंसा निंदा वनकेति प्रतीतार्थं किंनस्या

द

द्वितीयं शंकापूर्वोक्तादिति तिज्ञातव्या॥१॥

उक्तार्थानंगीकारे बाधकमाह। परस्वभावेति। परोन्येह शिविमुखत्वेन निंद्यस्तस्य स्वभावकर्माणि यः स्तौति। क्वचिद्वैष्णवीयस्तु सुष्ठु हरिपरायणः तस्य स्व
भावकर्माणि निंदति स पुरुषः असत्याभिनिवेशात् स्वार्थाद्भ्रश्यते अंधंतमो यातीत्यर्थः यः प्रशंसति न प्रशंसेत् क्वचिद्वदेत्स्वोप्युक्तः एवार्थः॥२॥ अस
त्याभिनिवेशे निमित्तमाह तैजसइति। निद्राशब्देन निद्रात्सु निद्रेति द्विविधा निद्रोच्यते। तत्र निद्रा स्वापापरपर्याया। सुनिद्रा मरणकालीना। तथा च एवमस्य न
स्या स्तोकार्थः। तैजसे तैजसाहंकारकार्ये श्रोत्रादींद्रियगणे मनसि च निद्रयोपेते दिनस्वापेनापन्ने सुप्ते सति पिंडस्थो जीवो नष्टचेतनः सुप्तो भवति। तदा स्व

**परस्वभावकर्माणि यः प्रशंसति निंदति। स आशु भ्रश्यते स्वार्थादसत्याभिनिवेशतः॥२॥ तैजसे
निद्रयापन्ने पिंडस्थो नष्टचेतनः॥ मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृङ्मनः॥३॥ श्री॥**

जायते तामन्वीश्वरेच्छाप्रबोधितमनोगतसंस्कारजन्यत्वात् मायां स्वप्नं प्राप्नोति। सुनिद्रयापन्ने मृत्युं मरणं प्राप्नोति। तावन्नानाविधसंस्काराविष्टमनः
स्वप्नदर्शीयां नानार्थप्रदं दृष्टं हि जाग्रदवस्थायां किं मुवर्णनीयमिति भावना स्यादिति। तत्र मन एव नानार्थदं नानाविषयप्रत्यायकं हि प्रसिद्धत्वात्
न एव मिथ्याप्रत्ययनिमित्तमिति भावः। तैजसाहंकृते तत्र नेंद्रियग्रामे कस्मात् निद्रयावशमापन्ने जीवस्यात्र नष्टचेतनः। अतो विष्णोर्विशेषवत्तेन
व्याप्तमिति स्मरेदिति। निद्रा चैव तु निद्रा च द्विधा निद्रा प्रकीर्तिता। तत्र निद्रा स्वप्नवत्त्रित्वं सुनिद्रा मृतिकालगेति। मनोमात्रस्वरूपत्वात् स्वप्नो मायेति क
थ्यते। इत्येते वाक्ये रुक्तस्वार्थोपि कार्य इति॥३॥ ल

अयस्तु नो नित्याप्रतिहतलक्षणवस्तुज्ञानतो द्वैतस्याशुभस्य मिथ्याज्ञानिनः पुंसः आशीर्वादादिना किं भद्रं भवति। कालगुणात् कृत्ताकृतात् भव निर्वेदयितं
क्रियेद्वात्पलक्षेव। भद्रं वदं भद्रमपि विशेषापारकं भवतीत्याह। किमभद्रमिति। नित्यमशुभात्मनः तस्य विशेषतः अभद्रं किं न किमपि पश्यतीति वेदापितं किंमद्व।
यत्नवतोपि मायया बादिनः स्वयेग्यादधिक्येन न भवतीति यन्न तस्मादशुभजीवमुद्दिश्य सज्जनवादो दितमुक्तं मनसा सुभादिध्यातं ध्यानादिति ध्यातं चि
तिनुमपि अन्त्तमसत्यमेव विशेषणाद्गृहतेन भवतीत्यर्थः। अनेनैव ह्यावैनाचेष्टाव मुद्दिश्य सतत्प्रशंसादि वदाशीर्वादादि किं न कर्तव्यमित्युक्तं भवति।
उच्यते ध्यायेतावापि किं न स्वतिपद्द्युभे असत्यमेव भवतीति स्वभावास्तत्वमेव यदिति वचनोद्वितनिषेधेत्राक्रियत इत्यन्यथा व्याख्यानेन शब्दस्व
चितेन। एकं तु सुभमुद्दिष्टं अशुभं द्वैतमुच्यते। पुंसोशुभस्य किं भद्रं किमभद्रं विशेषतः। सर्वदा शुभरूपत्वात् विशेषोत्य अहीतीत्यंते वाक्येन निर

**किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत्॥ वाचोदितं तदनृतं मनसा ध्यातमेव च॥४॥
छायाप्रत्युदकाभासा ह्यसंतोप्यर्थकारिणः। एवं देहादयो भावा यच्छंत्यामृत्युतो भयं॥५**

स्तत्वादुपेक्षणीयमिति भावः॥४॥ ननु स्वभावतोऽशुभजीवस्य सदाशुभत्वानुपपत्तात् अन्यस्माशुभाशुभयोरसत्वान्न द्वैयस्तुभवनदिरय
नो न्तत्वाद्शुभदेहादिकमपि कोशुभकारणमिति तत्राह। छायाप्रत्युदकाभास इति। हि शब्दो यथार्थेयं च। छायाप्रत्युदकाभासा जीनमप
स्यासंतोपि निःशंका अप्यर्थकारिणो अर्थक्रियाकारिणो दृष्टाः एवं देहाद्या भावाः अमंगला अप्यामृत्युतो भयं तमअप्रवेशरूपं तं भयं तुम मि
उस्तएवाशुभाशुभफलं यच्छंतीति अशुभजीवानामिति शेषः। निहारः प्रत्युदकं वेन मित्यपिशब्दितत्यतः प्रत्युदकं निहारः आभासाः सूर्यकांत
दरश्मेदं रजतमिति मिथ्याज्ञेयं छायाबेति बाधकजनयानुदयात् एतद्दृष्टौ तेन न तदेहादीनां मिथ्यात्वे विप्रतिपत्तिः किंतु निःशंकित्वमेव। व्यपेक्षूयजी ने
नदेहादि निःशंकित्वाद्वक्त्वपि पुनः शुभाशुभं नर्त्तणां यच्छेत् शुभाशुभं। छायानीहारकल्पत्वासानिःशंका अपि कार्यदाः। स्वर्गशुभादि देहादिभ
वेत्कार्यं शुभादिकं। एतद्वचना देवमभयमिति विपद्च्छेदः॥५॥

सत्यसंकल्पेनसत्यकर्मोप्यनिरस्तकुहकेनपरमेश्वरेणसृष्टत्वाद्दिदेहादिसर्वं सत्यं नमिथ्यामतमितिभावेनाह। आत्मैवेति। प्रकृत्याद्युपसर्ज
नंविना विसर्जनादिकं कर्तुं समर्थः स्यादिति वहवः। परमात्मैवेदं सर्वं सृजति। त्राति हरति च। विश्वात्मा स्वयमेव स्वात्मनैव सृज्यते त्रायते ह्रि
कर्म यते च दीपादीपान्तरवत्। ईश्वर इत्यनेन नैकत्वे तत्त्वविरोधं परिहरति। प्रभुरित्यनेन च मायामुपेक्षते तावत्कालं स्थास्यामीति चिंतनमेवात्मनस्त्राणं
नान्यदस्वेडस्वामित्वात्समर्थत्वाच्चेति सूचयति। दीपादीपान्तरवद्दृष्टिः शक्यते एतावत्कालमात्र शिष्यमानुषेणेति चिंतनं। विश्वा
त्मा एणं समुद्दिष्टस्य स्वस्यैव स्वस्वरूपेयत्तु। दीपादीपान्तरस्य वद्धि कौ भावस्य संहृतिरिति वचनात्। अविद्याद्विलमतिः स्वात्मानं हरतीत्यादिद्रुम
धे तंनिरस्तमित्यादि बोद्धव्यं। हि यतइत्यनेन दीपान्तरस्यदीपर्वैकीभावः संहार इति दर्शयति। सर्वमवरः सर्वेभिदेहं गणात्स्वर्गमुद्भवते। इयान्तियद्
योमदायस्यएणमेवावशिष्यतइतिश्रुतेः।६। ननु हिरण्यगर्भादिष्वेव सृष्ट्यादिवादि निवेदनात् अतिकर्थं हरेरेव सृष्ट्यादिकमवधी यत इति तत्राह

आत्मैवतदिदंविश्वंसृज्यतेसृजतिप्रभुः। त्रायतेत्रातिविश्वात्माह्रियतेहरतीश्वरः।६।
तस्माद्ध्यात्मनोमुष्मादन्योभावोनिरूपितः। निरूपितेयंत्रिविधानिर्मूलाभातिरात्मनि।७।

तस्मादिति धिकुर्व ग्निनपरिहरन्नुपसंहरति। यस्मान्निरवकाशप्रमाणबलाद्धरेरेव सृष्ट्यादिकर्तृत्वं तस्मादमुष्मादात्मनो हरेरन्यो भावः सृष्ट्यादिकर्तृत्वेन निरूपितः
कुत्रापिवेदेषु त्यद्वयश्च यस्मात्त्वात्मनैव स्वयं सृज्यते इत्यादिकं शामा इति तस्मादात्मनः परमेश्वरस्य भावः सृष्ट्यादिकर्तृत्वं मुख्याद्धरेरन्यो नास्ति।
सृष्टिस्थितिश्च संहारो भावनं समुदाहृतं तद्यः करोति पुरुषः सभावइति कीर्तित इति वचनात् भावशब्दः सृष्ट्यादिकर्तृत्वपरइत्यवगम्यते सिद्धः। अनेनेतिशंका
यांकः परिहार आयात इति तत्राह। निरूपितेति। अनेन सृष्टिस्थितिसंहारइति त्रिविधा भातिर्द्धिर्नैव निरूपिता निर्मूला प्रमाणवर्जिता। अन्यस्मात्
व ष्टिसंहारौ स्थितिश्च परमात्मनः। निरूपिता न विद्वद्भिः प्रमाणाभावादिति विद्वद्भिर्निरितिविशेषणादासुरमतत्वेन तथाप्रतिभानमितिज्ञायते।।७।।
ननु पितेव पुत्रादेः विसृष्टसृष्ट्यादिकर्तान्यः किं न स्यादित्यत आह। तस्मादिति।

प्रकृतकर्तृत्वेन हरेः
पपतेः। कार्येषु मुख्यकारणत्वेन बध्नाति। परत्वभावेत्यादि
क्षितविज्ञानफलमाह। एतद्विद्वानिति। मदुदितमेतद्विद्वान्
तः सूर्यवदित्युक्तं

परमात्मनः सत्त्वादिगुणरहितत्वाद्दन्यतः सृष्ट्यादिकं न युक्तं। गुणस्य गुणवत्त्वाद्दन्येषु युज्यत इत्याशंक्यनाह। इदमिति। मायया हेतुभूतया कृतमिदं त्रिविधं सृष्टि
स्थितिः संहार इति त्रित्वसंख्याविशिष्टमात्मनि जनितं गुणमयं सत्त्वादिगुणाधीनं विद्धि न परमात्मनिष्ठमिति शेषः। गुणसंबंधमेभ्यो नाम्नं उत्पत्त्याद्यास्तु स्यन्तः
सर्वदा निर्गुणस्यास्य सृष्ट्याद्यास्तु युक्तो नान्यत्रेति अतो विशेषः कल्प्यत इति अनेन सत्त्वादिगुणयुक्तकारणत्वेन सिद्धे पुरुष मन्यो भावो नास्तीति सम्यं
संस्यादिनियमाशंकापहृता। विद्धीति पुरुषार्थोपयोगित्वादिदमेवावश्यं ज्ञेयमिति निर्धार्यते। माययेत्यनेन गुणानामचेतनत्वेन स्वतः प्रवृत्त्यनुपपत्तिं

इदंगुणमयंविद्धि त्रिविधंमाययाकृतं।। एतद्विद्वान्मदुदितंज्ञानविज्ञाननैपुणः।। ननिंदतिनचस्तौतिलोकेचरतिसूर्यवत्।।९।।
दी प्रत्यक्षेणानुमानेननिगमेनात्मसंविदा। आद्यंतवदसज्ज्ञात्वानिःसंगोविचरेदिह।।१०।। उद्धव उवाच।। नैवात्मनोनदेहस्यसं
सृतिर्द्रष्टृदृश्ययोः।।अनात्मस्वदृशोरीशकस्यस्यादुपलभ्यते।।११।।

कथमित्यतो विवृणोति। प्रत्यक्षेणेति। प्रत्यक्षादिप्रमाणबलेनेदं गुणमयं सर्वं च माद्यंतवत्त्वात् समर्थमसत्तत्त्वमिति ज्ञात्वा। असमर्थं असत्त्वो क्तिसमर्था
सत्यकीर्तितमिति वचनादासत्वेनेभ्यत्वमत्राभिप्रेतं इह जगति निःसंगो निर्लेपश्च निगमेन वेदेन आत्मसंविदा स्वज्ञानेन।।१०।। स्वप्रकाशत्वेनं
वैनंदेहे परमात्मनोऽसंसारासंभवं तु नैव मुद्भवो विवेकार्थं लोकदृष्ट्या लब्धं दृष्टिनैवेति निःसंग इत्यनेन प्रस्तुतः संगलक्षणः संसारः कस्यात्मनो
देहस्य वा तदेहस्य दृष्ट्यतेऽत्र योनु भयोरपि न संभवति आनात्मस्वदृशोरनात्मत्वाज्जडत्वात् दृश्यस्य देहस्य स्वयंप्रकाशत्वात् द्रष्टुरात्मनः कस्य स्यात्
सतिरुपलभ्यते।।११।।

भा-ए-
१८२

देहस्यास्य हरेरियमपि न युज्यत इत्याह। आत्मेति। अग्निवदीश्वरः दारुवद्देहः जीन पक्षस्तु परमात्मकोटावेवान्तर्भूतत्वान्न पृथगुक्तः। कस्येति पुनःकस्याक्ति
स्वरूपपरिहारकक्ष्यार्थः।।१२।। जीवस्यैव संसृतिरितिभावेनाह। यावदिति। आत्मनो जीवस्य यावद्देहेन्द्रियप्राणैः सन्निकर्षणं संबंधः तावत्संसारः कस्येत्यत
निस्तानंदस्व उक्तं अविवेकिनः इतोंदृश्यार्थो पि। अविवेकित इति विशेषणाद्विवेकिनो मोक्षहेतुत्वात् फलवानपि। कवलास्मोक्षहेतुत्वान्नित्यानंदोदयोर्थः।।१३।। जीवात्मनस्तु संसारः स्वप्नवद्बलवत्त इति वचनात्। संसत्वभावस्यैव फलरूपत्वान्निरर्थमेव संसार इति अवधारयति।।१३।। अर्थे हीति। अपि शब्दोल्पफलार्थे।
उच्यते निःफलत्वेन मदत्यल्पफलो भवेदिति वचनात्। अर्थे अविद्यमानेपि। अस्मात्संसारात्प्रयोजनाभावेपि पुंसः संसृतिर्न निवर्तते। तत्रेदं निमित्तं।

आत्माव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः।। अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः।।१२।। श्रीभगवानुवाच।। यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणं। संसारः फलवांस्तावदपार्थोप्यविवेकिनः।।१३।। अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते।। ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा।।१४।। यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्।। स एव प्रतिबुद्धस्य न वै मोहाय कल्पते।।१५।।

ध्यायतो विषयानिति। कथमिव। अस्य स्वप्नदर्शिनो यथा नैर्थागमः प्रयोजनं नि धुरव्यवहारा नास्ति भेचति। अन्नापि निमित्तं। ध्यायत इति। मध्यास्व
प्रार्थानामस्थिरत्वेपि निरंतं विषयानुस्मरणसंस्कारतं तस्यानर्थागमो न निवर्तते एवं संसारोपि।।१४।। अज्ञानिन एव संसारोनर्थकरो न ज्ञानिन इत्याह। य
स्व थाहीति। अप्रतिबुद्धस्य स्वप्नावस्थामास्थितस्य यथा प्रस्वापो बह्वनर्थभृत्। स एव स्वापः प्रतिबुद्धस्य प्रमोहाय न कल्पते। एवं संसृतिरज्ञानिनामनर्थहेतु
र्नैव ज्ञानिनां मोहाय नैव विषयलोलुपत्वेन दुर्जनस्य फलः। सज्जनस्य स्वरूपानंदापेक्षया फलोपि मज्ञानेन स्वरूपानंदसाधनत्वेन सफलत्वादल्प
से फल इति हेयः संसार इत्येवमारण्यार्थं पुनर्वचनमिति भावः।।१५।।
नाम
१८३

सर्वेषामंतःस्थितत्वात्त्वमिदं तदुक्तं तरात्मा च गुणैः कर्मभिश्चारब्धामूर्तिर्यस्य स तथा।

स्य
जीवस्यापि संसारः आभिमानिकः स्वतस्त्वाभाविकः अन्यथा तन्निवृत्तिसाधनविधानानुपपत्तिरित्याशयेनाह। शोकेति। शोकादयो जन्म मृत्युश्चाहंकारस्यैव संस
काराज्जीवस्य दृश्यंते न स्वतः। परमात्मनस्तु न भिमानानुसुतरामसंभव इत्यर्थः। परमात्मन एव निषेधो न जीवस्येति तन्न अहंकारस्य तत्काशात् दृश्यंते नात्म
नः स्वतः अहंकारात्तु संसारो भवेज्जीवस्य न स्वतस्तु कुतश्चिदानंदतनोः स्वरूपेषु युतस्यतः स्वनेन निरस्तं।।१६।। कयायुक्त्या जीवस्य न संसार इति तत्राह। दिहेति।
देहेंद्रियप्राणमनसां संबंधातोभिमानो यस्य स तथा। सूत्रं महानित्यादिधिकारनामभिः बहुधा पुराणेषु गीतस्य। कालतंत्रः कालाभिमानी दुर्गाधीनः जीवः पुरुषः
हिरण्यगर्भोपि संसार आधावति किमुतान्ये जीवा इति सुत्यन्याबलक्षणया युक्त्या जीवस्य संसारस्थिति निश्चिते। संसारयुक्तो ब्रह्मापि सर्वजीवश्वरेश्वरः।
विष्णवधीनः सदाज्ञानी। किमुतान्यकल्पेवतना इतिज्ञेनं जीवोपाध्यवछिन्नस्य परमात्मनः संसार इति मतं निरस्तमिति ज्ञातव्यं।।१७।। न वेवंप्रबलस्य संसारस्य ल

शोकहर्षभयक्रोधलोभमोहस्पृहादयः। अहंकारस्य दृश्यंते जन्म मृत्युश्च नात्मनः।।१६।। देहेंद्रियप्राणमनोभिमानी जीवोंतरात्मा गुणकर्ममूर्तिः। सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतंत्रः।।१७।। अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म। ज्ञानासिनोपासनयाशितेन छित्वा मुनिर्गां विचरत्यतृष्णः।।१८।।
समुच्छेदः कथं कार्यस्यादित्याह। अमूलमिति। मुनिर्निरंतरानुस्मरणसमर्थः पुरुषः एतत्संसारकारणमज्ञानं मदुपासनया जाततत्वात् निशितेन ज्ञानेन छित्वा पुनः त
ज्जातत्यागिनिःसंगो भूत्वा गां विचरति। यावच्छरीरं मितिशेषः। यदज्ञानेनोत्पन्नं तद्ज्ञानेन निवर्तत इति तत्कारणमाह। अमूलमिति। विष्णुकारणक कर्ममूलं। ब्रह्मकारणेन
म जन्यस्यानिहन्ति कुर्यामीतिबोधेनेन परिरस्तं ज्ञानस्यापि तत्कारणकत्वात्। अज्ञानस्य तत्कारणत्वेकं स्थितं युक्तं तदेव कथ्यमित्यत उक्तं। बहुरूपेति। मनआदिषु
सन्निहित बहुरूपेण तेन सस्मतेतं दृष्टानुगुणं निरूप्यते प्रेर्यते इति बहुरूपरूपं। मनोवचः प्राणशरीराणि कर्म विषयो यस्य तत्तथा। अहंमैता बद्धेत्याद्या के
ते निपात कारणजायमानमित्यर्थः।।१८।।

ज्ञानादिषु किमाकारो निश्चितः स्यादिति तद्विषयाकारमाह। ज्ञानमिति। सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेः खंडं ब्रह्मैव विज्ञानि ब्रह्मैव यः। कथमस्य जगतः आद्यंतयोः केवलं स्वतंत्रमेव वर्तते। मध्ये कालः प्रधानगुणत्वात् फलपाचकत्वाच्च हेतुर्निमित्तकारणं यच्च जगतो मध्ये पतदेव तत्वेन वर्तते नान्यथा॥

ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं॥
आद्यंतयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव मध्ये॥१९॥

यच्चान्यतो विविक्तत्वाद्विवेकः। यच्च निरंतरं गमयतीति निगमः। यच्च सर्वैरालोच्यत्वात्तपः तप आलोचन इति धातुः। प्रति प्रति अक्षेष्विंद्रियेषु स्थितत्वात्प्रत्यक्षं। आचार्यसंप्रदायसिद्धत्वादैतिह्यं। अथ वेदादिप्रमाणसिद्धत्वादनुमीयमानत्वादनुमानं। अनेन नास्तित्वं प्रत्यक्षादिप्रमाणमुक्तं भवति॥१९॥

तदुक्तं।

जगत आदिमध्यावसानेष्वव्यभिचारतः स्वतंत्रं तत्सोहरणं स्पष्टयति। यथेति। यथा हिरण्यं यथा पूर्वं स्वकृतं अविकृतं पुरस्तात् स्थितं पश्चाच्च सर्वस्य हिरण्मयस्य कुंडलादेः स्थितं तथा मध्ये च सुवर्णं व्यवहार्यमाणं सुवर्णशब्दार्थ-
दिनानापदेशैः व्यवहारयोग्यं तद्वद्धिरण्यं। यो विकारस्तदेव तथा अहमस्य जगतो मध्ये च सुरनरादिनानाव्यपदेशैः अभिव्यज्यमान-
मायव्यवहार्यः पृथगेव स्थितः। यथा परिच्छिन्नात् तद्वत्सुवर्णं व्यवहारायमुख्यं परिच्छिन्नं मध्ये च तिष्ठति न पृथग्भवति तद्वत्
हरिः साक्षाज्जगद्रूपावस्थः स्थितः। एवं जगति संस्थितोऽपि जगदनेन पृथक् स्थितः सर्वमुख्यो जगतः स्वातंत्र्यात् परमेश्वर इति। तन्न विषयमकस्य नाम स्वयं

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य॥
तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्॥२०॥

सुरादिकं। तत्संबंधाद्दुर्दर्शितव्यवहार्येषु सुरादिषु तिष्ठन्नेकलं केवलं स्वतंत्रमभिधीयते। स्वतंत्रस्तु हरिः साक्षात् परिच्छिन्नहिरण्यवदिति। सुरनरादयस्तु सुरनरादिपराधीनानानात्वेषु एकत्वं। यथा हिरण्यमकृतं पिंडीकृतं कुंडलाद्याकारेण विविधं पुनरेकमेव तथाहमपि तस्य सुवर्णमध्ये कृतीकृतं कुंडलादिकं। पुनरेकीभवत्यद्वानद्दृष्टपुरजोपि सन्नसुरादीन् स्थितो भूत्वा पुनरेको भवेदिति। तिष्ठत्यंके नत्वदात्मो दिष्वतंत्रं विक्रियागतं। महाफलं
स्यात्स्वर्णं तु स्वतंत्रं विक्रियापरं। तद्वत्स्वतंत्रो भगवान्प्रपन्नानां न स्थितिवाक्यात्॥२०॥

१ वचनात् किंच दार्वाद्यल्पफलं सुवर्णमेव तन्निमित्तकारणं महाफलं तथा जगदल्प॥
२ फलमस्य तत्रैव नाहं तथा किंतु स्वतंत्रो महाफलहेतुः स्यादिति॥

स

इतोपिमोक्षादिदात्वेनिनिरूस्य रितस्वातंत्र्यं हृदे रेखेत्याह। विज्ञानमिति। अंगएतद्धि विज्ञानं निर्दोषज्ञानस्वरूपं कुत त्रिपदस्यं त्रीनुत्तमाधममध्यमान्नृजीवानुत्रि
बुपदेषुमोक्षादिस्थानेषु स्थापयती। तिमोक्षसंसारतम आरव्यपदंदातइत्यर्थो। चिंतनं नामपिहानात्मत्वेनमोक्षदातृत्वं किं नस्यादित्याशंक्य तत्सत्वादे
मेदिद्धार्थीनित्वेनयती। किं तदेवविज्ञानं। विज्ञानमाद्धं ब्रह्मेत्यस्तुतेरिति भावना ह। गुणत्रयमिति। येनेतितत्। यो ब्रह्म येनयस्य तुर्येणतुयस्यजाग्रदाद्य
वस्थातीतस्यविष्णु इत्नानमूर्तेःसमन्वयेनेछयाद्द सत्वेनानुयस्तलक्षणाभिमुखेनगुणत्रयादिकं सर्वमस्ती तिशेष:। व्यतिरेकतो सत्वेनास्ति।
तदेवकेवलमित्युक्तं किंवलपदंसर्वोनुवर्तनीयं तत्केवलमेवसत्यंसदास्तित्वेनस्वतंत्रमेव सत्यपदंचानुवर्तनीयं विज्ञानं संसार त्रिपदस्यै सत्यमितिगु
श्री। तदेवकेवलमित्युक्तं ... यात्रयंसत्वादिकारणं महदहंकाराद्युपादानं कार्यंदेहादिकर्तृकालकर्मादिनिमित्तकारणं। स्वातंत्र्यमेव सत्यत्वं विष्णोरन्यस्यसत्यात। प्रयाहृतः

विज्ञानमेतत्त्रिपदस्थमेगगुणत्रयं कारणकार्यकर्तृ। समन्वयेनव्यतिरेकतश्च येनैवतुर्येणतदेवसत्यं॥ २१॥ ष॥
नयत्पुरस्ताद्युतयन्नपश्चान्नमध्यतश्च नव्यपदेशमात्रं॥ भूतंप्रसिद्धंचपरेणयद्यत्तदेवसत्यादितिमेमनीषा॥ २२॥

२४ं

सदास्तित्वंपुंसत्वो:सदास्तिनेनिवचनात्। इत्थंभेदश्च सदसद्भावाव्यं अस्तित्वनास्तित्वेइतितस्यस्वातंत्र्यमनुपहतमिति॥ २१॥ ननुब्रह्मवदितरस्य स्वातंत्र्यस्त
मेवकथंतस्यस्वातंत्र्यमनुपहतमितितत्राह। नयदिति। यदुत्पत्तेःपुरस्तात्केवलेनयत् नाशात्पश्चाद्युतस्वतंत्रंन। यच्च मध्येवस्थितिकालेचकेवलंन। यत्परेणभ
नमूत्पत्त्यंपरेणमसिद्धसैन्नादिभूतनतद् व्यपदेशमात्रं वैयं स्वतंत्र मितिवाक्यार्थं अतस्तद्वलेवसत्परमंसत्यमिति। मेमनीषा। नत्स्वातंत्र्यणेनेवास्तिपद
त्पत्तिविनाशवत्त्वातं स्वातंत्र्येणानिवितातस्यमत्त्वान्तज्ञानमंदेहइति। अनेनकालत्रयसत्वप्रतिबंधेन सौद्धि लक्षणं जगदिति निरस्तं ननु असत्त्वोपि प्रती
यिनसत्त्वन्नवाध्यते सन्यथानुपपत्तिप्रमाणसद्भावात् सदद्वैलक्षण्य प्रलापोयुज्यतइत्याशंक्य प्रपंचेस्यासत्वोक्त्यास्वातंत्र्यमेव निषिध्यते ननुप्र
ने २स

स

प्रत्यैसत्वेनभतीमेतस्यत्वेन्नवाध्येतेत्यन्यथानुपपत्तिप्रमाणसद्भावात्सदद्वैलक्षण्यप्रलापोनयुज्यतइत्याशंक्यप्रपंचस्यासत्वोक्त्यास्वातंत्र्यमेवनिषिध्यते
ननुप्रतीत्यन्यथानुपपत्त्यानिर्वचनीयत्वं परमार्थे सत्वाभावेननार्थापत्तेःसत्वेनवाध्येतेत्यस्याप्यन्यथोपपत्तेरितिभावेनाह। अविद्यमानइति। सदद्वैलक्षण्य
मनुपपन्नंइज्जगदसदेवास्यादितिमिथ्यावादिमतंचानेनप्रत्यास्त। अविद्यमानइत्यादिना। ब्रह्मणोद्वितीयोवैकारिकःविकारयोग्यारजसरागःप्रकाशगुण
स वधीसर्गोयस्यप्रपंचस्यतथा। एवंप्रपंचःअविद्यमानोपिअसत्त्वप्यस्वतंत्रोपिअवभासतेस्वतंत्रप्रतिभासनानामितिशेषः। यतः स्वयंज्योतिर्ब्रह्मपरमार्थ
१०-म सत्स्वतंत्रं विभातिमिद्धुधामितिशेषःइतोप्यविद्यमानमस्वातंत्र्यमेव। नत्वंदितिभावनाह। अतद्ध्रीतिब्रह्मणमूलमप्रकृतिस्तोत्रादीद्रियाणिअर्थाः शब्दादयः
आत्माजीवःविकारःइंद्रियाभिमानिदेवाःएवमादिभेदभिन्नंविचित्रंजगदतेबृह्मसतएवविभातीत्यनेनानिर्वाच्यमेवस्य मित्यर्थः। तस्यभासासर्वमिदंविभा

अविद्यमानोप्यवभासतेयोवैकारिकोराजससर्गएषः। ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियात्मार्थविकारचित्रं॥ २३॥
एवंस्फुटंब्रह्मविविक्तंहेतुभिःपरापवादेनविवेकबुध्या। छित्वात्मसंदेहमुपारमेतस्वानंदतुष्टोखिलकामुकेभ्यः॥ २४॥

तीतिश्रुतेः। अविद्यमानतानामजगतःपरतंत्रता। यथाशशकस्तुपुत्रादिरसन्निमुच्यतेजनैरिति। जगतोनास्तितासेवपारावीनतासदा। अभावस्तुकुतस्तस्य
मद्विभातीहस्त्वदेतिप्रमाणाद्धेनकथितएवार्थःनस्वरूपोलक्षितः॥ २३॥ एवंतावज्ज्ञातव्यार्थस्तत्वमुनिनाथपरंकर्तव्यंकिमित्यत्राह। एवमितिएव
कू मुक्तप्रकारेणविवेकबुध्यासर्वस्माद्वैलक्षण्यज्ञाननानुगृहीतिहेतुभिःनिर्दोषोपपत्तिभिःपरापवादेनपरस्यापवादेननेदंनेदमितितिनिषेधमुखेन रिव
एषआत्मानेतिनेतीतिश्रुतेःस्फुटंब्रह्मविविच्यपश्यंस्तत्वात्मसंदेहंसिस्थितंसंदेहंशयंछित्वासिलकामुकेभ्यःतदुपार्जनशीलेभ्योविषयेभ्य
उपारमेतशब्दादिविषयोपरमेस्वानंदानुभवनिरताहस्वानंदतुष्टइति। स्वानंदानुभवेनालंबुद्धिप्राप्तः। अनेनजीवपरयोरभेदज्ञानमेवमुक्तिसाधनंनभेद
ज्ञानमतःश्रेयोर्थिभिरभेदमतंसर्वथाहेयमितिदर्शितं॥ २४॥ पे

परापवादप्रकारं विवृणोति। नात्मेति। अत्रनेतिप्रत्येकं संबंधितव्यं। पार्थिवं वपुः शरीरं। आत्मापरमात्मा न भवति। इंद्रियाणि न हि। देवा इंद्रियाभिमानिनो न हि। वायुजलहुताशाः वायुजलहुताशन कृतशरीरो संबंधस्य प्राणः असुर्न। नामुरेवस्वयं प्राणः तत्रस्थितोदृष्टः तेजसी। उदेनते जसेवप्राणस्य हि स्तन्व पुरित्यस्मात् प्राणा हि स्ववायुरूपस्य भूतत्रयकृतं वपुः। यतो हि पार्थिवं नात्र रक्तवात्सल्ममुदाहृतमित्यस्माच्चोक्तं मुक्तं। मनश्चात्मा न। अन्नमात्रं

नात्मावपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुजलं हुताशः॥
मनोऽन्नमात्रं धिषणा च सत्वमहंकृतिः खं क्षितिरर्थसाम्यं॥२४॥

अन्नं पृथिवी मनः तासां धारिमात्रा यत्र एकवद्भाव विवक्ष्या। सत्वं धिषणा प्रोक्त न बुद्धिश्चन। सत्वं मूलं बुद्धिः। अहंकृतिरहंकारतत्वं। खं महाकाशं न। क्षितिर्देशना दिक्त्रियाच न अस्युलोम्य हस्वशाम्य सा श्यामीति। सर्वार्थे बुत्तमान त्वादहंकारो भिमानविशेषो र्थसाम्यं वात्मा न भवतीत्यर्थः। नु देहानेंद्रियप्राणमनो बुद्ध्यहमादयः॥ किंतु स्वविदानंदतनुः सहि जीनाधिपः स्वदेति वाक्यात्। स एव एष आत्मा नेति नेतीति श्रुत्यर्थ एव विवक्ष्यते।
॥२५॥

इंद्रियसमाधानविक्षेपयोः हरिप्रिया प्रियसाधनत्वेनोच्यमानत्वान्नाभ्यां हरेरपि गुणदोषोस्याता। किं तत्राह। समाहितैरिति। गुणात्मभिः शब्दादिविषयमनस्के गुरुवेशः स्वविषये त्वसमाहितैरेकाय विन्नतेन स्थापितैः करणैरिंद्रियैः नत्सु विविक्तधाम्नः भ्यामिंद्रियेभ्यो विषये भ्यश्च भूतस्वरूपस्य तत्राजितेंद्रियरहितस्य भगवतः को गुणो भवेत् न कोपि। विषयेषु विविक्षिप्यमाणे रितस्ततआकृष्यमाणैरिंद्रियैः हरेः किं दूषणं न किमपि दूषणं। अत्रोदाहरणमाह। घनेरिति। आच्छादिरूपैर्घनैः रूपैतैः सर्वाङ्गादगुणरूपस्य रवेः किं भवेत् न किमपि प्रयोजनं विगतैः दोषापि भवेत्। किं न भवेदेवाप यथा रवेः गुणदेषाभावेपि लक्ष्येषु नीरूपैतैः छायस्या सुखं भवेत्। विगतैस्तापेन दुःखं भवेत् तथा समीहितकरणैः समाधानकर्तुः सुखं भवेदिति भावः। समाहितैरिति।

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः॥ विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैर्विगतै रवेः किं॥२५॥
यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते॥ तथाक्षरं सत्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परम्॥ ॥२६॥ ॥

येन विक्षिप्तमेवात्तु द्रवितं। विशेषो विद्यते विष्णोः तथापि तु समाहितैः। प्रीतो भवति वै नित्यं सर्वधर्मकृतो पि वै त्वेतदुक्तार्थमानी॥२५॥ ननु हरेरपि सत्वादिगुणकार्ये देहादिषु स्थितस्य तत्कृत गुणदोषो जीववत् किं न स्यातामित्याशंक्य जलकाशवदसंगत्वेन दोषनानिवाह। यथेति। यथा नभो वाय्वादीनां गुणैः स्पर्शादिभिः न सज्जते न तत्कृत विशेषवन्न भवति। वाशब्दश्चार्थः। अत्र न भसिगतागतैः देहादिभूतकार्यैः गुणैश्च सत्वादिगुणतत्कार्यरागमसारत्यात तदंतर्वर्तिमान नमक्षरं ब्रह्म संसृतिहेतुभिः सत्वादिगुणैः तन्मयैः रागादिदोषैश्चासंगतमसंबद्धमेव अत्र हेतुः परमिति सत्वादिगुणेभ्यः उत्तमत्वेन विलक्षणं। अनेन निःसंगत्वेन मनः समाधानासमाधानाभ्यां हरेर्गुणदोषाभावे विषयसंगाज्जीवस्यतोस्यातामिति दर्शितं॥ ॥२६॥ ॥

तथापि जीवस्य तोक्ततस्मात्
तार्द मुमुक्षोः साधनविधानं व्यर्थमिति न मंतव्यं सर्वदोषाणां संगमूलत्वात्स एव मुमुक्षुणा पुरुषेण निर्मूलनीय इत्याह। तथापीति। हरेर्गुणदोषाभा
वेऽपि तावन्मायारचितेषु प्रकृतिनिर्मितेषु गुणेषु विषयेषु संगः परितो वर्जनीयः। कियंतकालं वर्जनीयो न्यथास्त्री भवत्युनिर्वेद्यादिश्रुतिः। सगुणवि
षयास्वादित्यतो विधिमाह। मद्भक्तीति। दृढेन मद्भक्तियोगेन यावद्रजस्तमश्च तज्जनितकषायाः कर्वपरीगलंगच्छति तिकषायपापैर्वर्जितस्य तत मुक्ति
पर्यंतमितिशेषः। अथाप्रगतावितिधातुः।।२७।। व्यतिरेके दोषमाह। यथेति। यथा नृणामसाधुचिकित्सितं आमयः सम्यक् चिकित्सितो भवताद् पुनः पु
के नः प्ररोहन्नंकुरीकुर्वन्नामयिनं संतुदति एवमपक्वकषायकर्मविषयेषु संगो यस्य तत्त्वं संगमनः। कुयोगिनं अपरिपक्वयोगयुक्तं पुरुषं विध्यति तत्तस्य

व ५
तथा विसंगः परिवर्जनेन गुणेषु मायारचितेषु तावत्। मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः।।२७।। यथामयो साधुवि
कित्सितो नृणां पुनः पुनः संतुदति प्ररोहन्। एवं मनोऽपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं।।२८।। कुयोगिनो ये विहितांतराये
र्मनुष्यभूतैस्त्रिदशोपसृष्टैः। ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं।।२९।।

द्वि
भगवद्ध्यानविघ्नं करोति। पुनः पुनर्विषयाभिलाषप्ररोहादिति भावः।।२८।। नन्वेवं तर्हि अपरिपक्वयोगवतामनादिकर्ममूलत्वं तदंतरायविहतानां यो
पाके गापरिपाकेनैव भगवद्ध्यानादपि पतितेति तत्राह। कुयोगिन इति। कुयोगिनो ध्यानपरिपाकरहिताः त्रिदशोपसृष्टैराधिदैविकैर्मनुष्यैर्वेनितीभिरा भते
ध्यात्मिकैर्भूतैराधिभौतिकैरंतरायैर्विहिता ह्रियमाणास्ते अपक्वयोगिनः प्राक्तनजन्मनि कृतध्यानाभ्यासबलात्तत्त्वेन योगं ध्यानं युंजति कु
र्वंति। भूयो मत्प्रसादेन संस्कारपाकेन ममेयामुर्यं कुर्वंतीति शेषः। कर्मलक्षणतंत्रं साधनेन तु तिष्ठंतीत्यन्वयः। अतो मद्योगाभ्यासो न व्यर्थो न
त दप्राप्तिस्थितिभावः।।२९।। नाम २४७

न चेऽनुत्र देहस्थितकर्म वस्त्वभ्यासेनावशेः क्रियते मयो योगोऽभ्यस्यते। केचित्तु एवाभ्यासेन योग एवाभ्यस्यते न कर्म क्रियते इत्यत्र वासनातिरिक्तप्रयोजकेनाभा
इति वसंकल्पो बोधं परिहरतीति करोतीति। योऽयं योगिलक्षणो जंतुर्जीवः कर्म करोतीति प्रत्यक्षं तत्रासौ केनापि पुरुषेण चोदितः प्रेरितः एव क्रियते कार्यते। आ
निपाताच्छरीरपातपर्यंतं। अनेन वासनाव्यतिरिक्तप्रयोजककर्तास्तीति जीव गतं स च हरिर्नान्य इति हरिरेव एष ह्येव साधु कर्म कारयति यदेष आकाश
आनंदो न स्यादित्यादिश्रुतेः। ननु तर्हि विद्वदविदुषोः को विशेषः इत्यत्राह। न तत्रेति। इदं सर्वं विद्वान् प्रकृतिप्राप्तः अविकृतमहदादिविकृतपंचभू

करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात्।। न तत्र विद्वान् प्रकृतौ स्थितोऽपि निवृत्ततृष्णः स्वसुखानुभूत्या।
।।३०।। तिष्ठंतमासीनमुत व्रजंतं शयानमुक्षंतमदंतमन्नं।। स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद।।३१।।

नंदानुभवेन
तन्निर्मितदेहे स्थितोऽपि स्वसुखानुभूत्या भगवदनुग्रहाविर्भूतस्वस्वरूपानुभवानंदेन विषयेभ्यो निवृत्ततृष्णः कर्माणि कुर्वन्नपि तत्र कर्मसु न सज्जत इति
शेषः।।३०।। अधुना योगिनां संप्रज्ञातसमाध्यवस्थामाह। तिष्ठंतमिति। मम देहे तिष्ठत्यासीनोऽजं इत्यादिक्रियाः कुर्वन् हरिरेवेत्यात्मस्थ
ण मतिः परमात्मन्येव स्थितमतिः इति तिष्ठंतमासीनमित्यादिक्रियाकर्तारमात्मानं देहं न वेद किं बहुना पारं स्वाद्यंतरस्य परमात्मनो नान्यत् किमपि न
वेदेत्यर्थः स्वभावदेहस्य प्रियाप्रियलक्षणं।। ते ।।३१।। ।।

भा·द·
१८८

न यदि कश्चित्प्रारब्धकर्मवशात्तदिति मिव पश्यति तान्तथापि स्वतंत्रतया न पश्यतीत्याह। यदिस्मेति। यदि स्मरणवासनया देहेरन्यदसदिंद्रियार्थम् अंगद
न यदि कश्चित्प्रारब्धकर्मवशात्तदिति मिव पश्यति तथापि वस्तुतया स्वतंत्रतया न मन्यते। ततु तदस्य तेउ क्तं नाने ति। तत्स्वतंत्रं देहेनानो
मिंद्रियविषयं देहगेहादि जगत्कर्म निर्बंधनतया पश्यति मनीषीं तथापि वस्तुतया स्वतंत्रतया न मन्यते। एतमर्थं निदर्शयति स्वप्नमिति। यथा स्वप्नदृक् स्वप्नादुत्थाय स्थितस्तिरोदधानं अनित्यं परतंत्रो
वि नुमानेनोत्पत्त्यादिमत्वविधानानुमानेन विरुद्धं हि। एतमर्थं निदर्शयति स्वप्नमिति। यथा स्वप्नं पश्यन् स्वप्नबाध्यं मन्यते। अपि तु स्वप्नमद्राक्षमिति जा न
ग्रत्स्वप्नजाग्रत्वेन न मन्यते। स्वप्नजाग्रत्वेनैस्य नाना नुमान विरुद्धत्वात् नहि स्वप्नं पश्यन् स्वप्नबाध्यं मन्यते। अपि तु स्वप्नमद्राक्षमिति जा

यदस्मिन्पश्यत्यसदिंद्रियार्थं नानानुमानेन विरुद्धमन्यत्॥ ॥
न मन्यते वस्तुतया मनीषी स्वप्नं यथोत्थाय तिरोदधानं ॥३२॥

ध्यमेव जानाति तथा विद्वानपि जगद् अबाध्यमेव स्वातंत्र्यमारोपितं पश्यतीति भावः। नाना मानविरुद्धं हि स्वातंत्र्यं जगदंतः सदा। स्वतंत्रो भग
रेके वाधिष्णुं एवन संशयइत्यनेन। अस्त्येव स्वप्नमखिलं वस्तु कारूपमात्मनि जाग्रदेतदिति। ज्ञानं यत्तदेव भ्रमात्मकं। तद्वज्जगदिदं सर्वं निधाम
नं न संशयः स्वतंत्रमेतदिति तु यज्ज्ञानं तद्भ्रमात्मकं। इत्यनेन च वैदुषितेन जाग्रत्कश्चित्स्वप्नस्य पश्यति। स्वतंत्र्यमेव जगतो ज्ञानवानेव प
श्यतीत्यनेन न च सिद्धत्वात् स्वप्नः दृष्टांतबलेन जगतो बाध्यत्वमुच्यते इत्येतदासुरमतमित्यवगम्यते। ३२॥

१८८

स्प४

न नु जगत्स्वातंत्र्यप्रतीतौ किं कारणमित्याशंक्याज्ञानं कारणमित्याशंक्याज्ञानं कारणमित्याशयेनाह। एवमिति। ज्ञानोदयात्पूर्वमात्मनि परमात्मनि
अज्ञानं गृहीतं परमात्मस्वरूपविषयत्वेनाज्ञानं मार्जितं जीवेनेति शेषः। केवलं तत्त्वरूपविषयमेवेत्यनुक्तं। गुणकर्मचित्रमिति। भगवतो गुणविषयत्वं
कर्मविषयत्वेन नंच चित्रं नानाविधं। अज्ञानस्य द्वैविध्यमाह। अविविक्तमिति। एतमर्हं ज्ञानामीति विवेकशून्यं। नन्वेतदज्ञाननिवृत्तौ का प्रतिकृति तत्राह। ई लोचन
गीति। अंगेत्यामंत्रणेन। भयं न कार्यमित्याह। पुनः पुनरीक्षयाहं स्वस्वरूपं गुणानां क्रमेण बालक्षण्यापरिज्ञानेन तन्निवर्तयज्ञानं निवर्तते पुनस्तदज्ञानेन
गृह्यते। ज्ञानोदयानंतरं आत्मा परमापरमात्मापि न विसृज्यः स्वस्य सुखनिष्काम्यादिलक्षणापरोक्षज्ञानेनापरोक्षीकृतानपरोक्षीकृभवति।

एवं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग॥ निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा॥३५॥ ॥
यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्न तु सद्विधत्ते॥ एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः॥३६॥

तस्य जगत्स्वातंत्र्यं न प्रतीयत इत्यर्थः। अन्येऽपि वादिनो न विशेषो हरेः कश्चित् तेषामेव विशेषः स्याद्ज्ञानापगमेन स्थितिवचनात्। जीवस्यैव विशेषो
नहरेर्विद्धइति ज्ञातव्यं। ज्ञानार्थिनेति भावः॥३५॥ ममलाक्षात्कारेण ज्ञानं निवर्तते इत्युक्तं। तत्र तेन मम कश्चन विशेषो नास्ति ममर्थं तो दाहरणमाह। य त्र
यति। हि शब्दः साक्षित्वकः। यथा भानोः सूर्यस्य उदयो नृचक्षुषां तमो निहन्यान्न तु तमः सं विधत्ते। एवं वैराग्यादि साधनसामर्थ्यानिपुणा स कृमप्रतिरायं
तीमिस्रं समीक्षा पुरुषस्य सर्वदास्त्री नारायणशरणं गतस्य बुद्धेस्तामिस्रं हन्यात्। न तु मम कंचन विशेषं कुर्यात्॥३६॥ धत्ते

स्वरूपस्यापितत्व

बहुरा श्रुतपरमात्मैस्वरूपं कीदृशमित्युक्तस्यांतरंत्वोपपरिहरति। एषइति। एषोहं स्वयंज्योतिःस्वतएवस्वप्रकाशः अतएवाजः अतएवाप्रमेयः महती अनुभूतिर्ज्ञप्तिर्यस्य समस्तानुभूतिः सर्वज्ञइत्यर्थः। सकलानुभूतिः पूर्णसुखानुभवः एकः ज्ञानानंदादिगुणैरभिन्नत्वात्स्वगतभेदरहितः अद्वितीयः सर्वोत्तमः अप्रमेयत्वादेवइदमित्यवाङ्मनोगोचरः। वाङ्मनोगोचरस्वेतद्विषयकज्ञानं कथंपरीचैतीति तत्राह। येनेति। ग्रचनाःवेदिकोलोकिकः सर्ववाग्व्यवहाराः येनेरिताः वर्तंतइत्यनेन भगवदनुग्रहीतवाग्व्यवहारविषयत्वेनतद्ज्ञानमुदेतीतिज्ञातव्यं। ज्ञानानंदाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः। अद्वितीयोमहाविष्णुः पूर्णत्वात्पुरुषः स्मृत इतिवचनात्॥३५॥ एवंज्ञानज्ञेयस्वरूपं निरूप्यमिथ्याज्ञानस्वरूपंतत्कारणं ज्ञानस्वरूपंच विविच्यनिरूपयति। एतावानिति।

एषस्वयंज्योतिरजोऽप्रमेयोमहानुभूतिः सकलानुभूतिः। एकोऽद्वितीयोवचसां विरामोयेनेरितावाग्वचनाश्चरंति॥३५॥
एतावानात्मसंमोहोयद्विकल्पस्तुकेवले। आत्मामृतेस्वमात्मानमवलंब्य न पश्यति॥३६॥ ॥श्री॥ ॥

यद्विकल्पः प्रमाणविरुद्धकल्पना। जीवस्वातंत्र्यपरमात्मास्वातंत्र्यजीवपराभेदादिविषयोयः एतावानात्मसंमोहः मनोभ्रमः। भ्रमत्वं बाधकज्ञाननिश्चेयंतत्कथमत्राह केवलइति। आत्माजीवः केवले स्वतंत्रे अमृते नित्यमुक्ते परमात्मनि स्थितंस्वमात्मानं स्वस्वभावं कदापि न पश्यति बोध्यति तन्नेव १नोध्या
व स्वातंत्र्यमवलंब्यस्थिरंनैपश्यतियर्थात्तावद्भ्रमोननिवर्तत इत्यतः स्वस्वभावज्ञानं निमित्तं तन्निवृत्तौ निवर्तत इति निश्चीयते। एतावानात्मसंमोहोस्य द्विरुद्धस्यकल्पना। यत्परोत्माश्रयाज्जीवोनिश्चयेनन पश्यती तिवचनात्। नाद्वैतज्ञानेन भेदभ्रमो निवर्तते इत्यर्थः॥३६॥

नु मदाधारत्वेन स्थितं

भेद सप्रपञ्चो

इतोपिपंचविधंभ्रमजंद्वैतज्ञानेन निर्वर्त्यतइत्युपदेशोन विदुषां परिच्छिद्यस्यसमाधत्तइतिभावेनाह। यन्नामाकृतिभिरिति। नामकृतिभिर्नामरूपैर्ग्राह्यंज्ञेयं पंच
द वर्णैः पंचभूतात्मकं पंचभेदावतं नामावते नीयंजगन्नबाधितं अद्वैतज्ञानबाध्यं नभवति। जगतबाधितमित्ययंयथोवादोनभवति किंवर्थवादः अथार्थवा दस्वकुतः शुरयोऽपि परमात्मानंवा द्वयं द्वित्वसंख्याविशिष्टं वदंति ज्ञात्वापरमानंदं लभंत इतिभावः। अनेनजगद्बाध्यमितिवदं तोपंडिता अन्येपंडिता इत्युक्तंभवति पंचस्तात्मकं किंच्चिंत्रोतिसिद्धमर्पंडिताः वदंतिपंडितास्तद्धाजगदाऽस्त्वबाधितं प्रवाहरूपेणसदाविद्यमानतावशेष्वितामितिवचनात्॥३७॥ तत्र
इत्युक्तंभवति पंचस्वात्मकं किंच्चिंत्रोतिसिद्धं ... ॥ योगीनइति कालेप्रवेमंतरायहतयोग्याहकुयोगिनोजन्मांतरेपियोगमभ्यसंतीत्युक्तं अधुनातस्मिन्नेवजन्मन्येवजन्मयोगांतरायपरिहारंवक्तुमाह॥ योगीनइति कालेनमा०

यन्नामाकृतिभिर्ग्राह्यंपंचवर्णमबाधितं। व्यर्थेनाप्यर्थवादोयं द्वयंवदंतिसूरयः॥३७॥ योगिनोपक्वयोगस्ययुंजतःकालउत्थितैः। उप
सर्गैर्विहन्येततत्रायंविहितोविधिः॥३८॥ योगधारणयाकांश्चिदासनैर्धारणान्वितैः। तपोमंत्रौषधैःकांश्चिदुपसर्गान्विनिर्दहेत्॥३९॥
कि कांश्चिन्ममानुध्यानेननामसंकीर्तनादिभिः। योगेश्वरानुवृत्त्यावाहन्यादशुभदान्छनैः॥४०॥ केचिद्देहमिमंधीराःसुकल्पंवयसिस्थिरं।
विधायविविधोपायैर्युंजंतियोगंसिद्धये॥४१॥ रथ

योगाभ्यासविरहितुसम्यत्रभातादिलक्षणोयोगंयुंजतः उपसर्गरूपद्रवैर्विधिः वक्ष्यमाणः॥३८॥ कंपमितित्रिमाह। योगधारणयेति। योगधारणायामंर्य
नियमार्जीनामावर्तनेन॥३९॥ अनुध्यानेननत्रदंतरायविहितपरिहारसमर्थइत्यस्मरणेन नामसंकीर्तनादिभिरित्यनेनाधिकारिणः कालविशेषात्स्थल तथा
प्रपति अशुभदान्विघ्नान्॥४०॥ रसायनादिनानाविधोपायैः शरीरस्यनाशार्थतरयपरिहारसमर्थकलेन सिद्धसाधनसोलभ्यार्थंयो
गभारणादिविधावमत्राहकेचिदितिकेचिदविवेकिनः परेणभर्मंसुकल्पमिंद्रियसामर्थ्यापेतंवयसिस्थितंतारुण्यवयसोपेतं। अथशरीरस्य
न चिरस्थायित्वानंतरंयोगसिद्धयेयुंजंतिश्रामनइतिभावः॥४१॥
धि

भा॰ पु॰
१५०

स्य

तेषाम विवेकित्वं कुवद्गतितन्नाह। इहेति। तदायासः तस्य देहस्य पोषणायासः अपार्थकत्वमाह। अंतवत्वादिति। ४२। योगेनशरीररक्षणयोगुत्वाभावात् त
त्तदायाससस्यतन्नफलदत्वात्रैवेय बि शरीरकल्पत्वायासस्यन्यार्शकाह। योगमिति। नित्ययोगं भगवध्यानलक्षणसाधनं निषेवतःसेवमानस्यपुंस
कायः स्थ्ययद्दिकं अतासमर्थत्वमियात्। प्राप्नोतितत्तर्हि सम्मतिमान्योगमेवश्रद्दधीत्। नेयोगमुत्सृज्यान्यत्ररसतीदोषश्रद्धां नकुर्यादित्यन्वयः। मत्परइत्यनेनम
२ मतिमत्तिर्वर्विवृता। अनेन योगस्यापिशरीरस्थैर्य फलत्वात् रसायनादौ प्रवर्तमानः अभिवेकिनोतो मतिमद्भिर्मद्योगएवाभ्यासनीय इतिसिद्धं ४२
नी

इह दूष्यशताशीत्यानरायासो ह्यपार्थकः। अंतवत्वाच्छरीरस्य फलस्येव वनस्पतेः। ४२। योगं निषेवतो नित्यं कायश्चेत्कल्पतामियात्॥
तच्छ्रद्दध्यान्नमतिमान्योगमुत्सृज्य मत्परः। ४३। योगचर्यामिमां योगी विचरन्मदपाश्रयः। नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः।
त्म ।४४। इतिश्रीभागवते एकादशस्कंधे भगवदुद्धवसंवादे परमार्थनिर्णयो नामाष्टाविंशोध्यायः॥ ।उद्धवउवाच। ।सुदुस्तरा
मिमां मन्ये योगचर्यामनात्मनः। यथांजसा पुमान्सिध्येत्तन्मे ब्रूह्यंजसाच्युत॥१॥

अत उक्तयोगांतरायपरिहारमाकर्ण्यैवयोगपारंगमोभविष्यतीतिभावेनाह। योगचर्यामिति। स्वसुखं स्वरूपसुखमनुभवतीति सुखानुभूः इत्य
नेनयोगेन सर्वापेक्षितशेषपुरुषार्थसाधनमित्युक्तं भवति॥ ॥इत्येकादशविवरणे अष्टाविंशोध्यायः॥ ॥निर्विघ्नयोगाचरणसाधनं हरेर्भक्तिमु
द्दिपितत्वं कथितत्वज्ञानप्रशंसांते चिरत्ननांश्रेयस्तं उद्धवस्य हरोभक्त्यतिशयलक्षणं भगवद्भक्तिप्राप्तिं च कथयत्यस्मिन्नध्याये आदौ उद्धव उ इति
क्तयोगचर्यस्य अशक्यत्वं मनसि कृत्वा तत्किंचिदुपायंपृच्छतिसुदुस्तरामिति। अनात्मनो मनोजयरहितस्याधीरस्यपुमान् यथापरं दुष्कोपायेन
ण सिध्येत् पुरुषार्थं वा अवेद् तथात्तन्मे अंजसा भक्तिमे ब्रूहीत्यन्वयः॥१॥ वे

तस्य

प्रम

तदकथने कोनर्थइतितत्राह। प्रायस इति। मोनसंयमाभ्यां कर्षितं विषीदंतिविषण्णं नष्टं भवति। अतो योगाचरणसाधनेन तोत मनो निषीदति अथोतस्मात्तत्त्वज्ञाः पर
मर्हसाएवभवद्भुत्सगाधिकारिणः इतिभावेनाह। अथोत इति। योगकर्मभिः योगाख्यकर्मभिः अतएवमा मिनोत्ता मिनस्त्वन्मायाहंकारादिकृत्पूर्यान विह
नाइत्यर्थः॥३॥ इतरोस्थित्वापि भक्तस्त्वं विहतत्वं वहासेषु नचित्रमितिविताप्यति। किं चित्रमिति। अनन्यशरणेषु दासेषु आत्मद इति स्मरतो मुनि
अशेषबंधो तवैतच्चित्रं किं एतत्कुतः दृष्टमितितत्राह। य इति। ईश्वराणां ब्रह्मादीनां श्रीमत्किरीटमणिसंघट्टितपादपीठः अभवयोगोकुलपशुभिः
पशुपालैश्च सह। वत्सलो नरोचयः कामिनायद्वतस्यतवदासे तवचित्रं किमित्यन्वयः४। भगवद्भक्तिमाहात्म्यं तन्माहात्म्य विनाकृत मूर्ततद्धि
न

प्रायशः पुंडरीकाक्ष युंजंतो योगिनो मनः। विषीदत्यसमाधानान्मनोनसंयमकर्षितं।२। अथोत आनंददुघं पदांबुजं हंसाः श्रयेर
न्नरविंदलोचन। सुखं नु विश्वेश्वरयोगकर्मभिस्त्वन्माययामी विहतानमानिनः।३। किं चित्रमच्युततवैतदशेषबंधोदासेष्वनन्यशर
रो णेषुयदात्मदत्त्वं। योरोचयत्सहमृगैःस्वयमीश्वराणां श्रीमत्किरीटमणिघट्टितपादपीठः।४। तं त्वाखिलात्मदयितेश्वरमाश्रि मी
तानांसर्वार्थदंस्वकृतविद्विसृजेतकोनु। कोवाभजेत्किमपिविस्मृतये नु भूत्यैः किंवा न वेदतवपादरजोमृतांभः॥५॥

भक्ति

हस्यन्तु सारासारज्ञतामाह। तं त्वेति। योब्रह्मादिश्रीमत्किरीटघटितपादपीठः तं त्वां सुकृतवित्सुकृतोपकारज्ञः सारज्ञः कः विसृजेत् की
दृशं त्वां अखिलानामात्मनां जीवानां दयितं प्रेष्ठमीश्वरमपिमाधवं भयो आश्रितानां सर्वार्थदं अभीष्टाशेषपुरुषार्थप्रदं। किंचकोवा
२ पुरुषः किमप्यस्वतंत्रं देवं भजेत्यदि भजेत्तर्हि असो विस्मृतचित्तवृत्तिः सारज्ञः चित्तवृत्तिमुपपादयति। किंचेति। तव शिरोमोक्षमाला
र्चितपादरजोमृतांभो नवेद किंवा नेववेदेत्यतो सोप्यसुखेत्यर्थः॥५॥

हरिः

३

भा० पु०
१५२

एवमनिमित्तबंधुत्वेन सर्वस्मादुपकारकस्य भवतः प्रत्युपकारं कर्तुं कवयोऽपि न समर्था इत्याह। नैवेति। न न मूर्धत्वेन सदा स्मरन्तः कवयो ब्रह्मादयोऽपि त
वापचितिं प्रत्युपकारं नैवोपयान्ति किमित्याशयः उपकारः कीदृश इति तं प्रकारमाह। य इति। तनुभृतामन्तर्बहिः स्थित्वा अशुभं विधुन्वन् त्यजन् त्वमाचार्य
चैत्यवपुषा आचार्यरूपेण ब्रह्मा तस्यान्तर्यामिवपुषा स्वयोग्यज्ञानं व्यनक्ति स्वगतिं प्रत्यक्षीकरोषि। आचार्यस्य चित्तस्य वपुषेति वा।।७।।
उद्धवेन पृष्टो भगवान् किमकरोदिति परिशिष्टो मानस्तेऽपि परिहरति श्रीशुक इत्याह।। इतीति। जगत्क्रीडनकं क्रीडासाधनं यस्य स तथा। जगत्क्रीड

नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः।। योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्य
नक्ति।।७।। श्रीशुक उवाच।। इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः।। गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनो
हरस्मितं।।८।। श्रीभगवानुवाच।। हंत ते कथयिष्यामि मम धर्मान् सुमंगलान्। यान् श्रद्धयाचरन् मर्त्यो मृत्युं जयति दुर्जयं।।९।। कुर्या
त्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन्। मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः।।१०।। देशान्पुण्यानाश्रयेत मद्भक्तैः साधु
भिः श्रितान्। देवासुरमनुष्येषु मद्भक्ताचरितानि च।।११।।

नकः स्वशक्तिभिरित्येकवाक्यपदं।। गृहीतमूर्तीनां आत्मांतरात्मा परमात्मा इति संज्ञानां त्रयं येन स तथा। जाग्रत्स्वप्नसुषुप्तिप्रेरकत्वेन तत्त्वेपि
जाग्रदाद्यवस्थाहेतुकशोपपरिहारः समर्थः इत्यतईश्वरेश्वरः इति आत्मांतरात्मा परमात्मेति मूर्तित्रयं हरेः। जाग्रत्स्वप्नसुषुप्तीनां हि श्वेत्यादेश्वश्रवत
कमित्युक्तेः प्रमाणं।।८।। मृत्युं जन्ममरणात्मकं संसारं जयति।।९।। मद्धर्मेषु आत्मा मनस्तु। मद्रूपेषु च मनोरतिर्यस्य स तथा।।१०।। मद्भक्तानामाचरितानि ११

१५२

पृथक्सत्रेण वा महां मयात्रा महोत्सवं अपगादिलक्षणं कुर्यात्।।१२।। आत्मनि हृदि आत्मानमंतर्यामिणं। यथा शरीरस्थं खम
माकाशं निर्लेपं तथा।।१३।। इत्येवं सर्वेऽपि गुणविशिष्टत्वेन सर्वभूतानि प्रविश्य स्थित इति भावना मद्भावस्तेन मन्यमानः सर्वभूतेषु स्ति विष्णुरिति म
द्भावेन सर्वाण्यपि भूतानि ममालयत्वेन मन्यमानः मम ते निद्रुत्तिवर्मोजन्मनो भेदः केवलमप्राकृतं ज्ञानमेवाश्रयेत्।।१४।। केवलं प्रज्ञानप्रकारं दर्शयति।
ब्राह्मण इति। ब्राह्मणादिषु सर्वेत्राव स्थितं ब्रह्म सममेकप्रकारं पश्यन् समदृक् मतः संतामितिशेषः।।१५।। एवं भावनाफलमाह। नरेष्विति। नरेष्वभ्यास
मीक्ष्णं भावयतः पुंसो मद्भावः मयि भक्तिः स्यात्। स्पर्धा स्यादेवयामत्सरत्नो भाषेऽमुक्तिलक्षणामृतिभ्वस्यादेव अर्चने सर्वभूतेषु दितिनेतद्गतात्मनेति

पृथक्सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्। कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः।।१२।। मामेव सर्वभूतेषु बहिरन्तरपावृतं। ईक्षेतात्मनि
चात्मानं यथा खममलाशयः।।१३।। इति सर्वाणि भूतानि मद्भावेन महाद्युते। सभाजयन्मन्यमानो ज्ञानं केवलमाश्रयेत्।।१४।। ब्राह्मणे पु
ल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके।। अक्रूरे क्रूरके चैव समदृक् पंडितो मतः।।१५।। नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात्। स्पर्धासूया
तिरस्काराः साहंकारा वियन्ति हि।।१६।। विसृज्य स्मयमानान् स्वान् दृशं व्रीडां च दैहिकीं। प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरं।।

वचनात्। सर्वभूतार्चनात्मा विशेषो ज्ञातव्यः। भगवद्बुद्धौ केऽपि क्लिश्यं मुक्तिः स्यादित्याह। मायेति। साहंकारा अहंकारसहिता स्पर्धासूयातिरस्कारा
वियांति। हि यस्मात् भक्त्या प्रसन्नो भगवान् दयामुक्तिमयि ध्रुवमिति स्मृतिं तत्र यति।।१६।। भक्तिमताप्येवं मान्य मित्याह। विसृज्येति। भक्तः स्वये
हिकीं आत्मस्थां मनसि स्थितां दृश्य व्रीडां दृश्यमानां लज्जां विसृज्य आश्वचांडालगोखरं दंडवद्भूमौ प्रणमेत्यन्वयः। ब्राह्मणादौ प्रतिमायां दंड
न प्रमन्तं। अन्यांश्चांडालादीन् प्रतिमा नत मिति भेदः अन्योऽप्यंतर्यामिणं स्मरन्प्रणमेदिति शेषः।।१७।।

प

एतदुपासनावधिमाह ।यावदिति। यावत्सर्वेषु भूतेषु विष्णुरस्तीति मद्भावो मद्विषयं ज्ञानं नोपजायते तावद्वाङ्मनःकायवृत्तिभिरेवमुपासीतेत्यन्वयः।।१८।। एवमुपा
सीनस्य परोक्षज्ञानिनो मतिप्रकारमाह ।सर्वमिति। तस्योपासकस्य सर्वं जगद्ब्रह्मात्मकं ब्रह्मण एव कार्यीकृतमधीनत्वेन वर्तितमिति निर्ममत्वं हरेः प्रीतिजन
कं इत्यप्रेक्षे ब्रह्मणात्मिदं सर्वं यत्किंचिल्लचराचरं इतिपश्यतस्तयेविद्वान्स हि ब्रह्मात्मविन्मतः।। इतिविशिष्टवचनात्ब्रह्मैक्यमुक्त इतिसिद्धं ब्रह्मा
ह । विद्ययेति। विद्ययाज्ञानेनात्ममनीषयास्वरूपबुध्यावाखुलं परमात्मानं स्वात्मादेः परमन्यं परिपश्यतीत्यन्वयः।।व शब्देनान्यमीशमिति स्फुतिं
मोक्ष्यसीति।।१९।। अन्येनापि मुक्तिः स्यात् किमनेनेति तत्राह। अयं हीति। सर्वकल्पानां सर्वमोक्षोपायानां मध्ये अयमुपायो हि सध्रीचीनो मतः

यावत्सर्वेषु भूतेषु मद्भावो नोपजायते।।तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः।।१७।। सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया।। परिपश्यन्नुपरमे
त्सर्वतो मुक्तसंशयः।।१८।। अयं हि सर्वकल्पानां सध्रीचीनो मतो मम।। मद्भावः सर्वभूतेषु मनोवाक्कायवृत्तिभिः।।२०।। न ह्यंगोपक्रमे ध्वंसो
ध्रु
मद्धर्मस्योद्धवाण्वपि।।मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः।।२१।। यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत्।।तदायासो निरर्थः स्या
द्भयादेरिव सत्तम।।२२।।

ध्रु

इति मम सिद्धांत इति ।अनेनान्यानि मूलत्वेनान्येषां ज्ञानानामाभासत्वं सूचयति। अयमिति कर्तृत्यतत्र उक्तं मद्भाव इति।।२०।। अंगोद्धवास्य धर्मस्योपक्रमे कृतेपि तन्
नाशस्य ध्वंसो नाशो नैव भवति ।अस्य धर्मस्य कर्तृ अण्वपि अणुमात्रोपि भामैरायासलक्षणो नास्ति। कुतः अनाशिषः निष्कामस्य मद्धर्मस्य निर्गुणत्वात्
वा मम मुक्तिसाधनत्वान्मया सम्यग्व्यवसितं निश्चितं मतो नान्यधर्मसमोयमद्धर्म इत्यर्थः।।२१।। अस्येवात्र मत्त्वमुपपादयति। यो यमिति। अन्यदेवतोद्देशेन क्रि
ग
यमाणो यो यो धर्मो भयादिना क्लिष्टः क्रियते पुंभिरिति शेषः। स तेन च निष्फलाय कल्प्यते। एतदेव स्पष्टं। तदायास इति। तदायासस्तत्र क्रियमाणो
व्यवलो निरर्थः स्यात्। कथमिव भयादेरिव दुर्नयरूपाधर्मस्यैव नया दिदुर्नयः शोकोप भयं सोति सर्वदैति विवनात्।।२२।।

नाम.
१५२

मा
बुद्धिमतां निश्चयज्ञानवतां बुद्धिर्निश्चयात्मके च मनीषिणां मनसा सारख्यावतां मनीषा मनसा सारोपणमेतत् अनृतेन क्षणे क्षणे अन्यथा भवता
अत एव मर्त्येन शरीरेणाप्य जगता नृतं अन्यदेव प्रकारं सत्यं ब्रह्म मामाप्नोतीति यत्तस्मात् एकदा ज्ञानरूपेण यत्प्रतिष्ठति सर्वदा। चंचलत्वात्सत्यमपि
कृतं जगदुच्यत इति सर्वदेकप्रकारत्वात् सत्यं ब्रह्म सदोच्यत इति वाक्यद्वयेन तत्सत्यानृतशब्दयोरूपार्थ इति।।२३।। सुगमेयोगो वक्तव्यं दर्शितव्याप्तं न
निमय्यायोगं उक्तं इत्युपसंहरति। एवं इति।।२४।। आत्मवादः संसारमोचकं ब्रह्मतत्त्वमेवेत्याशयेनाह। अभीक्ष्णश इति।।२५।। सुविविक्तं तव प्रश्नमवधा

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणां।। यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं।।२३।। एष तेभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः।। समास
व्यासविधिना देवानामपि दुर्गमः।।२४।। अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत्।।एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः।।२५।। सु
धा
विविक्तं तव प्रश्नं मयैतदपि धारयेत्।। सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति।।२६।। य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं।। तस्याहं ब्र
ह्मदायस्य ददाम्यात्मानमात्मना।।२७।। य एतत्समधीयीत पवित्रं परमं शुचि।।स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन्।।२८।। य एतच्छ्रद्धया
नित्यमव्यग्रः शृणुयान्नरः।। मयि भक्तिं परां कुर्वन्कर्मभिर्न स बध्यते।।२९।। अप्युद्धव त्वया ब्रह्म सखे समवधारितं।। अपि ते विगतो मोहः
शोकश्चासौ मनोभवः।।३०।।

ग
यम्मयोक्तं सनातनं ब्रह्मगुह्यं वेदरहस्यं परिज्ञातुमवधीय मनन फलमाह। य एतदिति। सुपुष्कलं यावदपेक्षितं तावद्ब्रह्मज्ञानमेव ब्रह्म एव दायः पितृधनं यस्य त
स्य यद्वा ब्रह्म दायस्य ब्रह्मभागे मोयस्य सतस्तस्य आत्मना प्रसन्नेन मनसा आत्मानं मद्विषयज्ञानं दत्वा मत्स्वरूपं ददामि।।२७।। अध्येतुः फ
लमाह। य इति। मां दर्शयन्।।२८।। श्रोतुः फलं श्रमाह। य इति।।२९।। अज्ञातार्थं संस्मृत्य वक्तृ सखे लक्षणेन अवधारितं पृच्छति। अपीति। समुपधारितम
पि किं। मोहश्च विगतोप्यसौ मनोभवः मनःशालत्वेन जातः शोकश्च नष्टः किं।।३०।।

×× धारयन् पुरुषः परं ब्रह्म सनातनं विज्ञात्वा प्राप्नोतीत्यन्वयः।।२६।। ग्रं ४ ×

भा.पु.
१५३

श्री दिव्यं

रतस्यतत्तानोपदेष्टुः महाफलसंभवेपियोग्यायैवोपदेष्टव्यंनायोग्यायेत्याह नैतदिति ॥३१॥ एतद्दोषैर्वर्जिताय यदि भक्तिः स्यात्तर्हि तेभ्योपि ब्रूयादित्य
र्थः ॥३२॥ एवमेव मुक्तिसाधनं नान्यदित्याशयेनाह नैतदिति ॥३३॥ नहि लोके सर्वार्थोपि मितिनः किं चिदस्तीति तत्राह यावानिति नृणां यावान्तावांस्तेभ्योहं भवे
चयः ॥३४॥ एवमेव मुक्तिसाधनं नान्यदित्याशयेनाह नैतदिति तत्तत्फलं विधाय प्रतिरुद्धत्वान्निवर्तनमनुच्छेदार्थः ॥३५॥ न चैवं चेद्विविदिषाभानेनकदाप्यनुद्यो मुक्तेरत्राह मत्येति
तावांस्तु चतुर्विधो मोहस्त्वेतदुपलक्षणं सर्वपरो विधिप्रतिरुद्धत्वान्नितान्तमच्छेदस्तदर्थः

नैतत्त्वया दाम्भिकाय नास्तिकाय शठाय च । अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां ॥३१॥ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च । साधवे शु
चये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां ॥३२॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते । पीत्वा पीयूषममृतं पातव्यं नावशिष्यते ॥३३॥ ज्ञाने कर्मणि योगे
च वार्तायां दण्डधारणे । यावानर्थो नृणां तात तावांस्तेहं चतुर्विधः ॥३४॥ मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥
तदामृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥३५॥ श्रीशुक उवाच ॥ स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य ॥ ब
द्धाञ्जलिः प्रीत्युपरुद्धकण्ठो न किंचिदूचेश्रुपरिप्लुताक्षः ॥३६॥ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राजन्बहुमन्यमानः ॥ कृताञ्जलिः प्राह य
दुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविन्दं ॥३७॥ उद्धव उवाच ॥ विद्रावितो मोहमहान्धकारो य आश्रितो मे तव सन्निधानात् ॥ विभावसोः किं नु
समीपगस्य शीतं तमो भीः प्रभवन्त्यजाद्य ॥३८॥

अथ मोक्षप्राप्तिं विवृणोति मर्त्य इति त्यक्तसमस्तकर्मा हरिरेव मयि स्थित्वा सर्वं कर्म करोति अहं तदधीनो नैव कर्म करोमीत्यस्य चेतसीत्येवं निवेशितात्मा भ
वति तदामृतत्वं प्रतिपद्यमानः प्राप्तुं योग्यो भवन्सोऽमया आत्मभूयाय मम निर्दुःखानन्दानुभवरूपमोक्षाय कल्पते इत्यन्वयः ॥ यमितैः प्रवृत्तैस्तेन उच्यते
विष्टभ्य ॥३९॥ उद्धवस्य भक्त्यतिशयलक्षणमाह स एवमिति ॥३६॥३७॥ अप्युद्धवस्य त्याद्युक्तं परिहरति विद्रावित इति य आश्रितो मम आ मोहम
तव तः स एव सन्निधानान्मोहान्धकारागमः कथमत्राह विभावसोरिति हे अजाद्य तमश्चाभिभ्रमं भवति किं नु ने ॥३८॥ ॥श्री॥
१५३

× मोक्षौ... प्रतिमे मया विकीर्षितो भवेत् । यदा मदुद्देशेन म × ४ प्रेमाध

हरेः स्वात्मन्यनुकंपातिशयं हेतुं करोति प्रत्यर्पित इति हित्वेति अनुकंपितामपि प्रत्यर्पितं तस्मिन्मे विज्ञानमयः प्रदीपो हि स्वस्मात्तस्मादिति श्रेयः अतः सर्वस्माद
पकारकत्वाद्भ्रान्तिं निवर्त्यदतिप्रा...हित्वेति ॥३९॥ कीदृशो मोहान्धकारो योसौ तानासिनाछिन्न इति तत्राह वृक्णश्चेति योसृष्टिविवृद्धये त्वया प्रसा
रितोक्ता रितः माया स्वमायया हि स्वसंसारयामी सुदृढत्वं निजेच्छया प्राप्तेरात्मविवोधकारव्यहेतिः खड्गेनेत्यन्वयः ॥४०॥ स्वात्मनो भगवदेकशिष्यत्वं प्रकट
यन्नाह नम इति

प्रत्यर्पितो मे भवतानुकंपिना भृत्याय विज्ञानमयः प्रदीपः ॥ हित्वा कृतज्ञस्तव पादमूलं कोन्यं समीयाच्छरणं त्वदीयं ॥३९॥ वृक्णश्च मे सुदृढः स्नेहपाशो
दाशार्हवृष्ण्यन्धकसात्वतेषु ॥ प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना ॥४०॥ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां ॥ यथा त्वच्च
रणाम्भोजे रतिः स्यादनपायिनी ॥४१॥ श्रीभगवानुवाच ॥ गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं ॥ तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शु
चिः ॥४२॥ ईक्षयालकनन्दाया विधूताशेषकल्मषः ॥ वसानो वल्कलान्यङ्ग वन्यभुक्सुखनिस्पृहः ॥४३॥ तितिक्षुर्द्वन्द्वमात्राणां सुशीलः संय
तेन्द्रियः ॥ शान्तः समाहितधिया ज्ञानविज्ञानसंयुतः ॥४४॥ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तो मद्ध
र्मनिरतो भव ॥४५॥ अतिक्रम्य गतीस्तिस्रो मामेष्यसि ततः परं ॥४६॥ श्रीशुक उवाच ॥ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य
पादयोः ॥ शिरो निधायाश्रुकलाभिरार्द्रधीर्न्यषिञ्चदद्वन्द्वपरोप्यपक्रमे ॥४७॥ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः ॥
कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ॥४८॥ ततस्तमन्तर्हृदि सन्निवेश्य गतो महाभागवतो विशालां ॥ यथोपदिष्टां
जगदेकबन्धुना तथा समास्थाय हरेरगाद्गतिं ॥४९॥

रतिर्भक्तिः ॥४१॥ भगवाननुशास्ति गच्छेति गच्छेति ईक्षया स्नानेन मत्पादतीर्थोदैः मिश्रितत्वात्प्रक्षालिताशेषपापविध्वंसशालिन्युक्तायाः अलकनन्दा
या जलस्नानोपस्पर्शनैः शुद्धः ॥४२॥४३॥४४॥ तिस्रः गतीः जाग्रत्स्वप्नसुषुप्तिलक्षणाः ॥४५॥ हरिमेधसा विष्णुना आत्मनो हरिरिव मेधनीतिवाह
रिमेधसस्तेन ॥४६॥ न शक्नुवन्स्वाभिप्रायविरहेणानिच्छन्दुस्त्यजेति ॥४७॥ विशालां बदरीं ॥४८॥

भा०द०
१५८

सारो बले स्थिरांशो विन्यायेक्कौ वैत्रिपुरसुंदर्यभिधाने।

नकेवलमेतज्ज्ञानमुद्धवस्यैवफलप्रदं निषेवमाणानामितरेषामपीत्याह। यदेतदिति। जगत्सर्वं।४९। भगवतो भक्तानुकंपितां विस्मयमान
उक्तरयं यथानुवर्तनार्थं भगवत्प्रसादमाकांक्षमाणो भगवंतं नमति। भवभयमिति। अहंतमाद्यं सर्वज्ञं पुरुषर्षभं पुरुषोत्तमं नतोस्मीत्यन्वयः॥
यो भवभयमपहंतुं उन्मूलयितुं निजयशो मृतं भृत्यवर्गान्पाययन्नास्ते। कीदृशं ज्ञानं विज्ञानमेव सारं वैरवर्णीयं स्वादु यस्मिंस्तत्तथा निगमकृ

यरेतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं। कृष्णेनयोगेश्वरसेवितांघ्रिणा सच्छ्रद्धयासेव्यजगद्विमुच्यते
॥४९॥ श्रीशुक उवाच॥ भवभयमपहंतुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं। अमृतमुदधितश्चापाय
यद्भृत्यवर्गान्पुरुषमृषभमाद्यं विष्णुसंज्ञं नतोस्मि॥५०॥ ॥इतिश्रीभागवते महापुराणे एकादशस्कंधे भगवदु
द्धवसंवादे उद्धवबदरीप्रवेशो नाम एकोनत्रिंशोध्यायः॥ ॥

दुदद्भं वैदलक्षणकुमुदैकदेशस्थितं। अनेनवेदस्य नामनंतत्वे पितज्ञ योग्यानुसारेणोद्धृतमिति ज्ञायते। अतएव वेदसारं ने घेणुज्ञातव्येषु सारं
श्रेष्ठं। ननु वेदैकदेशस्थितं चेत्तस्थापेक्षितसामग्र्याभावान्नेदमुपादेयमिति तत्राह। उदधितश्चेति योग्यताविशेषादधिकारिणांषणेने
नसमुद्धृतमानं। भृंगवद्यथा भृंगो भृंगीं मधुपाययति तथेति॥५०॥ इतिश्रीमद्भागवतटीकायां विजयध्वजयीव्याख्याने एकादशे एकोनत्रिंशः॥

१५८

भगवतो मायालक्षणमाह। स्वेच्छया रूपितुं यादवानां मिथो विधनिमित्तं निधनं तत्रजनचेतो गुरागजननाय बहुभुजत्वादि निरूपलक्षणदर्शनं दुर्गमनो मोहनायेत्यर्थः
भगवतो मायालक्षणमाह। स्वेच्छया कृष्णाध्याये वक्ति। तत्रादौ परीक्षितः प्रश्नप्रकारं भगवद्वाक्येन यादवानां द्वारकायां भक्तीत्यत्र भासप्रयाणंतीर्थ
मधिगम्य स्वपदं त्वं त्वगेदानमित्यतत्त्वं च मक्तिमध्याये वक्ति। तत्रादौ परीक्षितः। अत्यजत्। अतिरतिशये वर्तते। अतिस्यादधिकार्थे कोप्यस्ता यामतिक्रमे इतियादवः
स्नानपूर्वकं विभादिष्ठजनं च वक्ति। ततो महाभागवत इत्यादिना॥१॥ अत्यजत्। अतिरतिशये वर्तते। ...
अजहत्। यस्यां तीर्थौ भूर्लोकात्स्वर्गलोकं प्रत्यंतरत्वसाहृतं वत्॥४॥ अप्राकृतरूपं वदिव्यंत्यक्तुमयोग्यं। स्वाभिकत्वेन सतां अवणमनोगोचरत्वादि
रूपः
दृदेसं
स्वरूपादिमुक्तिरत्वादेतिभावेनाह। प्रत्याक्रष्टुमिति। अबलायत्रयस्मिन्दूरे गेमग्नं नयनं प्रत्याक्रष्टुं ततः आनैव शेकुः। सतां कर्णाविष्टमात्मल उं

राजोवाच॥ ततो महाभागवते उद्धवे निर्गते वनं। द्वारवत्यां किमकरोद्भगवान्भूतभावनः॥१॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः॥ गा
प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत्॥२॥ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं। यच्छ्रीर्वा म्बला
चां जनयति रतिं किं नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः॥३॥

नरस्वति नं मनो सदिन्यघ्रशाकं सहत्वादिलक्षणं न सरति कर्णादि नोपसरतीति ततो मत्सता मिति केवलं गैति। यद्रूपं। यच्छ्रीवाक्यं यस्यश्रीमद्वाक्यैर्म तिशये
नः कर्णयोरतिं निर्दुःखसुखं जनयति करोतीति वा। श्रीवाचामिति पाठे लक्ष्म्यां निवसा रतिं जनयति श्रोतृणामिति शेषः। यच्छ्रीकिंतनीयोतिरत्वादे
सुखदूर्णकवीनां तुमानमनुमानं मानानुसारी। इदं सर्वस्मिन्नुक्तार्थे मानं भवति। किंनु मानमिति पाठे। देहः कः सुखात्मकः कवीनां मानानुसारी
त्यर्थः। यद्बुद्धि भारताख्य जिष्णोर्जयस्तैरर्जुनस्य रथगतं दृष्ट्वा तत्साम्यं तत्स्वरूपस्य निर्दोषत्वादिलक्षणेनसाम्यमीयुराबुर्भिप्रायादय
पुधि इति शेषः नस्य तु तदेतादृशं रूपं कथमाहरदित्यन्वयः॥३॥

१५५

राज्ञा पृष्टः शुको त्राह। दिवीति।।४।। द्वारवत्यां दृश्यंते।।५।। कंदं बु रसधारा तु मदिरा निर्मितं मधु। मैरेयमिति संप्रोक्तं यत्ना न दृश्यते मन इति। दिष्टेन दैवसंज्ञे

श्रीशुक उवाच।। दिवि भुव्यंतरिक्षे च महोत्पातान् समुत्थितान्। दृष्ट्वासीनान् सुधर्मायां कृष्णः प्राह यदूनिदं।।४।। श्रीभगवानुवाच।। एते घोरा
महोत्पाता द्वार्वत्यां यमकेतवः। मुहूर्तमपि न स्थेयमत्र वो यदुपुंगवाः।।५।। स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः। वयं प्रभासं यास्यामो
यत्र प्रत्यक् सरस्वती।।६।। तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः। देवताः पूजयिष्यामः स्नपनालेपनार्हणैः।।७।। ब्राह्मणांस्तु महाभागान् कृ
तस्वस्त्ययना वयं। गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः।।८।। विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं। देवद्विजगवां पूजा भूतेषु प
रमा दया।।९।। इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः। तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः।।१०।। तस्मिन् भगवतादिष्टं यदुदेवेन यादवाः
।।चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं।।११।। ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु। दिष्टविभ्रंसितधियो यादवा नष्टमंगलाः।।१२।।
महापानाभिमत्तानां वीराणां दृप्तचेतसां।। कृष्णमायाविमूढानां संघर्षः सुमहानभूत्।।१३।। युयुधुः क्रोधसंरब्धा वेलायामाततायि
नः। धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः।।१४।। पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि।। मिथः स
मेत्याश्वतरैः सुदुर्मदा न्यहन् शरैर्दद्भिरिव द्विपा वने।।१५।। प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी।। सुभद्रसंग्रा
मजितौ सुचारुगदौ सुमित्रासुरथौ समीयतुः।।१६।। अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः।। अ
न्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं।।१७।।

न भगवता।।१०।।११।। संघर्षः कलहः।।१३।। वेलायां समुद्रजलसीम्नि।।१४।। अर्वाणैरश्वैः।।१५।।१६।। दद्भिर्दंतैः।।१७।। गंगायेनमः

राम
१५५

कृ

अध्वर्युदारुतिके चिद्यादवविशेषाः।।१८।।१९।। एरकाः समुद्रतीररुहः सूचीमुखतृणानि जतुरूपाण्ययंत्रं।।२०।।२१।।२२।। एरकामुष्टिमुष्ट्या एव परिघैः
।।२३।।२४।।२५।। पौकवर्ण्यपेण कृष्ण भगवद्विषयं योगं ध्यानं तमास्थाय सम्यगेकाग्रचित्तत्वेन कृत्वा योगं योगनामानं विष्णुमभिध्यात्मानं स्वांतर्यामि
दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः।। विसर्जनाः कुकुराः कुंतयश्च मिथस्तु तं जघ्नुः सुविसृज्य सौहृदं।।१८।। पुत्रा अयुध्यन् पितृभिर्भ्रा
तृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः।। मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन् ज्ञातय एव मूढाः।।१९।। शरेषु हीयमानेषु भज्यमानेषु धन्वसु।। श
स्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः।।२०।। ता वज्रकल्पा ह्यभवन् परिघा मुष्टिना हृताः।। जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते।।२१।। प्रत्यनीकं मन्य
माना बलभद्रं च मोहिताः।। हंतुं कृतधियो राजन्नापन्ना आततायिनः।।२२।। अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन।। एरकामुष्टिपरिघौ चरंतौ जघ्न
तुर्युधि।।२३।। ब्रह्मशापोपसृष्टानां कृष्णमायावृतात्मनां।। स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोग्निर्यथा वनं।।२४।। एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केश
वः।। अवतारितो भुवो भार इति मेनेवशेषितः।।२५।। रामः समुद्रवेलायां योगमास्थाय पौरुषं।। तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि।।२६।।
रामनिर्याणमालोक्य भगवान्देवकीसुतः।। निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं।।२७।। बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया।।
दिशो वितिमिराः कुर्वन् विधूम इव पावकः।।२८।। श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसं।। कौशेयांबरयुग्मेन परिवीतं सुमंगलं।।२९।। सुंद
रस्मितवक्त्राब्जं नीलकुंतलमंडितं।। पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं।।३०।। कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः।। हारनूपुरमुद्राभिः
कौस्तुभेन विराजितं।।३१।। वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः।। कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं।।३२।।

रामात्मनि स्वरूपे भगवद्रूपे संयोज्यैकीभवतीति सा चिंत्यदेहस्त्यजत्यन्वयः आत्मनेपदप्रयोगेन सुखेन देहत्यागं सूचयति।।२६।। भगवता देहत्यक्ता
दिवंगते तस्यदर्शनमसुरजनमोहनार्थं कृतमिति ज्ञापयन् शुको हरेस्तनू हानी न नखरूप्येकारं श्रुते वि अभिहितास्य।।३०।।३१।।

भा०ए
१५९

भा०स्क०

अत्र श्रीकृष्णो सुरजनमोहकरीं मायां प्रकटयति जरानाम्ना व्याधेनेत्याह। मुसलेति। मुसलावशेषायःखण्डेन कृतः शरो यस्य सः मुशलावशेषायःखण्डकृतेषुः। यद्वा मुसलावशिष्टायःखण्डेन कृतः शरो यस्येत्यर्थः। मृगस्याकारं मृगत्वबुद्धिजनकं ॥३३॥ ३४। अजानता मया ॥३५। अस्ताघ्नु वितं उ
भिति तं मगलुब्धकं मगलो भिन्नं ॥३७। इति तत्कृतब्रह्महत्यादिदोषपरिहारः सद्भावेप्यन्यकृतदोषपरिहारो नास्त्यपतेनाधःपातं वाली मंदधनुश्चेति भावेनाह। यस्येति। विरंचरुद्रादयोऽपि विरिंचिरस्य तनया अपि च गिरां पतयो बृहस्पत्यादयो तैरपि तेयस्य तवात्मयोगरचितं दृष्टेस्सामर्थ्यं

मुसलावशेषायःखण्डकृतेषुर्लुब्धको जरः। मृगास्याकारं तच्चरणं विव्याध मृगशङ्कया ॥३३॥ चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः। भीतः
पपात शिरसा पादयोरसुरद्विषः ॥३४। व्याध उवाच। अजानता कृतमिदं पापेन मधुसूदन। क्षन्तुमर्हसि पापस्य उत्तमश्लोक मेऽनघ ॥३५॥
यस्यानुस्मरणं नॄणामज्ञानध्वान्तनाशनम्। वदन्ति तस्य ते विष्णो मयासाधु कृतं विभो ॥३६। तन्माशु जहि वैकुण्ठ पाप्मानं मृगलुब्धकं। यथा पु
नरहं त्वेवं न कुर्यां सदतिक्रमं ॥३७॥ यस्यात्मयोगरचितं न विदुर्विरिंचो रुद्रादयोऽस्य तनयाः पतयो गिरो ये। त्वन्मायया पिहितदृष्टय एतदञ्जः किं
तस्य ते वयमसद्गतयो गृणीमः ॥३८।

पापेन कृतं स्वरूपादिकं न विदुः। तत्र निमित्तमाह। त्वन्माययेति। त्वन्मायया बंधकशक्त्या विहिता दृष्टयस्तेषां ते तथा अतो न जानंत्य इत्यर्थः। अतस्तस्य ते
मोऽपवादाश्च व्याधयो निगता अतएव ज्ञानकृत्यावयन्तं तत्त्वं एतच्चरितं जोग ॥३९॥ मत्कि नैव ज्ञातुं शक्यत इत्युक्त्वा स्वोत्कृष्टादिकमेवाप्येतद्रूपपरिहा
रोपायातानाधः पातात्स्वेमेव मां जहीत्यर्थः। सुमहत्कि इति के चित्पठंति। अनेन केमुत्यन्यायो दर्शित इति ज्ञेयं ॥३५। श्रीरामचन्द्राय नमः॥
नाम
१५९

सि

भगवान् भक्तवत्सलत्वात्प्रसन्नोऽभिव्यक्तिरेवाविष्टपापधीनीतित्वावं कृत्वाबलात्मा भैरिति। मा भैरभयं माकर्णीः स्वकृतः शरवेधो मे काम्यतः कांक्षितस्वर्थः
हियत्स्वतुष्टे जनमोहनं प्रयोजनं सूचयति। अतः कर्मस्वेष फलं ददासीति तत्राह। याहीति। सुकृतिनां पदमित्यनेन नुस्म पितृकृत मेषा ति स्वि तिध्वनयति।
भिति ॥४१॥ ४०॥ इदं प्रारूतपुरुषोत्सवतनोकांतरविवर्तंदेहत्वमिति भावेनाह। इतीति ॥४०। प्रासंगिकं समाप्य कथाशेषं प्रस्तौति। दारुक इति। आप्रैक्षं गवेषणं चि
॥४१॥ इदं प्रारूत पुरुषो लवतद्रूकांतरविवर्तं देहत्वमिति भावेनाह। इतीति ॥४०। तत्राप्यश्च श्रमलेशतेर खं
तं कृष्णमनाधिगम्य विज्ञाय पुनः तुलसिकामोदोऽयं वायुसतथा गंधवायुमाघ्राय ज्ञात्वा तुलसीकामोदवायोरभिमुखं ॥४१॥ तत्राश्वश्रमलेशतेन

भि श्रीभगवानुवाच। मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे। याहि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदं ॥३९॥ श्रीशुक उवाच। इत्यादिष्टो भगवता कृष्णेनेच्छा
शरीरिणा। त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥४०॥ दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य ताम्। वायुं तुलसिकामोदमाघ्रायाभिमु रु
खं ययौ ॥४१॥ तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिम्। स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबाष्पलोचनः ॥४२॥ ले
अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रनष्टा तमसि प्रविष्टा। दिशो न जाने न लभे च शान्तिं यथा निशायामुडुपे प्रनष्टे ॥४३॥

नं तं कृष्णं दृष्ट्वा ॥४२॥ प्रभो ते तव चरणाम्बुजमपश्यतो मम दृष्टिः प्रनष्टा अस्तं गता। दृश्यमानायाः स्वयं नाशस्त्वस्य तत्र उक्तं। तमसीति फलमाह। दिशो इति।
शांतिं मंगलं शांतिः। प्रशममं गच्छतीत्यादयः। उडुपे चंद्रे प्रनष्टे अस्तंगते अथो उडुभिः सह चंद्रस्यादर्शनं विवक्षितं। अन्यथा तेन नक्षत्रैः प्रक्षणेना दि
दिगादिविवेकोपपन्ने रित्यत उडुपपदप्रयोग इति। पादप्रपन्नः सूतः कृष्णमाह। योऽयं तव चरणाम्बुजमाश्रितः तस्य मे दृष्टिः प्रनष्टेति योजना ॥४३॥
दारुकः

ना॰पु॰
१५३

इदमप्यतिमाहात्म्यं सूक्ष्मभावेनाह। इतीति। उदीक्षितः हरिस्यन्दनः ऊर्ध्वं गतो दृष्टः। अत एव तेन नानीतस्तथाद्यैवेत नृपद्वन्द्वि दिव्यानि लौकिकानि भगव
न्माहात्म्यबुद्धिरितरेषां ज्ञानिनां शेषेण लक्षण संयोगगतिं पश्यतो चेतन्यात्मका निरथादीनीत्यहो विश्वमूर्तेर्माहात्म्यमिति ज्ञातव्यं।।४४।।

श्रीशुक उवाच।। इति ब्रुवति सूते वै रथो गरुडलांछनः।। खमुत्पपात राजेंद्र साश्वध्वज उदीक्षितः।।४४।। तमन्वगच्छन् दिव्या
नि विष्णुप्रहरणानि च। तेनातिविस्मितात्मानं सूतमाह जनार्दनः।।४५।। श्रीभगवानुवाच।। गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः।।
संकर्षणस्य निर्याणं बंधुभ्यो ब्रूहि मद्दशां।।४६।। द्वारकायां च न स्थेयं भवद्भिश्च स्वबंधुभिः। मया त्यक्तां यदुपुरीं समुद्रः प्लावयि सर्वे
ष्यति।।४७।। स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः।। अर्जुनेनाविताः सर्व इंद्रप्रस्थं गमिष्यथ।।४८।। त्वं तु मद्धर्ममास्थाय ज्ञा
ननिष्ठ उपेक्षकः। मन्मायारचनामेतां विज्ञायोपशमं व्रज।।४९।। श्रीशुक उवाच।। इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः
पुनः। तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं।।५०।। ।।इति श्रीभा॰ एकादशस्कंधे त्रिंशोऽध्यायः।। ।।३०।। ।।

तेन रथादिगमनेन।।४५।।४८।। पुत्रादावुपेक्षकः।। एतां संसाररचनां मायया मदिच्छया रचनाप्रकारो यस्यास्तां मन्मायारचनामेतामिति।।४९।।
दुर्मनाः दुःखिततितः करणः पुरीं द्वारवतीमितः।।५०।। ।।इति श्रीभागवते महापुराणे एकादशस्कंधे त्रिंशोऽध्यायः।। ।।

नाम
१५३

हरेः स्वनिर्याणप्रकारादिकं कथयत्यस्मिन्नध्याये।। तत्रादौ ब्रह्मादीनामागतिमाह अथेति। भवान्या रुद्राण्या समेत।।१।। द्विजान्त्र्यध्ययश।२।३।।४।।
विभूतीः स्वसन्निधानस्थानविशेषान् सिद्धादीनात्मानं स्वमात्मनि निरुरुत्से।।५।। अग्नेय्या योगधारणया जातेनाग्निना तनुमदग्ध्वा पश्चात् स्वकं धाम
न्ये विशत्। आग्नेय्या धारणया देहं दग्ध्वा परं पदं यांति देवाः समस्तास्तेषामन्यां तनुं हरिः। नृसिंहरूपी सर्वथा भिवाताभिरलंकृतः।। नत्यतेत्र उ

श्रीशुक उवाच।। अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः। महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः।।१।। पितरः सिद्धगंधर्वा विद्याधरमहोरगाः।
चारणा यक्षरक्षांसि किंनराप्सरसो द्विजाः।।२।। द्रष्टुकामा भगवतो निर्याणं परमोत्सुकाः। गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च।।
।।३।। ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः।। कुर्वंतः संकुलं राजन् भक्त्या परमया युताः।।४।। भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः महै
संयुज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत्।।५।। लोकाभिरामां स्वतनुं धारणाध्यानमंगलं।। योगधारणयाग्नेय्यादग्ध्वा धामावि
त्स्वकं।।६।। दिवि दुंदुभयो नेदुः पेतुः सुमनसश्च खात्।। सत्यं धर्मो धृतिर्भूमौ कीर्तिः श्रीश्चानु तं ययुः।।७।। देवादयो ब्रह्ममुख्या आवि
शंतं स्वधामनि।। अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः।।८।। सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं।। गतिर्न लक्ष्य से
ते मर्त्यैस्तथा कृष्णस्य दैवतैः।।९।। ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः।। विस्मितास्तां प्रशंसंतः स्वं स्वं लोकं ययुस्तदा।।१०

ये देवाः स्वयं कृष्णादिदृक्षवा न्। अदग्ध्वैव तनुं यातीति नित्यानंदस्वरूपत्वात् विवक्षवनादुक्तार्थ एवांगीकरणीय इति भावः।।६।। तं कृष्णमनु।।७।। अत्राप्येवं मा
ति हात्म्यंशयमाह। देवादय इति। यथा मर्त्यैरभ्रमंडलं भित्वा काशे यांत्याः सौदामिन्याः गतिर्न दृश्यते। तथा कृष्णस्य गतिर्दैवतैर्न लक्ष्यते।। १०।।
भि ति

जन्मादिमतो हरेः तनुभृदः ध्येति कथं घटत इति तत्राह। राजन्निति। परस्य सर्वविलक्षणस्य परमात्मनः तनुभृतां जननं च अप्ययं च ईहां चेष्टां च यात् माया
या विडम्बनं स्वेच्छानुकरणमवेहि। यथा नटस्य राजादिरूपग्रहणं विषयचेष्टा। प्रजापतिश्चरति गर्भे अन्तः अजायमानो बहुधा विजायते। अजा
य नो जातो बहुधा हि दृश्यते स्मृतो मृत्यव तथा।। माययात्मनि दर्शितं नित्यमन्यानिमोहनायेति क्रमः एतदेवाह अन्यान्दुरेखं स्वभावमित्यर्थः। स्वतो देहाद्यभावेन हरेः
नो सर्वान्यादिकं कथं युज्यत इति तत्राह। सृष्ट्वेति। स हरिः आत्मना स्वरूपशक्त्या इदं जगत् सृष्ट्वा अनुविश्य आवतारैर्विहृत्य तेन प्रलयसमये संहृत्य आत्म महिम्नोपरतः
स्वमहिम्नि स्थित आस्ते अनेन स्वमहिम्ना सर्वं घटत इत्युक्तं भवति।।११।। एवमपि कथं गुरुपुत्र आनयनं हरेर्जननादिकं मायया प्रदत्तमिति तत्राह। मर्त्येनेति। यः

राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य। सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते।।११।।
मर्त्येन यो गुरुसुतं यमलोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं। जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं सदेहं।।१२।।

कृष्णः यां मर्त्येन शरीरेण सह यमलोकं यमेन नीतं स्वगुरुपुत्रमानीतवान् यमेनस्वलोकं नीतमित्यर्थः। गुरोः सान्दीपनेः सुतं द्रौणेः परमास्त्र
दग्धं त्वां चानयत् तथा यो बाणपुरे अन्तकं रुद्रमपि जिग्ये रुद्रो मा विशीत कद्दित्श्रुतेः। यश्च पारिजातहरणे अन्तकं यमपि जिग्ये इति अन्तकान्तकमि
ति पाठे यमस्याप्यन्तकं रुद्रमित्यर्थः। सोऽनीशोऽन्येश्वररहितः श्रीकृष्ण ईशानां सर्वेशानां रुद्रादीनामपीशत्वेन तोतीति इति यावत् तस्मिन्स्वदेहे
मृगयोर्नीश्वरः स्यात् किं न स्याद् एवात्मेति सामर्थ्यप्रकटनाय विप्रशापमनुरुन्धन्निव विद्ध एवास्वव्याधसामीप्यं कृत्वा जरा नामोचयत्तेन शल्येन पुनः
विद्धत्वं तस्य स्वात्मनः प्रकाश्यते न प्रसादितस्तस्मै स्वर्लोकं ददावित्यर्थः।।१२।।

तर्हि किमिति भल्लभद्रादीन् सदेहान्स्वलोकं न नैषीदिति तत्राह।। तथापीति। यद्यपि अशेषस्थितिसंभवाप्ययेषु अनन्यहेतुः स्वयमेव हेतुः स्वतन्त्र
विवर्जितः। कुलालस्य मृद्दण्डादिवदन्यापेक्षावत् यस्य। दिव्यत्वापेक्षितत्वेन कथं हेत्वन्तरं नास्तीत्यत उक्तं अशेषशक्तिधृगिति। तथापि बलभद्रा
दीन्नवपुः प्रणेतुं नैच्छत्।। भगवान् मर्त्येन मरणशीलेन शरीरेण किं प्रयोजनमिति भावेन नाश्चर्येषितं दर्शितमिति घोषः अनेनापि किं प्रयोजनमत
उक्तं। स्वस्थगतिमिति। स्वस्थगतिं स्वभक्तानां स्वविषयज्ञानलक्षणयोगगतिं प्रदर्शयन् इदं नेत्रं दर्शयन् प्रयोजनमित्यर्थः। अतः समर्था

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्। नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रद
र्शयन्।।१३।। य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां। प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां।।१४।। ।।

पि प्रयोजनभावात् अनीतवानित्यर्थः। अतः स्वशरीरं नेतुं नैच्छदित्ययोगिनुपपन्नः।। ऊर्ध्वं हेतुविरुद्धत्वादसंभवो द्वावतो। जगतो मोहनार्थाय भगवा
न्पुरुषोत्तमः। दर्शयन्मानुषीं चेष्टां तथा मृत्युकवद्विभुः।। प्रकाशयन्स्वदेहेऽपि मोहाय च दुरात्मनां। माययात्मनि तं देवस्तत्र दृष्ट्वा प्रदर्शयेत्
कुतो हि मृत्युर्देवस्य मृत्युभावात्परात्मनः इति प्रमाणसद्भावाच्च।।१३।। एतद्ध्यानस्य स्वप्राप्तिहेतुत्वाद्योग्यं पावार्थमिति भावेनोक्तमुपसंहर
ति। य एतामिति।।१४।।

नाम
१५८

कृष्णोक्तो दारुकः किमकरोदिति तत्कथाशेषमाह । दारुक इति ॥१५॥१६॥१७॥ भगवद्विषयीं स्मृतिं विजहुः स्मरणमिति शेषः ॥१८॥१९॥

दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः । पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः ॥१५॥ कथयामास निधनं वृष्णीनां
कृत्स्नशो नृप । तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः ॥१६॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः । व्यसवः शे
रते यत्र ज्ञातयो घ्नंत आत्मनः ॥१७॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ । कृष्णरामावपश्यंतः शोकार्ता विजहुः स्मृतिं ॥१८॥
प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः । उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः ॥१९॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ।
वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥२०॥ कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः । अर्जुनः प्रेयसः
सख्युः कृष्णस्य विरहातुरः ॥२१॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः ॥ बंधूनां नष्टगोत्राणामर्जुनः सां
परायिकं ॥ हतानां कारयामास यथावदनुपूर्वशः ॥२३॥

तदात्मकास्तदेकचित्ताः ॥२०॥ आत्मानं स्वं ॥२१॥ सांपरायिकं परेतविषयं कर्म ॥१२॥ श्रीरामजयराम जयजयराम रामरामेति

१५९

१६०

ग

अन्यत्र ग्रंथांतरे । इहास्मिन्ग्रंथे परमहंसगतो परमहंसानामाश्रये हरेश्चरणे वा । यत्तर्कं निगमोपि वक्तुमनलं शास्त्रं दुरालक्षितं यत्याद्याः श्रमुताबलं च
विधुरा निःशेषचिन्ता अपि ॥ अप्येवं जलबिंदुमातिगते येषां सदेकं पदं तं दृष्ट्वा स्वमखंडबुद्धिहृदया वासं प्रपंदे परं ॥८॥ एकादशस्कंधगतापद

द्वारकां हरिणा त्यक्तां समुद्रोप्लावयत्क्षणात् । वर्जयित्वा महाराज श्रीमद्भगवदालयं ॥२३॥ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः ॥
स्मृत्याशेषाशुभहरं सर्वमंगलमंगलं ॥२४॥ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः । इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् ।
॥२५॥ श्रुत्वा सुहृद्वधं राजन्नर्जुनात्ते पितामहाः । त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं ॥२७॥ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म च ॥
कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ॥२८॥ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि । अन्यत्र चेह च श्रुतानि
गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ॥२९॥ इति श्रीभागवते महापुराणे पारमहंस्यां संहितायामेकादशस्कंधे मौसलं नाम
एकत्रिंशत्तमोध्यायः ॥ ॥छ॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥श्रीवेदव्यासार्पणमस्तु॥ ॥छ॥ ॥श्री॥ ॥छ॥

रत्नावलिः स्फियं ॥ अधीयीवं मुकुंदस्य वनमालेव राज्यतां ॥ ॥ इति श्रीमत्परमहंसतीर्थपूज्यपादशिष्य श्रीविजयध्वजतीर्थभट्टारकस्य कृतौ
श्रीमद्भागवतटीकायां पदरत्नावल्यामेकादशस्कंधे एकत्रिंशोध्यायः ॥ ॥छ॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥छ॥ ॥श्री॥ ॥

१६०
राम

84/1

१३०

।। एकादशस्कंधः समाप्त ४ ।।

84/1

१८०

१३०

84/1

॥ एकादशस्कंधः समाप्त॥

84/1

१८०

तर्हि किमिति भक्तमद्वादीन् स देहान् स्वलोकं न नैषीदिति तत्राह॥ तथापीति। यद्यपि अशेषस्थितिसंभवाप्ययेषु अनन्यहेतुः स्वयमेव हेतुः स्वतंत्र विवर्जित। कुलालस्य मृद्द्रव्यादिशक्त्यपेक्षावत्तस्य। दिव्यशक्त्यपेक्षितत्वेन कथं हेत्वंतरं नास्ति। यत उक्तं अशेषशक्तिधृगिति। तथापि बलभद्रादीनां वपुः प्रणेतुं नैच्छत्॥ भगवान् मर्त्येन मरणशीलेन शरीरेण किं प्रयोजनमिति भावेनात्र धारयितं दृश्यत इति प्रयोजनं अनेनापि किं प्रयोजनमत उक्तं। स्वस्थगतिमिति। स्वस्थगतिं स्वभक्तानां स्वविषयज्ञानलक्षणं योगगतिं प्रदर्शयन् बन्धमेवं प्रदर्शयन् प्रयोजनमित्यर्थः। अतः समर्थो

कृ

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्॥ नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन्॥१३॥ य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां॥ प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां॥२८॥ ॥

पि प्रयोजनभावाभावीनवानित्यर्थः। अतः स्वशरीरं रक्षितुं नैच्छदित्यर्थो ऽनुपपन्नः॥ उक्तं हि तु विरुद्धत्वाद् असंभवो ऽत्र॥ तो। जगतो मोहनार्थाय भगवान् नरूपो नमः। दर्शयन् मानुषीं चेष्टां तथाप्यस्त कवद्विभुः॥ प्रकाशयन्स्वदेहो ऽपि मोहाय च दुरात्मनां। मायया ऽस्य नरकेंद्र स्वस्तदा दृष्टा प्रदर्शयेत् कुतो हि मनुजे स्यन्मृत्युभावात् स्वात्मन इति प्रमाणसद्भावात्॥१३॥ एतज्ज्ञानस्य स्वप्राप्तिहेतुत्वाद्य उक्तं पदार्थ इति भावेनोक्तमुपसंहरति। य एतामिति॥२८॥